GOBHILIYA GRIHYA SUTR
edited by Candrakanta Tarka
Calcutta The Asiatic Societ
1871

गृह्या[illegible]त्। अतएव तद्ग्रन्थप्रच[illegible] दायकाः। तेषां संस्कारयोगेन [illegible]क्रते। गोभिलकृतत्वे तस्य तन्नोपपद्यते [illegible] स्थितिः"।

परन्तु वंशब्राह्मणे बहवो गोभिला उल्लिखिताः। तत्र, कतमो गोभिलो गृह्यसूत्रस्यास्य कर्त्तेति न तत्त्वतोऽधिगच्छामः। (सम्भावयामः) योऽयं निरुपपदो गोभिलो वृहद्वसोराचार्य्यः शिष्यश्च राधगौतमस्य, सोऽयं गृह्यसूत्रस्य कर्त्ता इति। यतो गोभिलकृतितयैवास्य प्रसिद्धिर्न नामान्तरेण। गृह्यासंग्रहेऽपि गौभिलतयैवास्योल्लेखः। गोभिलश्च निरुपपदः सएव। स खल्वयं गोभिलसम्प्रदायानामादिभूतः पूर्व्वतनोऽष्टमश्चेति वंशब्राह्मणप्रचारकालादपि चिरन्तनः—इति शिवं।

शहर शेरपुर। १२ आषाढ़। १८०२ शकाब्दे।

तर्कालङ्कारोपनामक श्रीचन्द्रकान्तशर्म्मणः।

गोभिलगृह्यसूत्रभाष्ये क्रोड़पत्राणि ।

६ पृष्ठे १० पंक्तौ "स 'गृह्यसंग्रहः' इति ।" इत्यतः परं निवेश्यम् ।

तथाचाचार्य्यपुत्त्रश्चाह । "पत्न्यः पुत्त्राश्च कन्याश्च जनिष्याश्चापरे सुताः। गृह्या इति समाख्याता यजमानस्य दायकाः । तेषां संस्कारयोगेन शान्तिकर्म्मक्रियासु च। आचार्य्यविहितः कल्पस्तस्माद् गृह्या इति स्थितिः"। इति ।

---

३० पृष्ठे ६ पंक्तौ "चेत्याहुः"—इत्यतः परं निवेश्यं ।

स खल्वयमभिरूपः,—"यत्र विद्या च वित्तञ्च सत्यं धर्म्मः शमो दमः। अभिरूपः स विज्ञेयः स्वाश्रमे योऽव्यवस्थितः" इति गृह्यासंग्रहोक्तो द्रष्टव्यः ।

---

३५ पृष्ठे १० पंक्तौ निवेश्यं* ।

इति । "पार्थिवी चैव भौमी च लेखे द्वे द्वादशाङ्गुले । एकविंशति-राग्नेयी प्रादेशिन्ये उभे स्मृते। षड़ङ्गुलान्तराः कार्य्या आग्नेयीसंहितास्तु ताः । पार्थिवायास्तु रेखायास्तिस्रस्ता उत्तरोत्तराः ।

---

३५ पृष्ठे १२ पंक्तौ निवेश्यं ।

"एष लेखविधिः प्रोक्तो गृह्याकर्म्मसु सर्व्वसु" इतिच । एतस्माद्वचनाद्

---

* यत्र यत्र 'पंक्तौ निवेश्यं'—इत्युच्यते, तत्र पंक्तिशेषे निवेशो बोध्यः ।

गृह्याकर्म्मस्वयमेव लेखविधिरादरणीयः। अन्यत्र पुनः कात्यायनोक्त इति बोद्धव्यम्। एवञ्च रेखादैवतवर्णयोरपि गृह्यासंग्रहोक्तकल्प-एवाभिनिवेशः तत्रैवाभिधानात्।

३८पृष्ठे १२पंक्तौ "समाम्नानात्"—इत्यतः परं निवेश्यम्। परमार्थतः पुनर्गृह्योक्तकर्म्मसु पारशाखिकगुणोपसंहारोनास्ति, किन्तु श्रौतेष्वेव स इति गृह्यासंग्रहभाष्ये निपुणतरमुपपादयिष्यामः।

४६पृष्ठे ६पंक्तौ "किञ्चिदनुचितम्"—इत्यतः परं निवेश्यं। आचार्य्यपुत्रोप्येतस्माद्धेदेनैव विभागस्याधानकालत्वमाह। तथाच गृह्या-संग्रहः। "आधानस्य तु चत्वारउक्ताः कालाः पृथक् पृथक्। अन्यथा समिद्धिवाहश्च विभागः परमेष्ठिनः" इति।

५४पृष्ठे १३पंक्तौ 'रचेदित्येतत्'—इत्यतः परं निवेश्यं। अथैवमुत्तरसूत्रे, 'सएव'—इत्यस्यैवाग्नेः परामर्शात् 'प्रेते वा गृहपतौ'—इत्यादिकालाहितानामग्नीनां गृह्यत्वं न प्राप्नोति?। नैष दोषः। प्राधान्यात् खल्वाचार्य्यः 'सएव' इत्याह। ततएवारभ्य खल्वसौ गृह्योभवति। अन्यस्याप्यग्नेर्गृह्यत्वं वास्तवमिति न शक्यं निरसितुम्। स्मार्त्तः खल्वग्निरेवमभिधीयते।

परतरेण वा सूत्रेणैतत् संभंत्स्यते। कथं कृत्वा?। यदेवान्त्यां समिधमभ्यादधाति, यदेव च जायायाः पाणिं जिघृक्षन् जुहोति, तं होममभिसंयच्छेत्—अभिमुख्येन सम्यक् कुर्य्यात्, तेन चैव होमे-

नास्य प्रातराहुतिर्हुता भवतीति । सोयमित्थं परतरेणास्याभि-संबन्धः । अस्याश्च वर्णनायामुत्तरसूत्रे 'सएव'—इति पूर्व्वप्रकृतः सर्व्वोप्यग्निः परामर्ष्टव्योभवति । कथं पुनरतिक्रम्य परसूत्रं परतरेण सूत्रेण संभंत्स्यते ? । अतिक्रान्तसंबन्धस्याचार्य्यानुमतत्वादित्याह । कथं ज्ञायते ? । "पुनरुक्तमतिक्रान्तं यच्च सिंहावलोकितं । गौभिले ये न गच्छन्ति न ते ज्ञास्यन्ति गौभिलं" इति गृह्यासंग्रहवचनात् । उत्तर-सूत्रएव वा 'सएव'—इति व्यवहितोपि सर्व्वाग्निः परामृश्यतामिति न किञ्चिदनुचितम् ।

५७पृष्ठे २पंक्तौ 'क्रियते'—इत्यतः परं निवेश्यं ।

अन्यच्च परमेष्ठिविभक्तयोरग्न्योः । तथाच गृह्यासंग्रहः । "परमेष्ठी विभक्तश्च जुहुयाद्व्रतान् सकृत् । प्रातस्तूष्णीं घृतं वापि प्रातराहुत्युप-क्रम."—इति ।

६२पृष्ठे ११पंक्तौ 'अत्रच'—इत्यतः परं निवेश्यं ।

"गोभिर्बालपवित्रेण धार्य्यमाणेन नित्यशः । न स्पृशन्तीह पाप्मानि श्रियं गात्रेषु तिष्ठति"—इति ।

१०३पृष्ठे ८पंक्तौ 'मधस्तादेव'—इत्यतः परं निवेश्यं ।

अभ्युपगम्य चेमं तर्पणयोः प्रकृतिविकारभावमेतावदस्माभिर्विचारितम् । परमार्थतः पुनरनयोः प्रकृतिविकारभावएव नास्ति । कुतः ? । द्वयोरेव सपरिकराभिहितत्वात् । स्नानाङ्गतर्पणं खल्वाचार्य्येण सपरिकरमभि-

हितं स्नानग्रन्थे। तथैव प्रधानतर्पणं कात्यायनेन कर्म्मप्रदीपे। कः खल्वनुमन्तः सपरिकराभिहितयोरनयोः प्रकृतिविकारभावमाचक्षीत!। तस्मादन्यादृशमेव तर्पणं स्नानाङ्गं सवितुरुपस्थानात् परतः करणीयमाचार्य्येणोक्तम्, अन्यादृशमेव च प्रधानं तर्पणं ब्रह्मयज्ञात् परस्तात् कर्त्तव्यं कात्यायनेनोक्तमिति न किञ्चिदनुचितम्।

२११पृष्ठे ९पंक्तौ 'सूचयति'—इत्यतः परं निवेश्यं।
उपकल्पनञ्चामीषामग्नेरुत्तरतउदगग्राणां प्राञ्चं प्राञ्चं प्रयोजनानुसारेण करणीयम्। तथाच कर्म्मप्रदीपः। "प्राञ्चं प्राञ्चमुदगग्नेरुदगग्रं समीपतः। तत्तथाऽऽसादयेत् द्रव्यं यद्यथा विनियुज्यते"—इति। उपकल्पितानाञ्चामीषां वीक्षणं प्रोक्षणञ्चाद्भिः कर्त्तव्यम्। कुतः?। "द्रव्याणामुपकॢप्तानां होमीयानां यथाविधि। प्रसिञ्चन् वीक्षणं कुर्य्यादद्भिरभ्युक्षणन्तथा"—इति गृह्यासंग्रहवचनात्। तदिदं द्रव्यासादनं स्थण्डिलोपलेपनात् परतएव करणीयम्। तथैवाचार्य्येण सूचणात्। आचार्य्यपुत्रोऽपि गृह्यासंग्रहे। "भूमेः समूहनं कृत्वा गोमयेनोपलिप्य च। द्रव्याण्युत्तरतः स्थाप्य वृषीं कुर्य्यादुदङ्मुखीम्"—इत्युपलेपनात् परं द्रव्यासादनमभिधाय, पश्चाल्लक्षणकरणमग्निस्थापनादिकञ्चाभिहितवान्। एवञ्च, "पुरोडाशकपालेन तुषानुपवपति"—इत्यत्र यथा भविष्यता पुरोडाशेन कपालस्याभिसंबन्धः, तद्वदत्रापि भविष्यतैवाग्निना उत्तरस्याभिसंबन्धोबोद्धव्यः। अग्निस्थापनात् पूर्व्वमेव द्रव्यासादनस्योपदेशादनन्यगतेर्व्वचनात्।

२२०पृष्ठे १३पंक्तौ 'गृह्यान्तरम्'—इत्यतःपरं निवेश्यं ।
सेयमसङ्गता वर्णना । कस्मात् ?। आचार्य्यपुत्राभिहितक्रमविरोधात्। तथाच गृह्यासंग्रहः । "लेखनाभ्युक्षणे कृत्वा निहितेऽग्नौ समिद्दत् । ततोभूमिग्रहं कृत्वा कुर्य्यात् परिसमूहनम् । ब्रह्माणमुपसंकल्प्य चरु-श्रपणमारभेत्"—इति । कर्म्मप्रदीपोक्तस्तु क्रमआधानविषयः । कुतः?। तत्रैव तदभिधानात् । गृह्यान्तरमपि अन्येषामेव नास्माकम् । का-त्यायनादिभिर्हि तत् सूचितम्। ते किल काण्वादिशाखिनां सूत्रकाराः ।

२२८पृष्ठे ९पंक्तौ, 'तत्त्वकारः'—इत्यतःपरं निवेश्यं ।
परमार्थतः पुनर्व्विकल्पएवानयोर्वक्तव्यः । कथं नाम ? । पञ्चाशद्भिर्वा-कुशैर्भवेत् अपरिमितैर्वा,—इति । कुतः ? । संख्यावचनस्याप्यस्मच्छाखा-विषयत्वात्। गृह्यासंग्रहे खल्वाचार्य्यपुत्रः "पञ्चाशद्भिः कुशैर्ब्रह्मा",—इत्याह ।

२२९पृष्ठे १६पंक्तौ, 'उक्तम्'—इत्यतःपरं निवेश्यं ।
इदन्त्विह वक्तव्यम् । कर्म्मप्रदीपकृता पदार्थानामुपन्यासमात्रं कृतं न तु क्रमोप्यमीषामभिहितः । तथाविधवचनव्यक्तेरभावात् । तत्र, चर्व्वङ्ग-मभिधाय भूमिजपप्रकाराभिधानात् खल्वानुमानिकः क्रमः परिचि-कल्पयिषितः । स चायमाचार्य्यपुत्राभिहितप्रत्यक्षक्रमविरोधाद्भवितुं नार्हति । तथाच "लेखनाभ्युक्षणे कृत्वा"—इत्यादि पुरस्तादुदाहृतम् । तस्मादाचार्य्यपुत्रवचनात् भूमिजपं तृचेन परिसमूहनञ्च कृत्वा ब्रह्म-स्थापनं कर्त्तव्यं, ततश्चरुश्रपणमित्यादरणीयम्। न चेदेवम्, कर्म्मप्रदीप-

कृत्वा दक्षिणामभिधाय चर्व्वङ्गस्याभिधानात् दक्षिणानन्तरं चरुः स्यात् । आचार्य्योऽपि ब्रह्मस्थापनात् परम्, "अथोलूखलमूषले"—इत्यादिना चरुश्रपणं सूचयिष्यति । तस्मात् 'अन्यत्' चरुश्रपणादिकम्,—इति वर्णनीयम् । अनर्थकं तर्हि; ननु 'अथोलूखलमूषले'—इति सूचयिष्यत्येव । नानर्थकम् । कुतः ? । सामान्यविशेषभावोपपत्तेः । अन्यत् चेष्टेत,—इति सामान्यतः सूचयित्वा, अथोलूखलमूषले,—इत्यादिना विशेषतः सूचणमुपपद्यते । आदरार्थत्वाच्च । आदरार्थं पुनरुपादानं खल्वाचार्य्याणां बहुलमुपलभ्यते । शास्त्रे चास्मिन् पुनरुक्तिराचार्य्यस्यानुमतेति पुरस्तान्निवेदितमस्माभिः । यत्र तु चरुर्नास्ति, तत्र, अन्यत् आज्यसंस्कारादिकम्,—इत्यभिप्रेत्य वा वचनमेतदुपपादनीयम्। द्रव्यासादनन्तु आस्तां तावदिदानीं, यावदग्निस्थापनादपि पूर्व्वं करणीयमिति पुरस्तादेव व्यवस्थापितमित्यास्तां विस्तरः ।

२२१पृष्ठे २०पंक्तौ, 'स्वपीत्यर्थः'—इत्यतःपरं निवेश्यं । प्रकारान्तरमाह गृह्यासंग्रहः । "चतुर्मुष्टिश्चरुः कार्य्यस्तूर्णामुत्तरोऽपि वा"—इति । मुष्टिः पलमिति गृह्यासंग्रहभाष्ये वक्ष्यामः ।

२२४पृष्ठे ११पंक्तौ निवेश्यं ।

अभिघारणञ्चेदं शृतं पवित्रान्तर्हितं कृत्वा करणीयम् । तथाच गृह्यासंग्रहः । "पवित्रान्तर्हितं कृत्वा चरुं प्राज्ञोऽभिघारयेत् । उद्वास्य चैव विधिना एवं तन्त्रं न लुप्यते"—इति ।

२३७पृष्ठे १८पंक्तौ 'प्रातर्होमादिभ्यः'—इत्यतः परं निवेश्यं ।

यत्र पुनस्तरणं क्रियते, तत्र ब्रह्मैव स्तरणकार्य्यं करोति, नतन्यत् परिस्तरणं करणीयम् । कुतः ? । "ब्रह्माणं स्तरणं विद्यास्तर्थेव न कल्पितः"—इति गृह्यासंग्रहवचनात् ।

२३८पृष्ठे १२पंक्तौ, 'इति'—इत्यतः परं निवेश्यं ।

तदमे परिधयोगृह्याकर्मसु न करणीयाः । तथाच गृह्यासंग्रहः । "परिधींस्तु न कुर्व्वीत गृह्याकर्मसु याज्ञिकः । उदकाञ्जयस्तिस्रस्ते वै परिधयः स्मृताः"—इति ।

२३९पृष्ठे २पंक्तौ, 'मन्यन्ते'—इत्यतः परं निवेश्यं ।

सेयं विहितप्रतिषिद्धा प्रणीता गृह्याकर्मसु नोपकल्पयितव्या । कुतः ? । "विहितप्रतिषिद्धाञ्च प्रणीतां नोपकल्पयेत्"—इति गृह्यासंग्रहवचनात् ।

२४१पृष्ठे १८पंक्तौ निवेश्यं ।

"एतत् सम्पूयनं नाम पश्चादुत्पवनं स्मृतम्" ।

२४३पृष्ठे ११पंक्तौ, 'भट्टभाष्यम्'—इत्यतः परं निवेश्यं ।

गृह्यासंग्रहस्त्वाह । "आज्यानां सर्पिरादीनां संस्कारे विधिचोदिते । अनधिश्रयणं दध्नः शेषाणां श्रयणं स्मृतम्"—इति ।

२५५पृष्ठे १४पंक्तौ निवेश्यं ।

येषान्तु प्रतिपत्त्यर्थकर्म्म स्विष्टकृदितिदर्शनम्, तेषां खल्वेतदपचारेपि शेषस्याज्येन होतव्यं भवति ।

२६३पृष्ठे १७पंक्तौ निवेश्यं ।

तदेतत् सर्व्वं पूर्व्वनिबन्धॄणां मतमनुसरद्भिरस्माभिर्व्याख्यातं विचारितञ्च । परमार्थतस्तु प्रतिपत्तिरेवैतन्न भवति । कुतः? । निर्द्देशसामान्यात् । "ततएव वर्हिषः प्रादेशमात्रे पवित्रे कुरुते"—इति वदतापि, "ततएव वर्हिषः कुशमुष्टिमादाय"—इति निर्द्दिश्यते । अस्माच्च निर्द्देशसामान्यात् तत्तदेव अत्रापि स्तृतशेषाणि वर्हींषि इदयमागच्छन्ति । आगच्छन्ति चेत्, न युज्यते विनाकारणमुत्स्रष्टुम् । स्तृतानां वर्हिषामिदानीं प्रतिपिपातयिषितत्वादिति चेत् । न । प्रमाणाभावात् । प्रतिपत्तिप्राये वचनादिति चेत् । न । असिद्धेः । कथमसिद्धिः? । आग्नेयादीनामप्रतिपत्तीनां सन्निहिततरत्वात् । तदेवं प्रमाणविशेषस्याभावात् विनियुक्तविनियोगोन खल्वपि युक्तोवर्णयितुम् । प्रतिपत्तिप्रायेवचनात् खल्वानुमानिकं प्रतिपत्तित्वं परिचिकल्पयिषितम् । तच्चैतत् न्यायविरोधान्न सेद्धुमर्हति । तस्मात् "विरोधे च श्रुतिविशेषादव्यक्तः शेषे"—इति सिद्धान्तात् स्तृतशेषादेव वर्हिषः कुशमुष्टिमादाय, —इति व्याख्येयम् । तदेतदाचार्य्यपुत्रः स्पष्टयाञ्चकार गृह्यासंग्रहे । "स्तृतेभ्योव प्रचिनीयात् यातयामं स्तृतं स्मृतम् । स्तृतशेषात्ततोगृह्य यज्ञवास्तुक्रिया तथा"—इति । यज्ञवास्तुक्रियां कृत्वा चाज्येन पूर्णाहुतिर्होतव्या । तथाच गृह्यासंग्रहः । "यज्ञवास्तुक्रियां कृत्वा

विधिदृष्टेन कर्म्मणा। आज्यधारामविच्छिन्नां जुहुयात् सार्व्वकामिकीम्"—इति।

२६८पृष्ठे ३पंक्तौ निवेश्यं।

सूत्रद्वयं वैतत्,—'पूर्णपात्रोदक्षिणा'—इति, 'तं ब्रह्मणे दद्यात्'—इति च। तत्र, 'पूर्णपात्रोदक्षिणा'—इत्यनेन, पूर्णपात्रं दक्षिणा भवति कर्म्मणाम्, अनुच्यमानायां दक्षिणायाम्—इत्युच्यते। कथं ज्ञायते?। अनुच्यमानायां दक्षिणायां पूर्णपात्रादिका दक्षिणा भवति,—इति कर्म्मप्रदीपवचनात्।

'तं ब्रह्मणे दद्यात्'—इत्यनेन ब्रह्मणे दक्षिणायादानमुपदिश्यते। तदनेन तत्शब्देन दक्षिणैव परामृश्यते न पूर्णपात्रम्। कस्मात्?। सन्निहिततरत्वात् दक्षिणायाः, व्यपेतत्वाच्च पूर्णपात्रस्य। अर्थवत्त्वाच्च। दक्षिणादानेन हि नः प्रयोजनं न पूर्णपात्रदानेन। लिङ्गव्यत्ययस्तु भवतोऽपि समानः। 'ब्रह्मणे दक्षिणा देया'—इति कात्यायनवचनाच्चैतदेवं प्रतिपत्तव्यम्। स खल्वस्पष्टानां गोभिलोक्तानां प्रतीपवत् स्पष्टमुपदेष्टा,—इत्यवोचाम।

२७०पृष्ठे १२पंक्तौ निवेश्यं।

अथ वा। एकोऽब्रह्मैव ऋत्विगिति ब्रह्मणे दक्षिणादाने हेतुवचनमेतत्। होताद्यस्त्वन्यऋत्विगित्याशङ्कायामुत्तरं सूत्रं प्रवर्त्स्यति।

२९०पृष्ठे ३पंक्तौ 'वाभिषेकः'—इत्यतः परं निवेश्यं ।

तथाच गृह्यासंग्रहः । "सर्व्वयज्ञेषु विप्राणामद्भिः पूर्णं प्रवर्त्तते । तस्मात् सुरोत्तमाह्यापोऽद्भिरेवाभिषेचयेत्"—इति ।

२९१पृष्ठे २१पंक्तौ 'रित्येतत्'—इत्यतः परं निवेश्यं ।

तथाच गृह्यासंग्रहः । "महानदीषु या आपः कौप्यान्याश्च ह्रदेषु च । गन्धवर्णरसैर्युक्ता ध्रुवास्ताइति निश्चयः"—इति । तदेवं ध्रुवाभिरद्भिः

२९२पृष्ठे २पंक्तौ 'इत्यन्ये'—इत्यतः परं निवेश्यं ।

रस्तुतस्तु गन्धमाल्यैरुदकुम्भमलङ्कृत्य प्रावृतांसोधारयेत् । कथं ज्ञायते ? । "गन्धमाल्यैरलङ्कृत्य सकुम्भोवाग्यतः शुचिः । धारयेत् त्रिषु वर्णेषु प्रावृतांसोद्विजोत्तमः"—इति गृह्यासंग्रहवचनात् ।

२९३पृष्ठे १५पंक्तौ निवेश्यं ।

अत्र च, "सुवर्णाभिरनिन्द्याभिरद्भिरक्षतमिश्रितैः । स्नानं चतुर्भिः-कलसैः स्त्रीभिः स्त्रीं यच्च स्नावनम्"—इति गृह्यासंग्रहोक्तोविशेषो द्रष्टव्यः ।

२९७पृष्ठे २पंक्तौ निवेश्यं ।

तथाच गृह्यासंग्रहः । "यदा निष्क्रामयेत् कन्यां वरः चयव । अग्निं प्रदक्षिणं कृत्वा कटस्तीर्णं पदं व्रजेत् । पदा प्रपद्य पन्थानं पतियानं संजपेद्वधूः । वरोवाऽत्र जपेन्मन्त्रमाकटान्तादितिस्थितिः" —इति ।

२०५पृष्ठे ३पंक्तौ, 'इति'—इत्यतः परं निवेश्यं ।

वस्तुतस्तु, "तथा लाजाञ्जलिर्बध्वा हूयतेऽङ्गुलिपर्व्वभिः"—इति गृह्य-संग्रहोक्तप्रकारेणास्माकमयं होमो भवति, न शाखान्तरोक्तप्रकारेण । स्वशाखाश्रयमुत्सृज्य परशाखाश्रयकरणस्य निषेधादिति द्रष्टव्यम् ।

२०८पृष्ठे ४पंक्तौ निवेश्यं ।

"प्राजग्राहसमुद्गाहं ब्रह्माणमृत्विजं तथा । एतानि वाह्यतः कृत्वा शेषाणान्तु प्रदक्षिणम्"—इति । यश्चायं होमात् परतः परिणयः, सोऽयं ब्राह्म्यादिषु विवाहेषु द्रष्टव्यः । गान्धर्व्वादिषु पुनर्व्विवाहेषु प्रथममेव परिणयः ततो होमः करणीयः । तथा च गृह्यसंग्रहः । "ब्राह्मस्यार्षस्य दैवस्य प्राजापत्यस्य याज्ञिकैः । पूर्व्वं होमविधिः प्रोक्तः पश्चात् परिणयः स्मृतः । गान्धर्व्वासुरपैशाचाविवाहाराक्षसाश्च ये । तेषां परिणयः पूर्व्वं पश्चाद्धोमो विधीयते"—इति । स खल्वयमाचार्य्यो ब्राह्म्यादीन् प्रशस्तान् विवाहानभिप्रेत्य होमात् परतः परिणयनं सूत्रयाञ्चकार,—इति स्थिते ।

२०९पृष्ठे १२पंक्तौ 'गृह्यान्तराच्च'—इत्यतः परं निवेश्यं ।

नैतत् समीचीनम् । कुतः ? । स्वशास्त्रविरोधात् । तथा च गृह्य-संग्रहः । "एवं लाजहविः शेषं हूयते सूर्पजिह्वया"—इति । तस्मादस्माकं सूर्पजिह्वयैतद्धोतव्यं भवति ।

३१२पृष्ठे ७पंक्तौ, निवेश्यं।

तथाच गृह्यासंग्रहः। 'विवाहे यो विधिः प्रोक्तोमन्त्रादाम्यत्यवाचकाः। वरस्तु तान् जपेत् सर्व्वान् क्षत्रिकराजन्यवैश्ययोः',—इति।

३१८पृष्ठे १७पंक्तौ 'इष्यते'—इत्यतः परं निवेश्यं।

तथाच गृह्यासंग्रहः। "कृत्वाऽऽज्यं परिशेषेण यत् द्रव्यमुपकल्पितम्। स्रुवेणैव तु तत् स्पृष्टं सम्पातश्चैव तं विदुः"—इति।

३२३पृष्ठे ८पंक्तौ 'प्रमाणाभावात्'—इत्यतः परं निवेश्यं।

वस्तुतस्तु आसुरादिविवाहोढ़ायाः प्रेतकृत्यं पितृगोत्रेण कर्त्तव्यमिति वृद्धशातातपेनोक्तम्। यथा। "आसुरादिविवाहेषु पितृगोत्रेण धर्म्मवित्"—इति। सपिण्डीकरणन्त्वस्यास्तन्मात्रादिभिः करणीयमित्याह सएव। "तन्मात्रा तत्पितामह्या तत्श्वश्र्वा वा सपिण्डनम्। आसुरादिविवाहेषु विन्नानां योषितां भवेत्"—इति। एवमपि, सपिण्डीकरणेनैकभूर्त्तित्वप्राप्तेर्हेतुत्वेनोपादानात् प्राचीनं वचनम्—चतुर्थीतः पूर्व्वमेव या संस्थिता, तद्विषयमेव पर्य्यवस्यति,—इति ध्येयम्।

३२७पृष्ठे ७पंक्तौ निवेश्यं।

परमार्थतस्तु, तत्र 'हविष्यमन्नम्'—इति सूचयन् एतदेवाक्षारलवणं व्याकरोति। तस्मात्,—"अयुक्तमक्षारलवणैरपर्य्युषितमेव च। हविष्यमेतदन्नाद्यमसुरैश्चाप्यसंयुतम्"—इति गृह्यासंग्रहोक्तस्यान्नं बोद्धव्यम्।

२४४पृष्ठे १५पंक्तौ 'एवायमर्थः'—इत्यतः परं निवेश्यं। वस्तुतस्तु, उद्वर्त्तनं नखरोमच्छेदनं मेखलायाः स्रंसनञ्च स्नानमुच्यते। कथं ज्ञायते?। "उद्वर्त्तनं नखच्छेदो रोमच्छेदनमेव च। स्रंसनं मेखलायाश्च स्नानानि विदुर्बुधाः"—इति गृह्यासंग्रहवचनात्। एतदविद्वांसएव 'स्नापयित्वा'—इति पठन्ति। तदश्रद्धेयम्।

२५२पृष्ठे ३पंक्तौ निवेश्यं।

वस्तुतस्तु मन्त्रानादेशे व्याहृतयः प्रयोक्तव्याभवन्ति। कुतः?। "यत्र मन्त्रान विद्यन्ते व्याहृतीस्तत्र योजयेत्"—इति गृह्यासंग्रहवचनात्। चरुश्रपणादिकमेव तूष्णीं कर्त्तव्यमिति तत्रैव ज्ञेयम्। तस्मात् व्याहृतिभिरंशस्याभिमर्शनं मन्त्रेण नाभिदेशस्य,—इत्यादरणीयम्।

२६६पृष्ठे १पंक्तौ 'सिद्धम्)।'—इत्यतः परं निवेश्यं। अथ वा। युग्मम्—इति च्छेदः। युग्ममुभयतः फलम्, तं पूर्व्वमाहृतम्,—

२६७पृष्ठे १८पंक्तौ निवेश्यम्।

तत्र ब्रूमः। यत्तावदुक्तम्,—प्रथमएवोन्नयने त्रिशोदर्भपिञ्जल्योव्याप्रियन्ते एवमुत्तरयोः,—इति, एतद्ब्रूमः। यत् पुनरुक्तम्,—उन्नयनचित्वाद्दर्भपिञ्जल्योपि नवैव सम्पद्यन्ते,—इति, एतन्नानुजानीमः। किं कारणम्?। मानाभावात्। 'भूरितिदर्भपिञ्जलीभिरेव प्रथमं भुवरिति द्वितीयं स्वरिति तृतीयम्'—इति वचनात् खलु तिसृणामेव

दर्भपिञ्जलीनां सर्व्वैरुन्नयनैः संबन्धोऽवगम्यते। नासौ युज्यते विना-कारणमुत्स्रष्टुम्। तस्मात्—एकैकया पिञ्जल्या एकैकमुन्नयनम्,—इत्ययुक्तं वचनम्। तथाच गृह्यासंग्रहः। "सीमन्ते दर्भपिञ्जल्यस्ति-स्तंसाभिस्त्रिरुन्नयेत्"—इति। तस्मात् तिस्रएव दर्भपिञ्जल्यस्ताभिरेव प्रथममुन्नयनं ताभिरेव द्वितीय ताभिरेव तृतीयमित्यास्थेयम्।

---

३६८ पृष्ठे २ पंक्तौ 'प्रचालनम्'—इत्यतः परं निवेश्यं।

निर्व्वपणन्त्वत्र नास्ति। तथाच गृह्यासंग्रहः। "चूड़ाकर्म्मणि सीमन्ते यस्य पाकः सदा गृहे। विवाहेचैव लाजानां नोक्तोनिर्व्वपणोविधिः" —इति।

---

४०४ पृष्ठे १ पंक्तौ निवेश्यं।

इति। "दक्षिणाकपर्द्दाः शिष्टाश्चात्रेयास्त्रिकपर्द्दिनः। आङ्गिरसः पञ्चचूड़ामुण्डाभृगोः शिखिनोऽन्ये"।

---

४३८ पृष्ठे ७ पंक्तौ, 'शब्दस्यार्थः'—इत्यतः परं निवेश्यं।

वस्तुतस्तु सावित्रव्रतमष्टभिर्व्वर्षैर्मासैर्द्दिनैर्व्वा करणीयम्। कुतः?। "समामासाश्चाहोरात्रास्तुल्यब्राह्मणचोदिताः। सावित्रमष्टभिर्वर्षैः कार्य्यं मासैर्द्दिनैश्च वा"—इति गृह्यासंग्रहवचनात्। तस्मात् नात्र संवत्सर-व्रताचरणनियमः। 'नाचरिष्यन्तं संवत्सरमुपनयेत्'—इति गोदाना-दिव्रतविषयम्। कथं ज्ञायते?। गोदानव्रतएव तदभिधानात्।

४४२पृष्ठे ११पंक्तौ निवेश्यं।

वस्तुतस्तु गोदानादिव्रतएवोपनयने नियमोयं न प्राचीनेप्युपनयने०। तत्र विशेषस्याभिधानात्। अतिक्रमस्याभिधानाच्च। चेयमुपनयति: सन्निहितमेवोपनयनमभिधत्ते न प्राचीनमपि। व्यक्तिवचन: 'खल्वयं सन्निहितां व्यक्तिं शक्नोति वदितुं, नत्वन्याम्। आग्नेयीन्यायात्। परतोवक्ष्यमाणानां धर्म्माणां यथा प्राचीनोपनयनगोचरत्वमपि, तथाऽभिहितमस्माभि:,—"वार्त्तश्चास्मै दण्डं प्रयच्छन् वाचयति"—इत्यत्र। परतश्चैतद्वक्ष्याम:।

४८२पृष्ठे ३पंक्तौ निवेश्यं।

वस्तुतस्तु, अस्माकमुपाकरणद्वैविध्येप्युत्सर्गस्य न द्वैविध्यम्। उत्सर्ग: खल्वेकएवोभयोरप्युपाकरणयो: प्रौष्ठपदे तैष्यां स्यात्। कुत:?। उभयमुपाकरणं सूचयित्वा परतस्तैष्यामुत्सर्गस्य सूचणात्तथाऽवगते:। अतएव कात्यायनेपि 'प्रौष्ठपदे तिष्येण वहि:'—इत्यादिना तथैवाह। नचेदमुदगयनोपाकरणाभिप्रायं वचनमित्यत्र प्रमाणमस्ति। तथात्वेचोत्सर्गान्तरं नस्यादेव। अनुपदेशात्। तस्मादेकएवोत्सर्ग: प्रौष्ठपदे तिष्येणेत्यवधार्य्यते। अतएवोभयमुपाकरणमुपदिश्य "उत्सर्गश्चैकएवैषां तैष्यां प्रौष्ठपदेऽपि च"—इत्येकमेवोत्सर्गमुभयेषामभिधत्ते। न च प्रौष्ठपदे हस्तेनोपाकरणकर्त्तुस्तत्रैव पुनस्तिष्येणोत्सर्गो न सम्भवतीतिवाच्यम्। वर्षान्तरे प्रौष्ठपदे हस्तेनोपाकर्त्तुर्वर्षान्तरे तत्रैव तिष्येणोत्सर्गसम्भवात्। तथा गार्ग्य:। "सिंहे रवौ तु पुष्यर्क्षे पूर्व्वाह्णेऽविवरे वहि:। छन्दोगामिलिता: कुर्य्युरुत्सर्गं स्वस्वच्छन्दसाम्। प्राक्-

पक्षेतु हस्तेन उपाकर्म्मापराह्णिकम्"—इति सिंहे रवौ पुष्यर्क्षे उत्सर्ग-मभिधाय हस्तेनोपाकरणमभिदधानएतदेवाह। अस्माद्वचनादस्माक-मुपाकरणे अपराह्णः कालः स्यात्। "अध्यायानामुपाकर्म्म कुर्य्यात् कालेऽपराह्णके। पूर्व्वाह्णे तु विसर्गः स्यादिति वेदविदोविदुः"—इति परिशिष्टवचनाच्चैतदेवं प्रतिपत्तव्यम्। गोभिलस्यैतदिति हेमाद्रिः। यदा पुनः सिंहस्थे सूर्य्ये शुक्लपक्षे योहस्तः तस्मात् प्राचीनः पुष्यः कर्कटस्थे रवौ भवति, तदा तत्रैव पुष्ये उत्सर्गः करणीयः। कुतः?। "मासे प्रौष्ठपदे हस्तात् पुष्यः पूर्व्वोभवेद् यदा। तदा तु श्रावणे कुर्य्या-दुत्सर्गं छन्दसां द्विजः"—इति परिशिष्टोक्तेः। तथा प्रौष्ठपदे हस्तस्य दुष्टत्वे तत्रोपाकरणं निषेधति चतुर्व्वर्गचिन्तामणौ स्मृतिः। "उपा-कर्म्म न कुर्व्वन्ति क्रमात् सामर्ग्यजुर्व्विदः। ग्रहसंक्रान्तियुक्तेषु हस्तश्रवण-पर्व्वसु"-इति। तदेवम्भूतस्थले श्रावणएव हस्ते उपाकरणं कर्त्तव्यं भवति। "बह्वृचाः श्रवणे चैव हस्तर्क्षे सामवेदिनः"—इति परिशिष्टवच-नात। श्रावणे हि बह्वृचाः श्रवणेनोपाकुर्व्वन्ति। गोभिलस्यैतदिति निर्णयामृतकारः। "धनिष्ठाप्रतिपद्युक्तं त्वाष्ट्रर्क्षसमन्वितम्। श्रावणं कर्म्मकुर्व्वीरन् ऋगयजुःसामपाठकाः"—इति परिशिष्टवचनान्तरेपि श्रावणं कर्म्मेति समाख्यया तथाऽवगम्यते। विशेषमाहतुर्वृद्धमनुका-त्यायनौ। "अर्द्धरात्रादधस्ताचेत् संक्रान्तिग्रहणं तदा। उपाकर्म्म न कुर्व्वीत परतस्तेन दोषकृत्"—इति।

तस्मादियमेत्रावधारणा,—प्रौष्ठपदीं हस्तेनोपकृत्य देवपर्व्वाणि-गेयगानादीनि तावदधीयीत यावत् अब्दान्तरे प्रौष्ठपदे तिष्यः भवति। उदगयने चोपाकृत्योत्तरारण्यकादिकं यावत् षण्मासानधीयीत। ततः

प्रौष्ठपदे तिष्येण द्वयोरुत्सर्गं कुर्य्यात्। उत्सर्गात् परतस्तु यावदन्य-दुपाकरणं न क्रियते, तावद्वेदं न व्याहरेदन्यत्र ब्राह्मणात्। अस्म-च्छास्त्रे तथैवोपदेशात्। एवञ्च, उत्सर्गात् परमपि शुक्लपक्षेषु छन्द-सामध्ययनबोधकानि यानि मन्वादिवचनान्युदाहृतानि, तानि अस्म-द्व्यतिरिक्तविषयाणि बोद्धव्यानि। अस्मच्छास्त्रे प्रौष्ठपदशुक्लपक्षे तिष्ये-णोत्सर्गात् परतः पुनस्तत्रैव हस्तेनोपाकरणविधानात् तेषां वचनानां न खल्वत्रावकाशो भवतीति।

५१५पृष्ठे ५पंक्तौ निवेश्यं।

"तुषे द्रव्यपले सम्यक् जलमुष्णं विनिःक्षिपेत्। मृत्पात्रे कुड़वो-न्मानं ततस्तु स्रावयेत् पटात्। सस्याच्चूर्णद्रवः फाण्टः"—इत्युक्त लक्षणाभि

५६०पृष्ठे १पंक्तौ "य्येत्यर्थः"—इत्यतः परं निवेश्यं।

अथवा। तूष्णीमिति वचनादमन्त्रकमेवैतान् बलीन् हरेत्।

५६१पृष्ठे ८पंक्तौ 'बोद्धव्यः'—'—इत्यतः परं निवेश्यं।

सेयमसङ्गता वर्णना भट्टनारायणस्य। कस्मात्?। "दधि सर्पिश्च संपृक्तः प्रोक्तो ह्योषपृषातकः। होमकाले तु तस्याग्नेः स्थानमुत्तरपूर्व्वतः" इति गृह्यासंग्रहविरोधात्। तस्मादग्नेरुत्तरपूर्व्वतः समासादिते सतीति वर्णनीयम्।

15889

६५० पृष्ठे १८ पंक्तौ निवेश्यं ।

अत्र किञ्चिद्वक्तव्यमस्ति। सूत्रतन्तुनिधानस्येदं—"एतद्वः पितरोवासः" —इति मन्त्रमुच्चार्य्य सूचितप्रकारेण करणीयम् । कथं ज्ञायते ? । पर्य्यमानमन्त्रकाण्डे अस्मिन्नवसरे मन्त्रस्यैतस्य पठितत्वात् । यद्येन विनियुज्येत, अनर्थकस्तस्य पाठः स्यात् । नचार्थवत्तामाम्नायोऽनर्थकः कर्त्तव्यः। कथन्तर्ह्यस्मिन्नर्थे सूत्रं न दृश्यते? । प्रत्येकमभिलापं सूत्रयितुं प्रवृत्तः खल्वयमाचार्य्योविनियोगं मन्त्रस्य न सूत्रयाञ्चकार । सकृद्धि त्रीन् पित्रादीनुद्दिश्य मन्त्रोयं पठितव्योभवति । लिङ्गाच्चात्रैव कर्म्मणि विनियोगं मन्त्रस्य सुज्ञानं मन्यते,—इति । कथं पुनरवगम्यते त्रीन् पित्रादीनुद्दिश्य सकृदेव मन्त्रः पठितव्यइति। बहुवचनादित्याह । 'नमोवः पितरः'—इत्यादौ खल्वस्मिन् वाक्यप्रवाहे पित्रादिषु त्रिष्वेव बहुवचनान्तपितृपदप्रयोगादत्रापि तथैवावधार्य्यते । न खल्वस्यैव पूर्व्वस्मिन् परस्मिंश्च वाक्यप्रवाहे पित्रादित्रिके बहुवचनान्तपितृपदस्य प्रयोगेऽवधृते इहैवाकस्मादर्द्धजरतीयन्यायेन एकैकस्मिन् पित्रादौ तथाप्रयोगइति शक्यमवगन्तुम् । कारणाभावात् । तस्मात् सकृदेव मन्त्रपाठः, अभिलापस्तु प्रत्येकमिति सिद्धम् ।

७५७पृष्ठे १९पंक्तौ 'इत्यादिना'—इत्यतः परं निवेश्यं ।

"साक्षतं सुमनोयुक्तं उदकं दधिमिश्रितम् । अर्घ्यं, दधिमधुभ्याञ्च मधुपर्कोविधीयते । कांस्येनैवार्हणीयस्य निनयेदर्घ्यमञ्जलौ । कांस्यापिधानं कांस्यस्थं मधुपर्कं निवेदयेत्"—इति कर्म्मप्रदीपवचनेनच

७५८पृष्ठे ११पंक्तौ, 'भवति'—इत्यतः परं निवेश्यं।

अपिच। 'साचतं सुमनोयुक्तम्'-इत्यादिवचनेन द्वितीयं मधुपर्कमभिधाय 'कांस्येनैव'—इत्यादि तत्परवचनेन तस्यापि कांस्यापिधानत्वं कांस्यस्थलञ्च कात्यायनः प्राह। सत्येकदेशदर्शी परवचनमजानानो मन्यते,—द्वितीये मधुपर्के पात्रस्यानुपदेशः,—इति।

७८७पृष्ठे १०पंक्तौ निवेश्यं।

तत्र गृह्याकर्मस्वाचार्य्यपुत्रोक्तएवप्रकारः। कस्मात्?। "एषलेखविधिः प्रोक्तोगृह्याकर्मसु सर्व्वसु"—इत्युपसंहारात्। कात्यायनोक्तस्तु प्रकारः पारिशेष्यादन्यत्र निविशते इति द्रष्टव्यं।

९००पृष्ठे ५पंक्तौ "देवलवचनात्"। इत्यतः परं निवेश्यं।

पक्षकल्पेऽपि शस्त्रहतानां श्राद्धमेव चतुर्द्दश्यां भवति नान्येषां। कथं ज्ञायते?। "नैव श्राद्धं चतुर्दश्यां कुर्य्याच्छस्त्रहतादृते। पक्षश्राद्धेपि कर्त्तव्ये श्राद्धशून्यैव सा तिथिः"। इतिवचनादिति कल्पतरुप्रभृतयः। चतुर्दशीत्यागे पञ्चदशादिश्राद्धसम्पत्तये पौर्णमास्यां श्राद्धमुक्तं स्मृतिसागरे। "निखिलन्तु यदा पक्षं श्राद्धं कर्त्तुमिहेच्छति। पौर्णमासीं समारभ्य तदा श्राद्धं समाचरेत्। पौर्णमास्यान्तु पूर्व्वाह्णे श्राद्धं नान्दीमुखं चरेत्। प्रपितामहाश्च ये पूर्व्वे त्रयोनान्दीमुखास्तु ते"। इति। युक्तस्तु कार्ष्णाजिनिवचनादनयोर्विकल्पइति।

गृह्यसूत्राणामकारादिक्रमेण सूची।

र

ल

व

गृह्यसूत्रसूची समाप्ता ।

अथ श्राद्धसूत्रसूची।

सूत्रं। पृष्ठे।

ग्रन्थसूची ।

ग्रन्थसूची समाप्ता ।

गृह्यसूत्राणामकारादिक्रमेण विषयसूची।

श

स

गृह्यसूत्राणां विषयसूची समाप्ता ।

गृह्यासंग्रहस्याकारादिक्रमेण विषयसूची ।

विषयः ।	पृष्ठाङ्काः ।
अक्षतादिद्रव्याणि	८१९
अग्निजिह्वाः	७७९।७८०।७८२।७८३
अग्निधमनं	८०४।८०५
अग्निनामानि...	७७५।७७६।७७७।७७८
अग्निप्रणयनं	८०२।८०३
अग्निमुखं	७८२
अग्नेः स्वरूपं	८०३
अजिनादिधारणं	८५४
अनुदयः	८०५
अन्या समित्	८६०
अपराजिता	८७२
अभिरूपः	८३७
अर्घ्यः	८६२
अविदासी ह्रदः	८४६
अष्टकाविधौ कपालसंख्या ...	८६९
अष्टाङ्गार्घ्यः	८६२

आ

आग्रयण विषयः	८८३।८८४
आचार्य्यानुमतवाक्यनिर्णयः	८२४

ग्रह्यासंग्रहसूची समाप्ता।

श्राद्धसूत्राणामकारादिक्रमेण विषयसूची।

श्राद्धसूत्रसूची समाप्ता ।

गोभिलीयं

गृह्यसूत्रम् ।

प्रथमप्रपाठके प्रथमकाण्डम् ।

ॐ नमः सामवेदाय ।

वेदान्तप्रतिपाद्यमेकममलं मानैरमेयञ्च यत्
सर्व्वैराश्रमधर्म्मकर्म्मनिकरैराराध्यशुद्धान्तराः ।
यस्मात् प्राप्य यथार्थवस्तुनियतामाचार्य्यवर्य्यान्मतिं
यत्तत्तत् पदमाप्नुवन्ति मुनयः कस्मैचिदस्मै नमः ॥
वन्दे पितृपदद्वन्द्वमरविन्दमिव श्रितम् ।
मकरन्दमिवादातुं शिष्यैर्मधुकरैरिव ॥
महर्षिं गोभिलाचार्य्यं प्रणम्य परमादरात् ।
भाष्यन्तद्गृह्यसूत्राणां यथाबुद्धि विधीयते ॥

इह खलु बुभुत्सितमर्थं प्रतिपिपादयिषया सर्व्व एव प्रेक्षापूर्व्व-कारिणो वाग्व्यापारं प्रतिपद्यन्ते, श्रोतारश्च तमवधार्य्य श्रेयसा

समीहितेन संसृज्यन्ते। बुभुक्षितस्यार्थः सुखमेव सर्व्वेषां प्राणभृद्भेदानामन्यच्चैतदनुकूलं किञ्चिदिति प्रतिपद्यामहे। दुःखनिवृत्तिश्चेत्याहुः। प्राणिनः खलु सुखमुत्पिपादयिषव एवोपलभ्यन्ते पशवोऽपि, किं पुनर्मनुष्या विवेकशक्तिमन्तः?। तदिदं प्रत्यात्मप्रतीप्सितमपि सुखं निरतिशयमेवाभ्यर्हितमित्यपवर्ग एव तावत् परमार्थः। स खल्वनभिसंहितफलैरीश्वरसमर्पितैर्नित्यनैमित्तिकादिकर्म्मभिः प्रशुद्धचित्तस्याधिकारिणः तत्त्वाववोधात् सम्पद्यते इत्याचक्षते। भवति चात्रागमः। "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन—" इति, "तपसा ब्रह्म विजिज्ञासस्व" इति चैवमादिः। मनुरपि—

"अहिंसयेन्द्रियासङ्गैर्वैदिकैश्चैव कर्म्मभिः।
तपसश्चरणैश्चोग्रैः साधयन्तीह तत्पदम्"।

इति स्मरति। "कषाये कर्म्मभिः पक्वे ततो ज्ञानं प्रजायते" इति च स्मर्य्यते पुराणेषु। अतएव भगवान् वादरायण आचार्य्यः शारीरके—"सर्व्वापेक्षा च यज्ञादिश्रुतेरश्ववत्" इति सूत्रयाम्बभूव। "तपः स्वाध्यायेश्वरप्रणिधानानि क्रियायोगः" इति, "समाधिभावनार्थः क्लेशतनूकरणार्थश्च" इति, तथा, "योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः" इति, "यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि" इति, "शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः" इति च पातञ्जलानि सूत्राणि। "ताभ्यः पावित्र्यमुपक्रमात्"—इति च शाण्डिल्यसूत्रम्।

तदेवं धर्म्म एव साधनतया प्रथममाश्रयणीय इति स्फुटतर-मवगम्यते। येषान्तु वेदाम्नाः कर्म्मदेवतादिप्रकाशकतयैव प्रमाण-मिति दर्शनं, तेषामभ्यर्हितत्वं धर्म्मस्य सुतरामिति स्थिष्यते।

अर्थकामावपि नान्तरेण धर्म्ममुत्पद्येते। न खल्वधार्म्मिकस्यार्थः कामो वाऽस्ति कश्चिदिति धर्म्ममेव तदुपायतया स्मरति भगवान् व्यासः।

"कामार्थौ लिप्समानस्तु धर्म्ममेवादितश्चरेत्।
नहि धर्म्मादपेतोऽर्थः कामो वापि कदाचन"।

इति। "धर्म्मादर्थश्च कामश्च" इति च महाभारते। तदेवमा-लोच्य परमकारुणिक आचार्य्यः वैदिकमन्त्रविनियोगपरं श्रौत-मिश्रं स्मार्त्तं गृहस्थधर्म्मं छन्दोगानामुपदिदिक्षुर्गृह्यसूत्राख्यमिदं शास्त्रं रचयाञ्चकार। सूचमिति हि सूच्यते येनार्थस्तदुच्यते। शास्त्रत्वञ्चास्यानुशासनादिति स्पष्टतरम्। व्याचिख्यासितस्य गृह्य-सूत्रशास्त्रस्येदमादिमं सूत्रम्—

अथातो गृह्याकर्म्माण्युपदेक्ष्यामः॥ १॥

तत्रायमथशब्दो विशिष्टमानन्तर्य्यं द्योतयति। प्रतियोगिविशेषा-पेक्षं खल्वानन्तर्य्यं विशिष्टं भवति। तच्च वेदाध्ययनं तदर्थविचार-स्तेत्येवमादिकं, "वेदमधीत्य स्नायात्" इति, "अथातो धर्म्म-जिज्ञासा" इति चैवमादिशास्त्रेभ्यः। तदनेनाथशब्देन शास्त्रस्यादौ मङ्गलमपि कृतं भवति।

"ॐकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा।
कण्ठं भित्त्वा विनिर्यातौ तेन माङ्गलिकावुभौ"।

इति स्मरणात्। न चाथशब्दो मङ्गलार्थः, अर्थान्तरप्रयुक्त एव ह्यथशब्दः श्रुत्या मङ्गलप्रयोजनो भवति, अन्यार्थोपनीतमपि दधिदूर्वादिकमिवावलोकनमात्रेण गन्तुकामस्येति। सोऽयमथशब्दो मङ्गलमर्थः प्रयोजनं (न पुनरभिधेयं) यस्येति मङ्गलार्थ उच्यते, न खलु मङ्गलमथस्यार्थोऽभिधेयं वाच्यमित्येतत्। तथा च ब्रह्मचारिणो यथावद्वेदाध्ययनाद्यनन्तरमित्यथशब्दस्यार्थः।

अतः शब्दो हेत्वर्थः। यस्मात्—

"अतः परं समावृत्तः कुर्य्याद्दारपरिग्रहम्"।

इति—

"वेदानधीत्य वेदौ वा वेदं वाऽपि यथाक्रमम्।
अविप्लुतब्रह्मचर्य्यो गृहस्थाश्रममाविशेत्"।

इति चैवमादि स्मरणात्, यथावद्विचारशास्त्राधिगमानन्तरं—गार्हस्थ्यानुसरणं शास्त्रार्थः। यस्माच्च—

"यस्मात् त्रयोऽप्याश्रमिणो ज्ञानेनान्नेन चान्वहम्।
गृहस्थेनैव धार्य्यन्ते तस्मात् ज्येष्ठो गृहाश्रमी"।

इत्येवमादिशास्त्रेभ्यस्तदुत्तमत्वमवगम्यते। 'अतः' एतस्मात् कारणात्—इत्यतः शब्दार्थः।

अयमपरोऽतः शब्दार्थः। यतो कृत्स्नेन वेदाध्ययनादिना कर्म्मावबोधानन्तरं कर्त्तव्यत्वमिदानीमापतितं—(तथा चाहुः शास्त्रतात्पर्य्यविदः। "दृष्टो हि तस्यार्थः कर्म्मावबोधनं नाम" इति।

"चरितार्थाश्रयः कुर्य्यादधीत्य श्रुतिमादितः।
तस्य तद्धारणं व्यर्थमगन्धाया इव स्रजः"।

इति च)।—यतस्त्वाश्रमान्तरेषु गार्हस्थ्यस्य प्राथम्यं। 'अतः' एतस्मात् कारणात्। स्मृतिश्चेयमविरक्तविषया द्रष्टव्या। नातो "ब्रह्मचर्य्यादेव प्रव्रजेत्" इति श्रुतिविरोधः। सा हि श्रुतिः— "यदहरेव विरजेत्, तदहरेव प्रव्रजेत्" इत्येवमभिदधाना विरक्तमेव स्पृशति नान्यम्। एतेन "वीरहा वा एष देवानां योऽग्निमुद्वासयते" इति, "एकाश्रम्यन्त्वाचार्य्याः प्रत्यक्षविधानाद्गार्हस्थ्यस्य" इति चैवमाद्याः श्रुतिस्मृतयोऽपि व्याख्याताः। इत्यन्यदेतत्।

अयमप्यपरोऽतःशब्दार्थः। यस्मात् यथोक्तामन्तरं, गृह्यकर्म्म प्रतिपित्सवोऽन्तेवासिनो यथावदुपसन्नाः, 'अत.' एतस्मात् कारणात्—

'गृह्या' छान्दसत्वाद्गृह्याणि,—गृहे गृहस्थाश्रमे साधूनि योग्यानि,—लक्षणया गृह्याग्निसाध्यानि वा, 'कर्म्माणि' धर्म्मभूतानि, बहुवचनात् किमप्यन्यत्, 'उपदेक्ष्यामः' कथयिष्यामः।

अत्र च कर्म्मणामुपदेशकर्म्मत्वं प्रतिजानन्नाचार्य्यस्तेषां धर्म्मत्वमभिद्योतयति। अभिमतश्रेयःसाधनवस्तुकथनरूपस्योपदेशस्यान्तरेण धर्म्मत्वममीषामसम्भवात्। न खल्वश्रेयःसाधनमुपदिश्यते। न च श्रेयःसाधनं नाम धर्म्मो न भवति चोदनालक्षणापीत्यनुसन्धेयम्। तथा चोक्तं "चोदनालक्षणोऽर्थो धर्म्मः" इति। "यज्ञेन यज्ञमयजन्त देवास्तानि धर्म्माणि—" इति च यजतिशब्दवाच्यमेव धर्म्ममाचक्षते। अपि चाहुः—

"गुणद्रव्यक्रियादीनां धर्म्मत्वं स्थापयिष्यते।
तेषामैन्द्रियकत्वेपि न ताद्रूप्येण धर्म्मता।
श्रेयःसाधनता ह्येषां नित्यं वेदात् प्रतीयते।
ताद्रूप्येण च धर्म्मत्वं तस्मान्नेन्द्रियगोचरः"।

इति। अयमपरो गृह्याकर्म्माणीत्यस्यार्थः। गृहे साध्वी; कुशला, योग्या, हिता वेति गृह्या पत्नी, तया सहितस्य यानि कर्त्तव्यानि कर्म्माणि, तानीमानि गृह्याकर्म्माण्युपदेक्ष्यामः। गृह्येति वा प्रस्तुतायाः स्मृतेरभिधानम्। (गृह्येति खल्वियमभिधीयते स्मृतिराचार्य्यप्रणीता। तथा चाचार्य्यपुत्रेण कृतोऽस्या एव स्मृतेः संग्रहः "गृह्यासंग्रहः" इत्युच्यते, न "गृह्यसंग्रहः" इति।) तस्यां यानि कर्म्माण्यभिधातव्यानि तान्युपदेक्ष्याम इत्यर्थः। स्मार्त्तोऽग्निर्वा गृह्यशब्देनोच्यते। गृह्यः, शालाग्निः, रावसथ्य, औपासन, इति ह्यनर्थान्तरम्। छान्दसं दीर्घत्वम्। तस्मिन् गृह्ये स्मार्त्तेऽग्नौ यानि कर्त्तव्यानि कर्म्माणि तानीत्यादि पूर्व्ववदर्थः। अथवा गृहस्थस्य व्रतविशेषो गृह्यशब्दार्थः। "अष्टौ व्रतानि भवन्ति" इत्युपक्रम्य, "भौतिकं, सार्व्वभौतिकं, अष्टमं गृह्यमिति गृहस्थस्य" इति श्रवणात्। तस्मिन् यानि कर्त्तव्यानि कर्म्माणीत्यादि समानकल्पत्। गृह्यपदानन्तरश्रुतमप्यापदमुपदेक्ष्याम इत्यनेनान्वितं—आ उपदेक्ष्याम इति, इति भट्टभाष्यम्।

"इयमपरा सूत्रयोजना। अथशब्दो वेदाध्ययनानन्तर्य्यमभिधत्ते। अतः शब्दो हेत्वर्थम्। यस्मात्, वेदाध्ययनादर्व्वाक् न किञ्चिदर्थितव्यम्—

"योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम्।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः"।

इति स्मरणात्। 'अतः' एतस्मात् कारणात्, वेदाध्ययनानन्तरं, गृह्याकर्म्माणीत्यादि पूर्व्ववदर्थः। इदानीमधीतवेदस्य गृह्यसूते-रध्ययनसम्भवादित्यभिप्रायः।

सोऽयमनेकार्थोऽपि सूत्रस्यार्थभेदेन शब्दभेदान्नानुपपन्नः। तथाचोक्तम्।

"यावतामेव धातूनां लिङ्गं रूढिगतं भवेत्।
अर्थश्चैवाभिधेयस्तु तावद्भिर्गुणविग्रहः"।

इति। येषां पुनरनेकार्थतापि शब्दानामिति दर्शनं, तेषामनुपपत्तिरेव नावतरति।

तदनेन सूत्रेणाभिधेयादीन्यपि शिष्यप्रवृत्त्युपयोगीनि प्रतिपादितानि। तत्राभिधेयं कर्म्म यथोक्तं, श्रेयःप्रयोजनम्। सम्बन्धोऽपि यथायथं सुबोधः प्रतिपाद्यप्रतिपादकभावादिः। अथशब्देन चानन्तर्य्यावगमादधिकारी च प्रतिपादित एवेत्यास्तां विस्तरः॥ * ॥ १ ॥ * ॥

तत्र तावत् साधारणकर्म्मशेषभूताः केचन धर्म्माः परिभाष्यन्ते सौकर्य्यार्थम्। प्रतिपदं खल्वमीषामुत्कीर्त्तनेऽनर्थकमेव ग्रन्थगौरवमापद्येत, श्रोतारश्च वितुद्येरन्निति। परिभाषितव्येषु खलु कर्म्मशेषभूतेषु धर्म्मेषु कृतिसाध्यत्वात् कर्म्मणां कृतिमतः कर्त्तुरेव धर्म्मास्तावत् परिभाषते॥

यज्ञोपवीतिनाचान्तोदकेन कृत्यम् ॥ २ ॥

यज्ञोपवीतं यस्यास्ति सोऽयं यज्ञोपवीती। आचान्तं, चमु भक्षणे इति स्मरणात् भक्षितं, उदकं जलं येन, सोऽयमाचान्तोदकः। आ-शब्दो भक्षणस्य वैशिष्ट्यं द्योतयति। गृह्याकर्म्माणीति पूर्व्वस्मादिहा-नुषञ्जनीयमेकत्वेन विपरिणमय्य—कर्म्मेति। तदयमर्थः। सर्व्वमेव कर्म्म वक्ष्यमाणं, कर्त्त्रा यज्ञोपवीतिना, आचान्तोदकेन च, सता, कृत्यं कर्त्तव्यमित्येतत्। तदत्रैकमेव कर्त्तारमनूद्य द्वयं परिभाष्यते— यज्ञोपवीतिना इति, आचान्तोदकेन इति च। कथं पुनरेकेन वाक्येन द्वयमिह परिभाष्यते?। नैष दोषः। वाक्यानेकत्वात्। वाक्यद्वयमिह विज्ञायते, यज्ञोपवीतिना कृत्यमाचान्तोदकेन कृत्य-मित्यर्थभेदात्। परमिह युगपदेव धर्म्मद्वयसम्बन्धसम्भवादेकत्वा-दवबोधस्यैकमिव वाक्यमवभासते इत्येकत्र सूचितमित्यदोषः।

अत्र च "यज्ञोपवीतं कुरुते" इति।

"यज्ञोपवीतं कुरुते सूत्राणि नवतन्तवः"।

इति।

"कार्पासमुपवीतं स्यात् विप्रस्योर्द्धवृतं त्रिवृत्।
शणसूत्रमयं राज्ञो वैश्यस्याविकसौत्रिकम्"।

इति।

"वैणवीं धारयेत् यष्टिं सोदकञ्च कमण्डलुम्।
यज्ञोपवीतं वेदञ्च शुभे रौक्मे च कुण्डले"।

इति। "दाक्षायणी ब्रह्मसूत्री" इति चैवमादिशास्त्रान्तरविहि-तस्य पुरुषार्थस्यैव यज्ञोपवीतस्य कर्म्मार्थतामाचमनञ्जानात्याचार्य्यो,

न पुनः पुरुषार्थादन्यदिह विदधाति। कस्मादेवमवगम्यते? यज्ञोपवीतिनेति सिद्धवदुपदेशात्। यज्ञोपवीतीति खलु यज्ञोपवीतं यस्यास्ति सिद्धं सोऽभिधीयते इत्यवोचाम। यथा स्रग्वीति यस्य स्रगस्ति सिद्धा स एवोच्यते, न यस्य सा विधित्सितेति। तदाहि स्रग्वी भवेदित्येवमादिकं प्रयुञ्जते लौकिकाः। न खल्वत्र यज्ञोपवीती भवेदिति, यज्ञोपवीतिना भाव्यमिति वा, कात्यायनवाकथयदाचार्य्यः। नचाऽऽचार्य्यस्य न्यूनतामामानर्थिक्यंवकल्पयितुमुचिता। अपिच नखल्वेतदनेन विधीयते; वाक्यभेदप्रसङ्गात्। कथं?। अर्थभेदात्—पुरुषस्तावद् यज्ञोपवीती भवेत्, तेन च सता कृत्यमिति,—यदि द्वावप्यर्थौविधित्सितौ, भिद्येत तर्हि वाक्यम्। अर्थैक्याद्धि वाक्यमेकं मन्यन्ते तान्त्रिकाः, नचैवमर्थैक्यं भवति। भिन्नौ खल्विमावर्थौ भवतः—यज्ञापूर्वस्य यज्ञोपवीतस्य विधिः, यस्य तस्य कर्म्मसंयोग इति। योषितामप्येवं प्रसङ्गात्। यदि हि पुरुषार्थादन्यदेव यज्ञोपवीतं कर्म्मार्थमिह विधीयते, वक्तव्यन्तर्हि योषितामपि कर्म्मसु यज्ञोपवीतधारणम्, नचैवमिष्यते। तस्मात् पुरुषार्थस्यैव सतो यज्ञोपवीतस्य कर्म्मार्थतामात्रमिहोच्यते, न ततोऽन्यद्विधीयते—इति कुत एव योषितामयज्ञोपवीतिनीनां कर्म्मस्वपि यज्ञोपवीतमित्यदोषः।

कथमेकस्य यज्ञोपवीतस्योभयार्थता? इति चेन्न, अनेकसंयोगात्। नस्मादेकस्योभयार्थता; यद्येक एव संयोगः स्यात। संयोगद्वयन्त्विह दृश्यते। एकस्य यज्ञोपवीतपुरुषसंयोगः—"यज्ञोपवीतं कुरुते" इत्येवमादिशास्त्रेषु। अपरस्य यज्ञोपवीतकर्म्मसंयोगः—

"यज्ञोपवीतिना कृत्यम्" इति। तस्मादिह वाक्यद्वयेन संयोगभेदात् द्व्यर्थाभिधायितैव यज्ञोपवीतस्येति सिद्धम्। अतएव—

"सदोपवीतिना भाव्यं सदा बद्धशिखेन तु।
विशिखो व्युपवीतश्च यत् करोति न तत् कृतम्"।

इति पूर्व्वार्द्धं प्रक्रान्तं—पुरुषार्थमेव यज्ञोपवीतमुत्तरार्द्धं कर्म्मार्थमनुजानानः कात्यायन आचार्य्यस्यैवमेवाशयं स्पष्टयाञ्चकार। स खलु—

"अथातो गोभिलोक्तानामन्येषामपि कर्म्मणाम्।
अस्पष्टानां विधिं सम्यग् दर्शयिष्ये प्रदीपवत्"।

इति प्रतिजज्ञे। अत्राह। उपवीतपदमिदं विशिष्टमेवाभिधत्ते— "उपवीतं यज्ञसूत्रं प्रावृते दक्षिणे करे" इति। नैतदेवं। यज्ञसूत्रमात्राभिधायकत्वादस्य। यज्ञसूत्रमात्रमेव खल्वयमुपवीतशब्दोऽव-
द ... ष्यति, न विशिष्टमन्यत्, सङ्कोचकारणानुपलम्भात्। उपवीतगम-अत्र य ... मात्रमभिधत्ते, विशिष्टमप्यभिधत्ते, न पुनर्विपदन्तावत् "... ज्ञसूत्रं ... वीतं स्यात्" इति, "यज्ञोपवीतं कुरुते" इति शिष्टमेव। "कार्पासमुप ... सगपदं ... पशुसामा[illegible]न्यमभिधत्ते, पशुचैवमादिशास्त्रेभ्यः। यथा ... विशेषमप्यभिधत्ते। तथात्रापि। तत्रैवं सति विशिष्टमेवात्रगमयिष्यत्युपवीतपदं न सामान्यमित्येतस्मिन् सङ्कोचे कारणं नास्ति। तस्माद्युक्तमेतत्। नन्वाचार्य्यपरिभाषैव—("एवं यज्ञोपवीती भवति" इति) कारणमिति चेन्न उपवीतिपरिभाषाऽभावात्। एवं यज्ञोपवीती भवतीति खल्वाचार्य्यः परिबभाषे, न चैवमुपवीती भवतीति। अर्थैक्यमनयोरिति चेत्, तथापि न सङ्कोचे

प्रमाणं भवति। उपवीतिपदमेवमभिधत्ते इति तावत् परिभाषातोऽवगम्यते, तत्र च नविप्रतिपद्यामहे। परन्तत एव सङ्कोच इति प्रमाणं नास्ति। कर्म्मार्था खल्वियं परिभाषा—("एवं यज्ञोपवीती भवति" इति, "एवं प्राचीनावीती भवति" इति च) पुरुषार्थञ्चेदमुपवीतं यज्ञसूत्रमात्रम्,—("सदोपवीतिना भाव्यम्"—इति)। "यज्ञोपवीतं कुरुते" इति, "दाचायणी ब्रह्मसूत्री" इति चैवमादिशास्त्रेभ्य इत्यवोचाम।

अपिच। नैवात्र विशिष्टार्थः सम्भवति—"एवं यज्ञोपवीती भवति" इति। कस्मात्?। वाक्यभेदप्रसङ्गात्। कर्म्मसंयोगः खल्वस्य विधिस्तितः—"यज्ञोपवीतिना कृत्यम्" इति।

तच्चेदपूर्व्वं भवति यज्ञोपवीतं; तदपि विधातव्यं, इति भिद्येत वाक्यम्। न खल्वस्ति विहितं विशिष्टं यज्ञोपवीतं, येनानूद्येत। यदपि विहितम्—"उपवीतं देवानामुपव्ययते"—इति। तदपि दैवकर्म्मस्येव। यदि तदेवेहानूद्येत, परिभाषेयं दैवकर्म्ममात्रपरा स्यात्। न चैवमिष्यते, सर्व्वशेषत्वादस्याः परिभाषायाः—"यज्ञोपवीतिनाचान्तोदकेन कृत्यम्"—इति। अथास्ति यज्ञोपवीतं विन्यासविशेषविशिष्टं पुरुषार्थस्तदिहानूद्यते। उच्यते। नैतदस्ति—विशिष्टं यज्ञोपवीतं पुरुषार्थं इति। कस्मात्?। प्रमाणाभावात्। न खल्वस्ति प्रमाणं विशिष्टं यज्ञोपवीतं पुरुषार्थं इति। यज्ञसूत्रमात्रं पुरुषार्थं इत्यवोचाम। अतएव जैमिनिराचार्य्यः—"अपदेशो वा अर्थस्य विद्यमानत्वात्" इति सूत्रयाञ्चकार। व्याख्यातञ्चैतदाचार्य्येण भवस्वामिना—"अपदेश इतिज्ञायमानस्य वचनं। स एष नविधिः"—

अनुवाद एषः। कुतः?। अर्थस्य विद्यमानत्वात्। प्राप्त एवार्थो यन्निवीतं मनुष्याणां, निवीतं हि मनुष्याः प्रायशः स्वार्थं कुर्व्वन्ति, तस्मात् अनुवादः"—इति। यद्यपि इदं पूर्व्वपक्षकक्षायामेवाशङ्का-सूत्रम्, सिद्धान्ते तु निवीतस्यास्योपवीतस्यार्थतामेव सूत्रया-मास—"अर्थवादो वा प्रकरणात्" इति, "विधिना चैकवाक्यत्वात्" इति च। तथापि नैतावतावस्तुनोऽप्यन्यथात्वं शक्यते वक्तुम्। यद्य-यमर्थ एव नास्यास्यत्—नाशङ्कयताचार्य्योऽर्थस्य विद्यमानत्वादि-ति। न खल्वविद्यमानमपि विद्यमानमुच्यते वादकथायामपि। कः खल्वनुन्मत्तोऽविद्यमानमर्थं विद्यमानतयाभिद्रुवन्निर्दिशति। यदि पूर्व्वपक्ष इति अविद्यमानमपि विद्यमानं कथाचिन्मत्या समाचक्षे, किमित्युत्तरकाले न निराचक्षे—"नायमर्थो विद्यमानः, अविद्यमानः खल्वयमर्थः, कथमुच्यतेऽर्थस्य विद्यमानत्वादिति"। आशङ्कायाः खल्वस्या निराकरणमित्यसूत्रयदाचार्य्यः—"विधि-स्त्वपूर्व्वत्वात् स्यात्" इति। विवृतश्चैतद्भाष्यकारेण—"विधिरेव भवेत्, तथा प्रयोजनवान्, इतरथा वादमात्रमनर्थकं। पूर्व्व-वान् अनुवादो भवति, अयन्त्वपूर्व्वो—यन्नियमेन निधातव्यमिति"। न खल्वविद्यमानत्व निवीतस्य, पुरुषार्थत्वे वा विशिष्टस्योपवी-तस्य, एतन्निराकरणं सम्भवति—नियमेन निवीतं निधातव्यमिति। तदनेनावगम्यते—यज्ञसूत्रमात्र पुरुषार्थो न विन्यासविशेषविशिष्ट-मिति। यदि पुनरविद्यमानमपि विद्यमानमित्युक्त्वाऽशङ्क्यत, तन्निराकरणमित्यमसूत्रयिष्यत—"नाविद्यमाने विद्यमानत्ववच-नात्" इति। यथा भगवान् उपवर्षः—"अर्थापत्तिरप्रमाणमनेका-

मित्तत्वात्"—इत्यस्य निराकरणमित्यमसूत्रयत्—"अनर्थापत्ता-र्थापत्त्यभिमानात्"—इति। यथा वा "वाक्छलमेवोपचार-छलं तदविशेषात्"—इत्यस्य, "न तदर्थान्तर भावात्"—इति। जैमिनिरप्याचार्य्यस्तर्कपादे—"उत्पत्तौ वाऽवचनाः स्युरर्थस्यातन्नि-मित्तत्वात्"—इत्यस्योत्तरमित्यमसूत्रयत्—"तद्भूतानां क्रियार्थेन समाम्नायोऽर्थस्य तन्निमित्तत्वात्"—इति। "निवीतं मनुष्याणां"—इति च श्रुतिर्मनुष्यैः प्रायशः स्वार्थं क्रियमाणं निवीतमनुवदति। तस्मान्न विन्यासविशेषविशिष्टं यज्ञोपवीतमत्रोपवीतशब्दार्थः। आ-चान्तोदकेन कार्य्यमित्यत्र भिद्यते वाक्यमिति चेन्नैष दोषः। "उप-स्पृश्य द्विजो नित्यं शुद्धः पूतो भवेन्नरः"—इति, "त्रिराचामेत्"—इतिचैवमादिशास्त्रविहितस्य पुरुषार्थस्यैवाचमनस्येहानुवादादि-तिनास्त्यनुपपत्तिः।

अपिच—

"त्रिवृदूर्द्धवृतं कार्य्यं तन्तुत्रयमधोवृतम्।
त्रिवृतश्चोपवीतं स्यात्तस्यैकोग्रन्थिरिष्यते।
पृष्ठवंशे च नाभ्याञ्च धृतं यद्विन्दते कटिम्।
तद्धार्य्यमुपवीतं स्यान्नातिलम्बं न चोच्छ्रितम्"।

इत्यभिधाय, "सदोपवीतिना भाव्यम्"—इत्यभिधानात्, यज्ञसूत्र-मात्रमेवास्मिन्नुपवीतपदार्थ इत्यवगम्यते। कस्मात्?। उपक्रमे यज्ञसूत्रमात्रे उपवीतशब्ददर्शनात्;—त्रिवृतश्चोपवीतं स्यादिति, तद्धार्य्यमुपवीतं स्यादिति च। अत्र हि त्रिवृतश्चोपवीतं स्यादिति स्वरूपमुपवीतस्याभिधाय, तद्धार्य्यमुपवीतं स्यादिति च परिमाणं,

सदोपवीतिना भाव्यमिति पुरुषसंयोगमस्य विधत्ते। न खल्वन्यत्र प्राचीनावीतित्वादावन्यत् स्वरूपं परिमाणञ्चास्ति। नचोपवीत-शब्दस्य सामान्यमर्थं परित्यज्य विशेषमर्थं प्रकल्प्य, तदन्यत्र तयो-रेव स्वरूपपरिमाणयोः सांदृष्टिकन्यायेन परिकल्पनायां किञ्चित् प्रयोजनं वैदग्ध्यं वोपलभामहे। येनैष प्रयासः सफलो भवति। अतएव—सदोपवीतिना भाव्यमिति सदा श्रुतिरनुगृह्यते। अन्यथा यदा प्राचीनावीतित्वादिना भाव्यते, तदेयं सदा श्रुतिरुपरुध्येत। न च गोदोहेन चमसस्येव, फलचमसेन सोमस्येवच, नैमित्तिकेन नित्यस्य बाधो न दोषाय इति वाच्यं। वैषम्यात्। न खलु चम-सादौ सदा श्रुतिरस्ति इति विषमोदृष्टान्तः। अन्यथा चोपपत्तेः। अन्यथा चात्रोपपद्यते—यज्ञसूत्रमात्रस्योपवीतशब्दार्थतया। न खल्वविरुद्धं सामान्यमर्थमुत्सृज्य, विरुद्धं विशिष्टमर्थं प्रकल्प्य बाधः कल्पयितुमुचितः! न खल्वविरोधेन सम्भवति वचनार्थे विरोधः कल्पयितुं युक्तः! तस्मात् यथा—"प्रैतुहोतुश्चमसः"—इति होत्रा यत्र चम्यते, तेन पात्रेण होमविधानात्—चमने प्राप्ते सोमस्यैव चमनं कल्प्यते,—पवित्रस्य सोमस्य भक्षणेन पात्रस्यानुच्छिष्टत्वात्तेन होमस्य सम्पत्स्यते; शास्त्रान्तरञ्च न विरोत्स्यते इति। न तु द्रव्यान्तरस्यापि चमनं प्रकल्प्य वचनबलादुच्छिष्टेनापि पात्रेण होम इति शास्त्रान्तरस्य बाधः कल्प्यते। एवमिहापि यज्ञसूत्रमात्रमु-पवीतपदार्थः कल्प्यते,—सदा श्रुतिः शास्त्रान्तरेण न विरोत्स्यते इति। शास्त्रे च यज्ञसूत्रमात्रे यज्ञोपवीतपदं बहुलमुपलभ्यते। चमसादौ त्वगत्या बाधः कल्प्यते। न हि तत्रान्या गतिरस्ति। सदा

बद्धशिखेन इत्यत्रापि शिखायां सत्यां बन्धनं विधीयते इति यत्र शिखाऽण्यते वचनबलात्, न तत्र वैगुण्यम्। शिखा खलु प्रयोक्त्री बन्धनस्य। शिखां बध्नीयादिति हि शास्त्रम्। न खलु निमित्तस्य शिखाया अभावे नैमित्तिकं बन्धनं शक्यते वक्तुम्। न खल्वसती शिखा शक्यते बन्धुम्। यथा "गुर्वनुगमनं कुर्यात्" "स्वाध्यायविरोधिनोऽर्थानुत्सृजेत्" "गाः प्रक्षाल्यमाना अनुमन्त्रयेत" इति सत एव गुरोरनुगमनं, सताञ्च स्वाध्यायविरोधिनामर्थानामुत्सर्गः, सतीषु च प्रक्षाल्यमानासु गोष्वनुमन्त्रणं, विधत्ते—इत्यसति गुरावसत्सु स्वाध्यायविरोधिष्वर्थेष्वसतीषु च प्रक्षाल्यमानासु गोषु, नानुगमनं, नोत्सर्गो, नानुमन्त्रणं, नचावैगुण्यं भवति। यथा वा ब्रीहीनवहन्तीति सतामेव ब्रीहीणामवघातो विधीयते, ब्रीहय एव प्रयोक्तारोऽवघातस्य,—इति प्रैयङ्गवे चरौ नावघाताय ब्रीहय उत्पाद्यन्ते। एवमिहापि। यथा खल्ववघातः श्रुत्या ब्रीह्यर्थः प्रणाल्या च यागार्थस्तथाबन्धनमपि श्रुत्या शिखार्थं वाक्ये न च पुरुषार्थमित्यदोषः। विशिखोव्युपवीतश्च इति शिखाऽभावेपि वैगुण्यं दर्शयति इति चेत्। कामं दर्शयतु वैगुण्यं, न तु सदा बद्धशिखेनेति सदा श्रुतिरुपरुध्यते, सत्यां शिखायां सदा बन्धनसम्बन्धात्। अपि च। नैतत् शिखाऽभावे वैगुण्यं दर्शयति। कस्मात्?। वाक्यभेदप्रसङ्गात्। कथं?। विहितन्तावत् शिखाबन्धनं—सदा बद्धशिखेन—इति। शिखाऽभावेपि चेत् वैगुण्यं,—शिखापि विधातव्येति भिद्येत वाक्यम्। पूर्व्वशेषत्वाच्चोत्तरस्य। पूर्व्वार्द्धशेषतया खल्विदोत्तरार्द्धमाम्नायते—पूर्व्वार्द्धविहितस्य शिखाबन्धनस्य कर्म्मसंयोग इहो-

च्यते—इति कथं शिखाऽभावेपि वैगुण्यमुच्येत! एवं हि उपक्रमोपसंहारयोर्भिन्नार्थतया द्वयमप्यनर्थकमापद्येत! तस्मादुपक्रमानुरोधाद्वा उपसंहारो नेतव्यः—उपसंहारानुरोधाद्वा उपक्रम इत्यवश्यं वक्तव्यम्। तत्र च—"मुख्यं वा पूर्व्वं चोदनात् लोकवत्"—इति न्यायादुपक्रम एवानुग्रहीतव्यः, नोपसंहार इति विशिखो विशिखाबन्धन इति लक्षणया कल्प्यते। यथा—"प्रजापतिर्वरुणायाश्वमनयत्"—इत्युपक्रमवशेन—"योऽश्वं प्रतिगृह्णाति"—इत्युपसंहारो नीतः—योऽश्वं प्रतिग्राहयति—प्रयच्छतीति। एवमिहापीत्यदोषः। अपिच। पूर्व्वार्द्धविहितं शिखाबन्धनमुपवीतञ्च व्यतिरेकनिन्दया स्तौतीदमुत्तरार्द्धमिति सुव्यक्तमुपक्रमानुगतत्वमेतस्य। "नहि निन्दानिन्द्यं निन्दितुं प्रयुज्यते, अपितु निन्दितादितरत् प्रशंसितुम्"—इति हि न्यायः। यदि चोपसंहारानुरोधादुपक्रमोऽत्र नीयेत,—बद्धशिखेनेति, सशिखेनेत्यर्थः स्यात्। तर्हि बद्धपदं प्रमादपाठः स्यात्। नचैतदुचितम्। अपिचैवमबन्धनेप्यवैगुण्यं स्यात्। शिखाबन्धनस्य पुरुषार्थत्वे शिखामात्रस्य कर्म्मार्थत्वेप्येवमेव दोषप्रसङ्गः। तस्मादगत्या विशिख इतिलक्षणया विशिखाबन्धन इत्यर्थः कल्प्यते। एवमुपक्रमोऽनुग्रहीष्यते इति। लक्षणापि हि लौकिकी।

एतेन, यदुक्तं परिशिष्टप्रकाशकृता—"विशिखइत्यनेन चासत्यामपि शिखायां शिखाबन्धाभावे कर्म्मवैगुण्यं, न तु सत्यामेवेत्युक्तं"—इति, तदयुक्तं वेदितव्यम्। अवश्यञ्च तेनापि शिखाबन्धनस्यैव पुरुषार्थस्य कर्म्मार्थत्वमभ्युपगम्यते, शिखाबन्धाभावे इत्यभिधानात्। न चासत्यां शिखायां पुरुषार्थं बन्धनमस्ति। येन तद-

नूध कर्म्मार्थत्वमस्य विधायिष्यते। अतएव सम्वर्त्तस्मरणम्।

"अकृत्वा पादशौचन्तु तिष्ठन्मुक्तशिखोऽपि वा।

विना यज्ञोपवीतेन आचान्तोप्यशुचिर्भवेत्"।

अपि चैवं व्युपवीत इत्यनेनापि योषितामन्येषाञ्च व्युपवीतानां कर्म्मवैगुण्यं आपद्येत! न चैवमिष्यते। तस्मान्न किञ्चिदेतत्। यदि चानायत्या तत्रोपरुध्येतापि सदावस्थानं, तर्ह्यन्यत्रापि (सम्भवन्त्यामपि गतौ) तदुपरोद्धव्यमिति न किञ्चिन्नियामकमस्ति। तस्मान्न किञ्चिदेतत्। अस्यैव च सूत्रस्य खल्वयं परिशेषः—सदोपवीतिना भाव्यम्—इत्येवमादिः। तदनेन कुत एव विशिष्टमभिधीयेत! न खल्वियं परिभाषा दैवकर्म्ममात्रपरा, गृह्यकर्म्ममात्रपरत्वात्—इति पितृयज्ञादावस्याभावाद्वैगुण्यं वाऽऽपद्येत बाधा वा अवकल्प्येत! तदुभयमप्यनुचितम्। सेयं यज्ञोपवीतश्रुतिर्यज्ञसूत्रमात्रं परामृशति, "दाक्षायणी ब्रह्मसूत्री" इत्येवमादिशास्त्रेभ्यः। तस्मात्,—"एवं यज्ञोपवीती भवति" इति, "एवं प्राचीनावीती भवति" इति चैवमादिकायां सर्व्वस्यामेवावस्थायां यज्ञोपवीतमस्यास्तीति यज्ञोपवीती भवति, इत्यनवद्यम्।

"यज्ञोपवीते द्वे धार्य्ये श्रौतस्मार्त्तेषु कर्म्मसु।

तृतीयञ्चोत्तरीयार्थे वस्त्रालाभे तदिष्यते"।

इति च स्मृत्यन्तरं यज्ञसूत्रमात्रस्य कर्म्मार्थतामाह। कस्मात्?। श्रौतस्मार्त्तेषु सर्व्वेष्वेव कर्म्मसु यज्ञोपवीतद्वयधारणाभिधानात्। उत्तरार्द्धे च सर्व्वकर्म्मशेषभूतस्योत्तरीयस्य समाम्नानात्। तदिदं यज्ञसूत्रद्वयमुत्तरीयञ्च खल्विह कर्म्ममात्रशेषतया विधित्सितं,

विन्यासविशेषस्तु—उत्तरीयस्येव यज्ञसूत्रस्यापि तत्र तत्र तत्तद्वाक्यादवगन्तव्य इत्यभिप्रायः। अतएव—

"प्राचीनावीतिना सम्यगपसव्यमतन्द्रिणा।

पित्र्यमानिधनात् कार्य्यं विधिवद्दर्भपाणिना"।

इति कर्म्माङ्गतया प्राप्तं यज्ञसूत्रमनूद्य, तदीयविन्यासविशेषस्य-(प्राचीनावीतित्वस्य) विधिरुपपद्यते। अन्यथा विशिष्टस्य यज्ञोपवीतस्य कर्म्मार्थत्वे तस्य च शास्त्रान्तरबलात् दैवकृत्यमात्रपरतया पित्र्ये कर्म्मण्यपूर्व्वं विन्यासविशेषविशिष्टं यज्ञोपवीतं विधित्सितं भवति—इति भिद्येत वाक्यम्। भिन्नौ खल्विमावर्थौ—यत्रापूर्व्वं विन्यासविशेषविशिष्टं यज्ञोपवीतं, यत्रास्य कर्म्मसंयोग इति। "यज्ञोपवीतं त्रिपुष्करं ब्रह्मसूत्रमित्यर्थः। तदस्यास्तीति यज्ञोपवीती" इति च भट्टभाष्यम्।

किमिदं यज्ञोपवीतं? कथञ्चाचान्तोदको भवति? इत्येतत् सर्व्वमाचार्य्य एवानुपदं व्युत्पादयिष्यति। अत्र चाचार्य्यानुक्ता अन्येऽपि कर्त्तृधर्म्माः परिशिष्टकृतः कात्यायनस्य वचनादवगन्तव्याः।

"यत्र दिङ्नियमो न स्याज्जपहोमादिकर्म्मसु।

तिस्रस्तत्र दिशो ज्ञेयाः प्राचीसौम्यापराजिताः।

तिष्ठन्नासीनः प्रह्वो वा नियमो यत्र नेदृशः।

तदासीनेन कर्त्तव्यं न प्रह्वेण न तिष्ठता"।

इत्येवमादयः। एवमन्येऽप्यनुसन्धेयाः शास्त्रान्तरेषु॥ * ॥ २ ॥ * ॥

इदानीं कर्म्माङ्गानि वक्तव्यानि। तत्रासाधारणत्वादादौ तावत् कालमेव कर्म्मसाधनं परिभाषते।—

उदगयने पूर्व्वपक्षे पुण्येऽहनि प्रागावर्त्तनादह्नः कालं विद्यात्॥ २॥

उत्तरस्यां सवितुरयनसम्बन्धात् उदगयनं प्रसिद्धं ज्योतिःशास्त्रेषु। तस्मिन्नुदगयने। पूर्व्वपक्षे,—"तत्र पक्षावुभौ मासे शुक्लकृष्णौ क्रमेण च" इत्यादि स्मरणात्, शुक्लपक्षे। पुण्ये, शोभने विष्ट्यादिदोषरहिते यथोक्ते, अहनि दिवसे,—(तदनेन रात्रिं नानुजानात्याचार्य्य इत्यवगम्यते)। अह्नो वासरस्य, आवर्त्तनात्—छायायाः परिवर्त्तनात् प्राक् पूर्व्वं पूर्व्वाह्ण इत्येतत्। कालं विद्यात्, जानीयात्। गृह्यकर्म्मणामिति सम्बध्यते। स्मरन्ति च—

"आवर्त्तनात्तु पूर्व्वाह्णोऽपराह्णस्ततः परम्"।

इति।

"अश्वत्थं वन्दयेन्नित्यं पूर्व्वाह्णे प्रहरद्वये"।

इति च। न च पूर्व्वाह्ण इत्येव वक्तुमुचितं, अलं ग्रन्थगौरवेणेति वाच्यं। स्वतन्त्रेच्छस्य नियन्तुमशक्यत्वात्। "पूर्व्वाह्णो वै देवानां मध्यन्दिनं मनुष्याणामपराह्णः पितृणाम्" इति श्रुत्युक्तत्रिधाविभक्तदिनप्रथमभागात्मकपूर्व्वाह्णव्यवच्छेदकत्वाच्चेति। यत्तु श्राद्धपूर्व्वकत्वात् कर्म्मणः श्राद्धस्य चोदयसन्निधौ प्रतिषेधात्तथाऽभिधानमिति भट्टभाष्यम्। तच्चिन्त्यम्। उदयसन्निधौ श्राद्धप्रतिषेधेऽपि कर्म्मणः कालपरिभाषायां पूर्व्वाह्णाभिधाने बाधकाभावात्। न खलु पूर्व्वाह्णाभिधानं यथोक्ताभिधानं वा तत्र किमपि विलक्षणमुपलभामहे इति धीमद्भिरनुचिन्तनीयम्।

विसमासकरणमेकैकस्यानुगुण्यद्योतनार्थं, समुदितोपलब्धौ महानभ्युदय इति व्याख्यातारः। अतो न कालविशेषनियतेषु गर्भाधानादिष्वनुपपत्तिः। एकैकानुगुण्यस्य तत्रापि सुलभत्वात्। यद्यप्योदगयनादीनां कर्म्माङ्गतैव परमनुज्ञायते, न तु दक्षिणायनादीनामदनङ्गतापि, वाक्यभेदप्रसङ्गात्। तथाप्युपनयनादौ दक्षिणायनादेरनङ्गतापि प्रत्येतव्या, स्मृत्यन्तरसंवादात्। तथैव खलु विहितेतरस्यापि वासरादेर्विवाहाद्यङ्गतेति। स्मर्य्यते च—

"रात्रिभागः समाख्यातः स्वरांशोर्दक्षिणायनम्।
व्रतबन्धादिकं तस्माच्चूडाकर्म्म च वर्ज्जयेत्" ॥

इति—

"निषिद्धं निशि च व्रतम्"—इति चैवमादि।

"सर्व्वकालमेके विवाहम्"-इति च गृह्यान्तरम्, ज्योतिःशास्त्रमपि—

"न सकल-गुण-सम्पल्लभ्यतेऽल्पैरहोभि-
र्बहुतर-गुण-युक्तं योजयेन्मङ्गलेषु।
प्रभवति नहि दोषो भूरिभावे गुणानां
सलिल-लव इवाग्नेः सम्प्रदीप्तेन्धनस्य।

इति।

"कष्टाभीष्टे तुल्यसङ्ख्ये फले चेत्
स्यातां; नाशः फलयोस्तत्र वाच्यः।
वाच्या पक्तिर्योऽतिरिक्तस्तयोः स्यात्
सर्व्वस्थाने कल्पनैवं प्रदिष्टा"।

इति चैवमादि ॥ २ ॥ * ॥

एवन्तर्हि उदगयनाद्यभावे शास्त्रबलादप्यनुष्ठीयमानस्य पिण्डपितृयज्ञादेर्वैगुण्यं स्यादित्यत आह।—

यथादेशञ्च ॥ ४ ॥

आदिश्यते इत्यादेशस्तस्यातिक्रमाभावोयथादेशम्। यथाचादेशः शास्त्रस्य, तथा च कालं विद्यादित्यनुवर्त्तते। शास्त्रमेवं खल्वेवम्विधेष्वर्थेषु नः प्रमाणं, यथाचादिशति शास्त्रं तथा च प्रमेयं प्रमिमीमहे, आदिशति च शास्त्रं किञ्चित् कर्म्मोदगयनाद्यभावेपीति तत्रानङ्गतैवामीषामङ्गता च यथोक्तानामित्यभिप्रायः। तदिदं "पदार्थान्तरस्याकाङ्क्षविशेषमपहाय तदितरत्र सामान्यमन्वेति" इति न्यायमूलमपि सूत्रं सुखप्रतिपिपादयिषया कारुणिक आचार्य्यः प्रणिनाय—शिष्यानमुष्मैरन्निति।

अथवा। पुनरपीदं सूत्रयन्नाचार्य्योयथादिष्टस्य कालस्य कर्म्मणादरातिशयं दर्शयति। तथाच सत्यामपि "यथा शक्नुयात् तथा कुर्य्यात्" इति श्रुतौ,सत्यपि च "अपि वाप्येकदेशे स्यात् प्रधाने ह्यर्थनिर्वृत्तिर्गुणमात्रमितरत्तदर्थत्वात्" इति सिद्धान्ते, नित्यानामपि कर्म्मणामादिष्टकालव्यतिक्रमेण नानुष्ठानम्। अतएव स्मर्य्यते।

"अकाले चेत् कृतं कर्म्म काले तस्य पुनःक्रिया।
कालातीतन्तु यत् कुर्य्यादकृतं तद्विनिर्दिशेत्"।

इति।

"अङ्गलोपे च कालस्य न त्यागोऽन्याङ्गवत् कृतः।
अनुपादेयरूपत्वात् काले कर्म्म विधीयते"।

इति चाभियुक्तानां वचनम्। केषाञ्चित्तु सायंप्रातर्होमादीनामादिष्टेपि कालान्तरे प्रायश्चित्तं कृत्वैवानुष्ठानं भवति।

"आसायमाहुतेः कालात् कालः स्यात् प्रातराहुतेः"।

इति।

"गौणेषु तेषु कालेषु कर्म्म चोदितमारभेत्।
प्रायश्चित्तप्रकरणप्रोक्तां निष्कृतिमाचरेत्"।

इति चैवमादिस्मरणात्। येषान्तु कालोनाङ्गमपि तु निमित्तमात्रमितिदर्शनम्। तेषामयमपि पक्षोन्यायावगतएव सूत्रेणोच्यते। न खल्वन्तरेण निमित्तं नैमित्तिकानामात्मलाभः सम्भवति ॥ ४ ॥

कर्म्मकालमभिधायेदानीमनुष्ठेयानि कर्म्माङ्गान्याह द्वाभ्याम्।—

सर्व्वाण्येवान्वाहार्य्यवन्ति ॥ ५ ॥

अनु, पश्चादाह्रियते यस्मात् प्रकृतं कर्म्म इति, अनु, पश्चादाह्रियते यत् प्रस्तुतात् कर्म्मण इति चान्वाहार्य्यं नान्दीमुखश्राद्धं दक्षिणा चोच्यते। अतएव गृह्यान्तरम्।

"यत् श्राद्धं कर्म्मणामादौ याचान्ते दक्षिणा भवेत्।
अमावास्यां द्वितीयं यदन्वाहार्य्यं तदुच्यते"।

इति। तदयमर्थः। सर्व्वाण्येव प्रकृतत्वात् "गृह्याकर्म्माणि" इति सम्बध्यते। "सर्व्वाण्येव वक्ष्यमाणानि कर्म्माणि" इति चैकादशीतत्त्वे। अन्वाहार्य्यवन्ति, अन्वाहार्य्यमुक्तं तद्विद्यते येषां तानीमान्यन्वाहार्य्यवन्ति, भवन्तीति वाक्यशेषः, विद्यादिति वा वर्त्तते। एव

शब्दस्यावधारणार्थः। सर्व्वाणि गृह्यकर्म्माण्यन्वाहार्य्यवन्त्येवेत्यवधि-यते। न त्वन्यत्रान्वाहार्य्यं निषिध्यते। अतो गृह्यानुक्तेष्वप्यन्न-प्राशनादिषु शास्त्रान्तरात् श्राद्धं दक्षिणा च न विरुध्यते। तथा श्रौतेष्वपि ज्योतिष्टोमादिषु। सर्व्वाण्येव गृह्यकर्म्माणि शाखान्तरी-याण्यपि अन्वाहार्य्यवन्ति इति वाऽर्थः। अथवा। सर्व्वाण्येव—आधान सायंप्रातर्होमादीनि, न तु कानिचिदेव विवाहप्रभृतीनि—(येषु स्मृत्यन्तरेण साक्षादन्वाहार्य्यं विहितम्)—गृह्यकर्म्माणि इति यथाश्रुत एवार्थः। "अनेकस्याशेषता सर्व्वशब्दार्थः"—इति हि ता-न्त्रिका मन्यन्ते। किमर्थमिदम्?—इति चेत्, अनेकस्याशेषतावग-तये, इति गृहाण। यथा,—"सर्व्वाणि ह वा इमानि भूतान्या-काशादेव समुत्पद्यन्ते"—इत्यस्यां श्रुतौ इमानीति सत्याम्यपि सर्व्वाणीत्याम्नातम्। यथा वा,—"खादिरपालाशालाभे, विभीतक, तिल्वक, वाधक, नीव, निम्ब, राजवृक्ष, शाल्मल्यरलु, दधित्थ, कोविदार, श्लेष्मातक, वर्ज्जं सर्व्ववनस्पतीनामिध्मो यथार्थं स्यात्"—इत्यत्र सर्व्ववनस्पतीनामित्युक्तम्। एवमिहापीत्यदोषः। "आर्षेयं वृणीते, एकं वृणीते, द्वौ वृणीते, त्रीन् वृणीते, न चतुरो वृणीते, न पञ्चातिवृणीते," इत्यत्र—न चतुरो वृणीते न पञ्चातिवृणीते, इतिवन्नित्यानुवादो वा भविष्यति—सर्व्वाण्येवेति। वाक्यगौरवम्?—इति चेन्नाल्पत्वात्। इति चेद्भवान् पश्यति,—सर्व्ववचनेन वाक्य-गौरवमापद्यते इति। तदुच्यते। नैष दोषः। अल्पत्वात् वाक्यस्य। यस्मादेवमपि अल्पमेवेदं वाक्यं भवति,—सर्व्वाण्येवान्वाहार्य्यव-न्ति—इति। यद्येवं—किमतो भवति?। एतदतो भवति,—

सर्व्वकर्म्मशेषभूतस्य आज्यस्य दक्षिणायास्तल्लघीयसा सूत्रेणाभि-धानात् परं वाक्यलाघवं मन्यमानः खल्वयमाचार्य्योऽन्यद्वाक्य-लाघवमनाद्रियमाणः सर्व्वाणीत्याह। यथा भगवानक्षपादः— "अथ तत् पूर्व्वकमनुमानं तत् त्रिविधं पूर्व्ववत् शेषवत् सामा-न्यतो दृष्टञ्च" इति, 'तत् त्रिविधम्'—इति सूत्रयाञ्चकार। तदुक्तं भगवता वात्स्यायनेन न्यायभाष्ये—"विभागवचनादेतत् त्रिविधमिति सिद्धे त्रिविधवचनं, महतोमहाविषयस्य न्यायस्य लघीयसा सूत्रेणोपदेशात् परं वाक्यलाघवं मन्यमानस्यान्यस्मिन् वाक्यलाघवेऽनादरः"—इति। विध्युद्देशेनापि स्तूयते इति च नये, सर्व्वशब्दोयमन्वाहार्य्यस्तुत्यर्थोऽपि भवति। कथम्?। इत्थं नामेदमन्वाहार्य्यं यदनेन सर्व्वाण्येव गृह्यकर्म्माणि—महान्त्यपि उपकृतानि भवन्तीति।

सर्व्वशब्दः श्रौतानामप्युपग्रहार्थः—इति भट्टभाष्यम्। नैतद्-वम्। अथातो गृह्याकर्म्माण्युपदेक्ष्याम इति प्रतिज्ञायैतत् सूत्रनात्। अन्यशास्त्रपरिभाषायाश्चान्यत्रानुपयोगात्। श्रौतसामान्येष्वेव चा-विशेषेण प्रसङ्गात्। न च सर्व्वशब्दोपि शक्नोति श्रौतमर्थमभिवदि-तुम्! कस्मात्?। "सर्व्वत्वमाधिकारिकम्"—इति सिद्धान्तविरोधात्। गृह्यस्मृतिः खल्वियमाचार्य्येणारब्धेत्येतन्न प्रस्मर्त्तव्यम्। सोयं सर्व्वशब्दः सर्व्वं ...वावगमयति, न जातुचिदन्यद्वैदिकं लौकिकं वा किञ्चिदिति। अनर्थकं सर्व्ववचनमिति चेत्,—काममनर्थकं भवतु, न तु शक्नोत्यन्यदभिधातुम्। "आचार्य्यस्यार्थे वक्तुं प्रभवामो नाचार्य्यं पर्य्यनुयोक्तुम्"—इति हि पदवाक्यप्रमाणकुशलानां स-

मयः। तस्मात्—"पूर्णाहुत्या सर्व्वान् कामानाप्नोति" इति वदाधिकारिकमेव सर्व्ववचनम्।

अनन्तर सूत्राम्नितानामेव गृह्यकर्म्मणामयमन्वाहार्य्यविधिर्न सर्व्वेषामित्यपि कदाचिद्भवत्याशङ्का कस्यचिन्मन्दमतेरिति सा माभूदिति वा सर्व्वाण्येवेति वचनम्। परमार्थतस्तु नास्तीयं शङ्का। कस्मात्?। गृह्यकर्म्मणां प्रतिज्ञानात्, तेषाञ्चोच्चावचानामेकेन सूत्रेणासम्भवात् सूत्रद्वयेन कालविधानात्, अन्वाहार्य्यस्य परस्य चैकैकेनैव सूत्रेण विधानसम्भवात्। तथा चोक्तम्। "आनन्तर्य्यमचोदना"—इति। अनन्तरस्य च सूत्रस्य निरुक्तकालादरार्थतया पर्य्यवसानात्। मन्दमतिबोधनार्थमप्याचार्य्याणां किञ्चित् सूत्रितमुपलभ्यते—"स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात्"—इत्येवमादिकम्।

अपिच न वयमेतद्विचारयामः—सर्व्ववचनं कर्त्तव्यं, न वा कर्त्तव्यमिति। किन्तर्हि?—कृते सर्व्ववचने किमतः प्रतिपत्तव्यम्;—सर्व्वाणि श्रौतानि, उत, सर्व्वाणि गृह्यकर्म्माण्येवेति। तच्च सर्वाणि गृह्यकर्म्माण्येव—इति व्यवस्थापितम्। अन्यच्च पुरस्तादुक्तम्। न च वाक्यमिदं प्रकरणाद्बलवद्भविष्यति—इति वाच्यम्। यतो न खल्वत्र किमप्यस्ति प्रकरणं यस्माद् वाक्यं बलवद्भविष्यतीति मन्यसे। "कर्त्तव्यस्येतिकर्त्तव्यताकाङ्क्षस्य वचनं प्रकरणं, प्रारम्भो हि स तस्या वचनक्रियायाः, स एव विध्यादिर्विध्यन्तापेक्षः"—इति खल्वाहुः प्रकरणलक्षणमाचार्य्याः शवरस्वामिनः पूर्व्वस्यां मीमांसायाम्। न चेह किञ्चित् कर्त्तव्यं विहितम्।

न चाविदितं नामाकाङ्क्षति कश्चिदिति कर्त्तव्यताम्। विधौ ख-
ल्वियमाकाङ्क्षा भवति। तत्र हि कर्त्तव्यतया चोदनाऽवगम्यते।
"यत्र हि कर्त्तव्यतया चोदना—इति गम्यते; तत्र इतिकर्त्तव्य-
ता आकाङ्क्ष्यते"—इति हि तन्त्रस्थितिः। प्रतिज्ञैव खल्वियमाचा-
र्य्यस्य—"अथातो गृह्याकर्म्माण्युपदेक्ष्यामः"—इति। न च वाक्य-
मपि साधारणं, सर्व्वत्रस्याधिकारिकत्वादित्यवोचाम।

अपिच। सर्व्वाणीति तावद्विशेषणम्। न चात्र किञ्चिद्विशे-
ष्यमुच्यते। भवितव्यन्तु तेन। अन्यथा विशेष्यसाकाङ्क्षं खल्विदं
वाक्यमपर्य्यवसित मेव स्यात्। तस्मादस्य निराकाङ्क्षप्रतिपत्तये—
गृह्याकर्म्माणीत्यनुषज्यते। तदिदं सर्वाणि गृह्याकर्म्माणीत्येवं पर्य्य-
वस्यति। न खल्वेवं पर्य्यवसितं सद्वाक्यं गृह्यकर्म्मणामन्यद्विषयी-
करोति—येन वाक्यमिदं प्रकरणाद्बलवदिति कथयसि! स खल्व-
यमस्थान एवोपालम्भो—वाक्यमिदं प्रकरणाद्बलवद्भविष्यति—इति।

आह। व्यपेतत्वान्नास्त्यनुषङ्गो गृह्याकर्म्माणीति। नैतदेवम्।
वाक्यस्यास्य साकाङ्क्षत्वात्, वाक्यशेषस्य चान्यस्यानुपलम्भात्, गृह्या-
कर्म्माणीत्यस्य च वाक्यशेषीभवितुं योग्यत्वात्। उपक्रमश्चैवमनु-
गृहीतो भवति। इतरथाऽत्र सम्भवन्नप्ययमर्थोऽन्यत्रापि नीयेत।
कल्पयितव्येपि कस्मिंश्चिद्वाक्यशेषे—गृह्यकर्म्माणि इत्येतदेव कल्प-
यितुमुचितम्। कस्मात्?। उपक्रमानुग्रहात्। "प्रकृतप्रत्ययश्च
न्याय्यः"—इति हि तन्त्रयुक्तिः।

अपिच। न खलु व्यपेतमनुषज्यते—गृह्यकर्म्माणीति। कस्मात्?।
प्रतिसूत्रं तत् सम्बन्धावगमादनुषङ्गसंस्कारत्वात्। प्रतिसूत्रं खल्व-

न्नीयते गृह्यकर्म, तत्र तत्र यथायथं विपरिणाम एव परं वि-शेषः। न चैतावता किञ्चित् हीयते। बुद्ध्यारोढमेव खल्वस्माकं गृह्यकर्म। तस्मादनुपसंस्कारत्वादिहापि तदेव संबन्धुमर्हति। अथातो गृह्याकर्माण्युपदेक्ष्यामः,—इति च प्रतिज्ञानात्। प्रतिज्ञा खल्वियमिदमर्थैवाचार्य्यस्य—यद् वक्ष्यमाणाः सर्व्वाः परिभाषा गृह्यकर्म्म परा भवेयुरिति। यदि च—भिन्नविभक्तिवचनतया निर्द्देशादनन्तरेष्वपि योगेषु गृह्यकर्म्म नानुषज्येत,—नानुषज्येत चा-चापि व्यपेतत्वात्। तथापि निराकाङ्क्षत्वप्रतिपत्तये वचनानामव-श्यमेषु वाक्यशेषः कल्पयितव्यो भवति,—इति गृह्यकर्म्मैव वाक्य-शेषतया कल्पयितुमुचितम्। आचार्य्यप्रतिज्ञानात् खल्वागतमेव हृदयं—तत्,—न युज्यते विनाकारणमुत्स्रष्टुम्। कल्पयितव्ये हि कस्मिंश्चित्, कस्यचिन्निराकाङ्क्षप्रतिपत्तये, बुद्ध्यारोढमेव तावत् कल्पयितुमुचितं—तेन चेन्निराकाङ्क्षं क्रियते। स्मृतस्योपेक्षा-नर्हत्वात्।

दृश्यते खल्वाचार्य्याणामेवमपि सम्बन्धोऽनुमतः प्रस्तुतेन प-दार्थेन सूत्रेषु—"अभ्युपेत्यकालभेदे दोषवचनात्" इति, "अनुक्त-दोपपत्तेश्च" इति चैवमादिषु। अतएव व्याख्यातं भगवता वात्स्या-यनेन, "न व्याघातो हवने इत्यनुवर्त्तते"—इति पूर्व्वस्मिन्, "पुनरुक्तदोषोऽभ्यासे नेतिप्रकृतम्"—इति चोत्तरस्मिन् सूत्रे। "तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्यः" "न कर्म्मकर्तृसाधनवैगु-ण्यात्" "अभ्युपेत्यकालभेदे दोषवचनात्" "अनुवादोपपत्तेश्च" इति न्यायचरणानि सूत्राणि। तस्मात् यथा "सत्यप्रयोगे पुरुष-

चेन्द्रियाणां बुद्धिजन्म तत् प्रत्यक्षमनिमित्तं"—इति धर्म्म एवानिमित्तमिति कल्पते—"आसनं वा सर्व्वत्रैवमूतः" इति च स्वयास्तोक्त एव व्यवतिष्ठते। एवमिहापि सर्व्वाणि गृह्यकर्म्माणि इत्येवार्थः सम्पद्यते।

न खलु श्रौतानीत्यस्य वाक्यशेषतायां किञ्चित् प्रमाणमस्ति। न खल्वेवं गृह्यकर्म्मस्वन्वाहार्य्यं प्राप्नोति। न चैवमाचार्य्यस्य सम्यग्वादित्वं भवति। स खल्वेवमन्यत् प्रतिजानानोऽन्यथाभिदधानः प्रेक्षावद्भिरुन्मत्तवदुपेक्ष्येत! न चैवं सति कात्यायनस्य वचनानि—गृह्यकर्म्मविशेषेष्वेव श्राद्धनिषेधकानि—

"नाष्टकासु भवेत् श्राद्धं न श्राद्धे श्राद्धमिष्यते।
न सोष्यन्तीजातकर्म्म प्रोषितागतकर्म्मसु"।

इत्येवमादीन्युपपद्यन्ते। नापिकर्म्मसामान्यमेव वाक्यशेषतया कल्पयितुं शक्यते। कस्मात्?। सन्ध्यास्नानदानादिषु, लौकिकेषु चाविशेषेणप्रसङ्गात्।

तदेवं सिद्धे गृह्यकर्म्मभिः सम्बन्धेऽस्य वाक्यस्य, सर्वशब्दश्चेत् श्रौतसंग्रहार्थं कल्पयसि—भेत्स्यसि तर्हि वाक्यम्!—कल्पयिष्यसि चान्यद्विशेष्यं सर्वाणीत्यस्य निराकाङ्क्षप्रतिपत्तये। कथम्?। गृह्यकर्म्माण्यन्वाहार्य्यवन्ति, सर्वाणि श्रौतान्यन्वाहार्य्यवन्ति,—इति वचनव्यक्तिभेदात्। तस्मादस्मदुक्त एवार्थो धीमद्भिर्यत्न आस्थेयः। तदिदं श्राद्धं मातृपूजादिपूर्व्वकमेव भवति। कस्मात्?

"अनिष्ट्वा तु पितॄन् श्राद्धैः कर्म्म कुर्य्यात्र वैदिकम्।
तत्रापि मातरः पूर्व्वं पूजनीयाः प्रयत्नतः"।

इत्येवमादिकर्मप्रदीपदर्शनात्। अत्र प्रत्यवस्थीयते। नन्विदमेव कात्यायनवचनं वैदिकेषु श्राद्धं दर्शयति?। अत्रोच्यते। यदि नामेदं वचनं वैदिकेषु श्राद्धं दर्शयति, तत् किमस्माकमपचीयते?। न खल्ववैदिकानि गृह्यकर्माणि आचार्य्यः समुपदिदेश। ननु न ब्रूमोऽवैदिकानि गृह्यकर्माण्याचार्य्यः समुपदिदेश—इति। सत्यं वैदिकान्येवैतानि गृह्यकर्माणि। परमेभ्योऽप्यन्यानि सन्ति वैदिकानि कर्माणि?। सन्तु नाम, किमतो भविष्यति?। यद्येवम्, एतदतो भविष्यति,—सर्वशब्दस्य सामान्यार्थतामनेन वचनेन कात्यायनः स्पष्टयाञ्चकार—इति। उच्यते। नैतावताभिप्रेण वैदिकसामान्यपरता सर्वशब्दस्य शक्यतेऽध्यवसातुम्। कस्मात्?। क्रमपरत्वाद्वचनस्य। कात्यायनवचनं खल्विदमनूद्य श्राद्धं, वैदिकस्य कर्म्म, क्रममनयोर्विधत्ते, न वैदिकेषु श्राद्धम्। कस्मादवगम्यते?। साचादेव समाम्नानात्। पितॄन् श्राद्धैरनिष्ट्वा वैदिकं कर्म न कुर्य्यात्—इति श्राद्धं सिद्धवदनूद्य वैदिकस्य, क्रममात्रमेव साचादिह समाम्नायते। तत्रैवं सति यथा प्राप्तमेवानूद्यते इति न किञ्चिदनुचितम्। अन्यैव वचनव्यक्तिराचार्य्यस्य—सर्वाणि श्राद्धवन्तीति। अन्यैव च वचनव्यक्तिः कात्यायनस्य—श्राद्धैः पितॄनिष्ट्वा वैदिकं कुर्य्यादिति। तदत्र विधीयते श्राद्धमेकस्याम्, अनूद्य च तत्, *क्रममात्रमन्यस्याम्। दर्शितश्चास्माभिरन्यथा वैदिकसामान्येषु श्राद्धप्रसक्तिरिति, तदपि न प्रस्मर्त्तव्यम्। वैदिकपदस्य साचात् श्रुत्युक्तकर्मपरतायामपि प्राचीन एव दोषः परावर्त्तते इत्यास्तां विस्तरः। श्राद्धस्येदं केषुचित् प्रथमप्रयोग एव, केषुचित्

प्रतिप्रयोगमेव, केचुचित्तु नैव कर्त्तव्यमित्याचक्षते। तदेतत् सर्व्वं परिशिष्टकृतः कात्यायनस्य वचनादवगन्तव्यम्। ग्रन्थगौरवभिया परमुपरम्यतेऽस्माभिः ॥ ५ ॥ * ॥

अपवर्गेऽभिरूपभोजनं यथाशक्ति ॥ ६ ॥

क्रियायाः परिसमाप्तिरपवर्ग इत्युच्यते। तस्मिन्नपवर्गे। अभिरूपो विद्वान् कृतबुद्धिरनुष्ठाता चेत्याहुः। तदस्याभिरूपस्याभिरूपयोरभिरूपाणां वा, भोजनमशनं, यथाशक्ति; यथा शक्यते तथैव न पुनर्वित्तशाठ्येनेत्येतत्। कारयितव्यमिति वाक्यशेषः। गृह्यकर्म्मसु विद्यादिति वा सम्बध्यते। यथा शक्यते, तथाऽभिरूपभोजनं गृह्यकर्म्मणामङ्गं जानीयादिति तत्रार्थः। यथाशक्तीति सूचयन्नाचार्य्यः शक्त्यपेक्षयाऽभिरूपभोजनं कर्म्माङ्गमिति दर्शयति। तेन सत्यामपि शक्तौ यत्राभिरूपस्य भोजनं—तत्र वैगुण्यमवगम्यते। स्मरति च भगवान् मनुः—

"प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्त्तते।
न साम्परायिकं तस्य दुर्मतेर्विद्यते फलम्"।

इति ॥ ६ ॥ * ॥

सेयं परिभाषिता सर्व्वकर्म्मसाधारणी परिभाषा। इदानीं तानि कर्म्माणि वक्तव्यानि। तत्र प्रयेणाग्निसाध्यत्वात् कर्म्मणामग्न्याधानकालमावदाह।—

ब्रह्मचारी वेदमधीत्यान्त्यां समिधमभ्याधास्यन्॥७॥

ब्रह्म वेदः, तच्चरति प्राप्नोति यथोक्तव्रतादिभिरिति ब्रह्मचारी प्रथमाश्रमीत्याचक्षते। स चोपकुर्व्वाणक एवार्थात्। इतरस्यामरणमेव गुरुकुलावस्थानानुष्ठानात्। स खल्वयं ब्रह्मचारी—

"वेदानधीत्य वेदौ वा वेदं वापि यथा क्रमम्"।

इति स्मरणात्,—वेदान्, वेदौ, वेदं, वा अधीत्य यथावदधिगम्येत्यर्थः। तदत्रानुपादेयतया "ग्रहं सम्मार्ष्टि" इतिवत् सङ्ख्या न विवक्षिता,—"सर्व्वेषां वा लक्षणत्वादविशिष्टं हि लक्षणम्"—इति सिद्धान्तात्। न खल्वत्र "पशुनायजेत" इत्यादाविव वेदस्याध्यायनं विधित्सितम्, किन्त्वनूदितम्, अनुवादस्य प्राप्तस्यैव भवति,—इति यथाप्राप्तमेवानूद्यते इत्यदोषः। तदयमर्थः। सायम्प्रातर्विहितसमिदाधानो ब्रह्मचारी, वेदमधीत्य (ब्रह्मचर्य्यसमाप्तिसमये) अन्त्यां—अन्ते अवसाने भवां—पश्चिमां, समिधम्—

"नाङ्गुष्ठादधिका ग्राह्या समित् स्थूलतया क्वचित्।
न वियुक्ता त्वचा चैव न सकीटा न पाटिता।
प्रादेशान्नाधिका नोना न तथा स्याद्विशाखिका।
न सपर्णा न निर्वीर्य्या होमेषु च विजानता"।

इति कर्म्मप्रदीपोक्तलक्षणाम्, अभ्याधास्यन् आभिमुख्येन प्रातराधास्यन्—अग्नौ प्रक्षेप्स्यन्,—"अग्निसमाधानं कुर्व्वीत"—इति परस्मात् सिंहावलोकितन्यायेन सम्बध्यते। तथा च ब्रह्मचर्य्यपरिसमाप्तिसमये, ब्रह्मचारिणा गृहस्थाश्रमं प्रविविक्षुणा या पश्चिमा समिदाधेया, सा तु—

"न खेऽग्नावन्यहोमः स्यान्मुक्त्वैकां समिदाहुतिम्।
स्वगर्भसंस्क्रियार्थाश्च यावन्नासौ प्रजायते"।

इति कर्मप्रदीपदर्शनात्—सत्यप्यन्यस्मिन् होमसाधने पित्र्याचार्य्यसमाहितेऽग्नौ, तदानीमेव वक्ष्यमाणवैश्यकुलादियोनिमन्यन्तरमाधाय, तस्मिन्नाधातव्या इति फलितार्थः। सत्यप्यन्यस्मिन्नग्नाविदानीमन्यस्याग्नेराधानफलन्तूपरिष्टादुपदर्शयिष्यत्याचार्य्यः—"स एवास्य गृह्योऽग्निर्भवति" इति। अत्र च—

"अनाश्रमी न तिष्ठेत्तु क्षणमेकमपि द्विजः"।

इत्यादिस्मरणात् स एवादधीत—यस्मै पूर्व्वमेव काचित् कन्या केनचिद्वाग्दत्तासीदित्येतत् स्पष्टयति कात्यायनः।—

"यस्य दत्ता भवेत् कन्या वाचा सत्येन केनचित्।
सोऽन्त्यां समिधमाधास्यन्नादधीतैव नान्यथा"।

इति॥ ७॥ *॥

आधानकालान्तरमाह।—

जायाया वा पाणिं जिघृक्षन्॥ ८॥

यस्यामात्मा जायते सेयं पाणिग्रहणादिसंस्कारसंस्कृता नारी जायेत्युच्यते। तस्या जायायाः। (भाविनिभूतवदुपचारेण जायाया इत्याह)। पाणिं हस्तं, जिघृक्षन्—यथाविधिग्रहीतुमिच्छन्नित्येतत्। "अग्निसमाधानं कुर्व्वीत"—इति सम्बध्यते। वाशब्दः पूर्व्वकल्पापेक्षया विकल्पार्थः। तदत्र "भार्य्यादिरग्निः" इति शास्त्रान्तरदर्शनात् भार्य्यासम्बन्ध एक एव निमित्तमाधानस्य। तस्य च कालद्वयमुक्तं—अभ्याधास्यन्निति, जिघृक्षन्निति च॥ ८॥ *॥

अत्र चाधानं लक्षणपूर्व्वकं समन्त्रकमग्नेः स्थापनमुच्यते। आङ्-पूर्व्वस्य दधातेरारोपणवाचित्वात्। तथा प्रसिद्धेश्च। तत्, किं लक्षणं नाम?—कथञ्चाग्नेः स्थापनम्?—इतीदमिदानीं त्रिभिः सूत्रैराह।—

अनुगुप्ता अप आहृत्य, प्रागुदक्प्रवणं देशं समं वा; परिसमुह्योपलिप्य, मध्यतः प्राचीं रेखामुल्लिख्योदीचीञ्च संहतां पश्चात्, मध्ये प्राचीस्तिस्र उल्लिख्याभ्युक्षेत्॥ ९॥

अनुगुप्ता अनुरक्षिताः—आच्छादिताः, पतितादिभिरदृष्टा इत्येतत्। अप उदकं, आहृत्य—अनिषिद्धजलाशयादानीय, "ताभिः प्रक्षालितपाणिपादवदन आचम्य"—इति भट्टभाष्यम्। प्रागुदक्-प्रवणम्—प्राग्वा, उदग्वा, क्रमनिम्नम्, देशं भूमिभागम्,—

"कुशैः सम्मार्ज्जयेद्भूमिं शुद्धामादौ शुचिस्ततः।

हस्तमात्रां चतुरस्रां गोमयेनोपलेपयेत्"।

इत्येवमादिस्मृत्यन्तरानुमतम्। समं, प्राङ्नीचादिरहितमित्येतत्। वाशब्दो विकल्पार्थः। तद्व्यवस्थामाह गृह्यसंग्रहः।—

"प्राङ्नीचं ब्रह्मवर्चस्यमुदङ्नीचं यशोत्तमम्।

पित्र्यं दक्षिणतो नीचं प्रतिष्ठालम्भकं समम्"।

इति।—परिसमूह्य, परि—परितः सर्व्वत इत्यर्थः। समूह्य—"कुशैः सम्मार्ज्जयेद्भूमिम्"—इति दर्शनात्—कुशैः पांश्वादिकं सम्य-गुत्सार्य्य, "परिसमूह्य वितस्तिचये उत्तरत उत्करं करोति"

इति गृह्यान्तरदर्शनात्—उत्तरस्यां दिशि वितस्तित्रयोपरि प्रक्षिप्य। उपलिप्य,—"गोमयेन समन्तं पर्य्युपलिम्पति"—इति दर्शनात्— "गोमयेनोपलेपयेत्"—इति च स्मरणात् योग्यत्वाच्च, गोमयोदकेनेति वाक्यशेषः। देशमिति सम्बध्यते। मध्यतः,—स्थण्डिलाभ्यन्तरे, दक्षिणांश एव, न तु मध्यांश एवेत्यर्थः। कस्मात्?। हस्तमात्रस्थण्डिलेष्वुदग्गतैकविंशत्यङ्गुलरेखानुरोधात्। सप्तसप्ताङ्गुलान्तरितप्राग्गतरेखात्रयस्योदग्गतरेखाऽनुषक्तत्वानुरोधाच्च। अत एव हस्तमितस्थण्डिले स्मर्य्यते।—

"अङ्गुष्ठमात्रं भूभागं त्यक्त्वा दक्षिणतः सुधीः।

उत्तरे द्व्यङ्गुलं त्यक्त्वा पश्चिमेष्वङ्गुलद्वयम्"।

इति।—प्राचीं, प्राग्गतां, रेखां द्वादशाङ्गुलप्रमाणां पार्थिवीं पीतवर्णाम्,—दक्षिणहस्तेन—कुशेन,—उल्लिख्य। उदीचीञ्च, उदग्गताञ्च रेखामेकविंशत्यङ्गुलप्रमाणामाग्नेयीं—लोहितवर्णामुल्लिख्य। चकारो रेखामुल्लिख्येत्यनुषङ्गार्थः। तामिमामुदीचीं रेखां विशिनष्टि।—संहतां, संलग्नां। पश्चात्, पश्चिमस्यां प्राग्गताया इत्येतत्। 'मध्ये'—उदग्गतायाः, तल्लग्ना इति यावत्। 'प्राचीः'— प्राग्गताः, 'तिस्रः' रेखाः प्रादेशप्रमाणाः सप्तसप्ताङ्गुलान्तरिताः— दक्षिणत उपक्रमदर्शनादुत्तरोत्तराः, उल्लिख्येत्यन्वयः। आसाञ्च तिसृणां रेखाणामेका प्राजापत्या कृष्णवर्णा, द्वितीया चैन्द्री नीलवर्णा, तृतीया सौमी शुक्लवर्णा इत्यवगन्तव्यम्। तदेतत् सर्व्वं परिशिष्टवचनात् स्मृत्यन्तरसंवादाच्चावसीयते। तदाह कात्यायनः।

कर्म्मोपदिश्यते यत्र कर्तुरङ्गं न चोच्यते।

दक्षिणस्तत्र विज्ञेयः कर्म्मणां पारगः करः"।

इति।

"लक्षणे प्रागताया्स्तु प्रमाणं द्वादशाङ्गुलम्।

तन्मूललग्नायोदीची तस्या एवं नवोत्तरम्"।

उदग्गतायाः संलग्नाः शेषाः प्रादेशमात्रिकाः।

"सप्तसप्ताङ्गुलांस्त्यक्त्वा कुशेनैव समुल्लिखेत्"।

इति च। अपिच स्मर्य्यते।

"प्राग्गता पार्थिवी ज्ञेया चाग्नेयी चाप्युदग्गता।

प्राजापत्या तथा चैन्द्री सौमी च प्राक्कृता स्मृता।

पार्थिवी पीतवर्णा स्यादाग्नेयी लोहिता भवेत्।

प्राजापत्या भवेत् कृष्णा नीला चैन्द्री प्रकीर्त्तिता।

श्वेतवर्णा च सौमी स्याद्रेखानां वर्णलक्षणम्"।

इति। अत्र चाङ्गुलिमानादिकं यजमानस्येत्याह कर्म्मप्रदीपः।

"मानक्रियायामुक्तायामनुक्ते मानकर्त्तरि।

मानकृत् यजमानः स्याद् विदुषामेष निर्णयः"।

इति। एतच्च रेखोल्लेखनम्,—यावदग्निस्थापनं सव्यहस्तं भूमौ निधाय कर्त्तव्यमित्याह गृह्यासंग्रहः।

"सव्यं भूमौ प्रतिष्ठाप्य प्रोल्लिखेद्दक्षिणेन तु।

तावन्नोत्थापयेत् पाणिं यावदग्निं निधापयेत्"।

इति। तदेवं यथोक्ता रेखा उल्लिख्य,—"उल्लिख्योद्धृत्याभ्युक्षेत्"—इति कात्यायनसूत्रात्;—

"उत्करं मध्यरेखाभ्योरत्निमात्रे निधापयेत् ।
द्वारमेतत् पदार्थानां प्रागुदीच्यां दिशि स्मृतम्" ।

इति गृह्यासंग्रहवचनाच ;—रेखाभ्योमृदमुद्धृत्य प्रागुदीच्यां दिश्यरत्निमात्रे निधाय, 'अभ्युक्षेत्'—"उक्षसेचने" इति स्मरणादाभिमुख्येन—

"उत्तानेनैव हस्तेन प्रोक्षणं समुदाहृतम् ।
न्यञ्चताभ्युक्षणं प्रोक्तं तिरश्चावोक्षणं मतम्" ।

इति स्मृत्यन्तरोक्तप्रकारेण, सिञ्चेदद्भिरिति सामर्थ्यात्, यथोक्ता रेखा इत्यर्थः ।

अथैवमुल्लिख्याभ्युक्षेदिति श्रूयमाणमानन्तर्य्यमतिक्रम्यते । शास्त्रं खल्विदम्—उल्लिख्याभ्युक्षेत्—इति । न च शास्त्रं नामातिक्रमितव्यम् । नैतदेवम् । आनन्तर्य्यश्रवणाभावात् । न खल्वानन्तर्य्यमिहोल्लेखाभ्युक्षणयोः श्रूयते—किन्तर्हि ?—पूर्व्वापरीभावमात्रम् । कस्मात् ? । उल्लिख्याभ्युक्षेदिति क्त्वाश्रवणात् । पूर्व्वकालतायां हि क्त्वाप्रत्ययं स्मरन्ति शाब्दिकाः—("एककर्तृकयोः पूर्व्वकाले क्त्वा"—इति)—नत्वानन्तर्य्ये । न खल्वेवमप्युल्लेखस्य पूर्व्वकालतायामस्ति कश्चिद्विरोधः । येनोल्लिख्याभ्युक्षेदिति क्त्वाश्रवणमतिक्रम्येत । यथा खल्वधीत्य वेदमधीत्य च विचारशास्त्रं स्नातापि, नातिक्रामति—"वेदमधीत्य स्नायात्"—इति शास्त्रं, तथेहापीत्यदोषः । अतएव—"वेदमधीत्य स्नायादिति शास्त्रमध्ययनसमावर्त्तनयोः पूर्व्वापरीभावसमानकर्तृकत्वे एवाचष्टे, न त्वानन्तर्य्यम्"—इति माधवाचार्य्याः । अपिच । आवश्यकत्वात् खल्वत्र मृदुद्धरणादिकं क्रियते, क्रमस्त्वाश्रित्य प्रत्यय-

तिष्ठते भवान्। तच्चैतदनुचितम्। दुर्ब्बलो हि क्रमः—बलवत्तरञ्च वाक्यम्। तदुक्तम्—"श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्ब्बल्यमर्थविप्रकर्षात्"—इति। तस्माद्वाक्यानुरोधात् क्रमं बाधेमहि—न क्रमानुरोधात् वाक्यम्। अतएवोक्तं शाखान्तराधिकरणे—"विरोधिना त्वसंयोगात् ऐककर्म्म्यऽतत्संयोगात् विधीनां सर्व्वकर्म्मप्रत्ययः स्यात्"—इति। अपिच। मृदुद्धरणादिकं पदार्थः, क्रमस्तु पदार्थानामुपकारको गुणः। न खलु गुणानुरोधेन पदार्थ एव न कर्त्तव्यो भवतीति युक्तम्! प्राप्तानां पदार्थानां उत्तरकालं हि क्रम आपतति। यदा च पदार्थः प्राप्नोति, तदा क्रम एव नास्ति। न खलु पूर्व्वसिद्धः पदार्थः पश्चिमसिद्धेन क्रमेण विरोधादकर्त्तव्यो भवति!

नन्वाचार्य्यानुक्तमपि मृदुद्धरणादिकं कथमस्माकमप्यभिधीयते—(यतोऽयं विचारः—अवणमतिक्रम्यते वा, न वा अतिक्रम्यते इति।)—परोक्तत्वात्। अक्रियैव खल्वियमुच्यते। तदाह कात्यायनः।—

"अक्रिया त्रिविधा प्रोक्ता मुनिभिः कर्म्मकारिणाम्।
अक्रिया च परोक्ता च तृतीया चायथाक्रिया।
स्वशाखाश्रयमुत्सृज्य परशाखाश्रयन्तु यः।
कर्त्तुमिच्छति दुर्म्मेधा मोघं तत्तस्य चेष्टितम्"।

इति। उच्यते। शाखान्तराधिकरणन्यायेनैकमेवेदं कर्म्मेत्यदोषः। अतएव जैमिनिराचार्य्यस्तस्मिन्नेवाधिकरणे—"एकं वा संयोगरूपचोदनाख्याविशेषात्"—इति सिद्धान्तयाञ्चकार। एकत्वे च कर्म्मणो

यत्र क्वचित् किञ्चिदङ्गमामनन्ति, अन्यत्रापि तदुपसंहर्त्तुमुचितम्। किमन्यत् कुर्य्यादियं चिन्ता—कृते गुणोपसंहारात्?। फलञ्चेदमभिहितमस्याश्चिन्ताया भगवता भाष्यकारेणाचार्य्येण च भङ्ग्यन्तरेण। वादरायणस्त्वाचार्य्योऽस्येदमेव फलं साक्षादसूत्रयत् शारीरके। "उपसंहारोऽर्थाभेदात् विधिशेषवत् समाने च"—इति। अतएव स्मरति भगवान् कात्यायनोऽपि।

"यन्नाम्नातं स्वशाखायां परोक्तमविरोधि च।
विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादिकर्म्मवत्"।

इति। या पुनरुपदर्शितापुरस्तात् परोक्तनिन्दा—'परोक्ता च'—इति। सा खलु, विरोधिनीमनाकाङ्क्षिताञ्च परोक्तां क्रियां निन्दतीत्यवगम्यते। कस्मात्?। 'स्वशाखाश्रयमुत्सृज्य'—इति, 'परोक्तमविरोधि च'—इति च समाम्नानात्। न चेदं मृदुद्धरणादिकं पारशाखिकमपि; आचार्य्यपुत्रेणैवाभिधानात्। न खलु स्वशाखायां ग्रन्थान्तरे श्रूयमाणमपि पारशाखिकं भवति॥ ९॥

लक्षणावृदेषा सर्व्वत्र॥ १०॥

परिसमूहनाद्यभ्युक्षणान्तं कर्म्म लक्षणमुच्यते। तस्य खल्वस्य लक्षणस्य, आवृत्परिपाटी, एषा अनन्तरोक्ता न तु विपरीता, सर्वत्र यत्र यत्राग्निः प्रणीयते तत्र तत्रेत्यर्थः। अत्र यद्यपि 'प्रागुदक्प्रवणं देशं समं वा परिसमूह्य'—इति श्रुत्या लक्षणमिदं साक्षाद्भूमेरुपकारकं तथापि भूसंस्कारद्वारैव प्रणाल्या अग्न्याधानस्याप्युपकारकं प्रकरणादित्यवगन्तव्यम्। 'अग्निसमाधानं कुर्व्वीत'—इति हि प्रक-

रणम्। यथा व्रीहीनवहन्तीत्यवघातस्य द्वितीया श्रुत्या साक्षाद् व्रीह्युपकारकत्वेपि, प्रणाल्या क्रतूपकारकत्वमपि प्रकरणादिष्यते, तथात्रापि द्रष्टव्यम्। वाक्येन वा लक्षणमग्निप्रणयनमात्राङ्गं भवति। 'लक्षणावृदेषा सर्व्वत्र'—इति हि समामनन्ति। अतएव तत्र तत्राग्निप्रणयने लक्षणं वक्ष्यत्याचार्यः—'उत्तरार्द्धे परिवृतस्य लक्षणं कृत्वाऽग्निं प्रणयन्ति'—इति, 'पूर्वस्याः कर्ष्वाः पुरस्ताल्लक्षणं कृत्वाग्निं प्रणयन्ति'—इति च।

तदिदं लक्षणमाधानाङ्गमग्निप्रणयनाङ्गं वा भूमिसंस्कारद्वारेति संस्कृतायामपि भूमावाधानाद्यङ्गतया प्राप्तं लक्षणं कर्त्तव्यमेव। न चावघातस्य कृष्णलइव, संस्कृतेपि देशे लक्षणस्य बाध एव, द्वारबाधादिति वाच्यम्। शास्त्रावधारणवेलायां प्रयोजनवत्त्वाल्लक्षणस्य, इदानीमनुष्ठानवेलायामेव हि क्वचित् प्रयोजनाभावोऽवगम्यते, कृष्णले त्ववघातस्य शास्त्रावधारणवेलायामेव नास्ति प्रयोजनमिति वैषम्यात्। याज्ञिकास्तु खल्वनुष्ठानवेलायामालस्यादिदोषवशाद्व्रीह्यादिस्थाने गृहीतमपि तण्डुलाद्यवहन्ति वितुषीकृतमपि। विहिताविहितत्वसन्देहे च विहिताकरणादविहितकरणमेव न्याय्यमित्याचक्षते।

यत्र त्वाहित एवाग्निर्नीयतेऽन्यस्मिन् प्रदेशे, कारणवशात्, तत्र यद्यपि निष्पन्नत्वादाधानस्य तदङ्गं लक्षणमपि न युज्यते कर्त्तुम्, तथापि प्रदेशस्य तस्य संस्कारार्थं तत्रापि लक्षणं कर्त्तव्यमेव। स्थापनमात्रस्य तत्राप्यविशेषाच्च। 'लक्षणावृदेषा सर्वत्र'—इति ह्यनुशासनम्। 'लक्षणं कृत्वाग्निं प्रणयन्ति'—इति च दर्शनम्। "समू-

श्चोपलिप्योल्लिख्योद्धृत्याभ्युक्ष्यैवेष संस्कारोऽनुगतेऽग्नौ भूयः"—इति च गृह्यान्तरम्। अतएवास्मादेव गृह्यान्तरान्निरूपितं तत्त्वकृद्भिः— "यद्यग्निस्थापनानन्तरं कर्मकाले वृष्ट्यादिशङ्कया संस्कृताग्निरन्यत्र नीयते तदा पुनर्भूसंस्कारः कर्त्तव्यः"—इति।

न तु लक्षणमग्नेरपि संस्कारः, प्रामाणाभावात्। न खल्वस्ति किञ्चित् प्रमाणमग्नेरपि संस्कारोलक्षणमिति। शब्दप्रमाणकः खल्वयमर्थो—ऽयं कर्त्तव्योऽयञ्च न कर्त्तव्य—इति, अयमस्योपकरोति नास्य—इति चैवमादिः। न खल्वस्ति कश्चिच्छब्दोलक्षणमग्नेरुपकरोतीति। श्रुत्या तावल्लक्षणं भूमेरुपकारकं, प्रकरणाच्चाङ्गमाधानस्य, वाक्याद्वा प्रणयनस्येत्यवोचाम। न खल्वग्निना लक्षणसम्बन्धो ऽस्ति। 'लक्षणं कृत्वाग्निं प्रणयन्ति'—इत्यादौ हि श्रुत्या प्रणयनेनाग्नेः सम्बन्धोऽवगम्यते—वाक्येन 'लक्षणं कृत्वा'—इत्यस्य च। न तु लक्षणाग्न्योरन्वयोऽस्ति।

"जातस्य लक्षणं कृत्वा तं प्रणीय समिध्य च"।

इति कर्म्मप्रदीपेपि जातस्येति सुपां सुपा व्यत्यये षष्ठी द्रष्टव्या। जाते सतीत्यर्थः। "मन्थेदग्निं निकामतः"—इति ह्यभिधाय 'जातस्य लक्षणं कृत्वा'—इत्यभिहितवान् कात्यायनः। न हि लक्षणेन समं जातस्य सम्बन्धोऽस्तीत्यवोचाम। न खलु'जातस्य लक्षणं कृत्वा'— इति विधीयते, किन्त्वनूद्यते। न चाप्राप्तं किञ्चिदनूद्यते! विधीयते इति चेन्न वाक्यभेदप्रसङ्गात्। विधानपक्षे खल्वनूद्य लक्षणं जातसम्बन्धस्तत्र विधातव्यः, कृत्वेति च क्रम इति भिद्येत वाक्यम्। तस्मात् क्रम विधिरेवायं—'जातस्य लक्षणं कृत्वा'—इत्येवमादिः।

परम्परया वा आतमसम्बन्धोलक्षणस्य वर्णनीय इति न किञ्चिद-नुचितम्।

ननु 'समूह्योपलिप्योल्लिख्योद्धृत्याभ्युक्ष्य देषसंस्कारोऽनुगतेऽग्नौ भूयः'—इति संस्कृताया अपि भूमेः पुनः संस्कारविधानादग्नि-संस्कारोलक्षणमिति चेन्न, संस्कृताया भूमेः संस्कारविधायकमिद-मित्यत्र प्रमाणाभावात्। 'अनुगतेऽग्नौ संस्कारो भूयः'—इत्यभि-धानाच्च। सोयमग्नौ स्थापयितव्ये संस्कारो भूमेर्नत्वग्नेरेव। शब्दप्र-माणकः खल्वयमर्थः—इत्यवोचाम। न खल्वनुगतेनामाग्निरसंस्कृतो भवति। न च संस्कृतायामपि भूमावग्निप्रणयनाङ्गं लक्षणमनुचितं भवतीति ध्येयम्।

अथानुगताविनष्टः—इत्यनर्थान्तरम्। यद्येवं किमतो भविष्य-ति?। एतदतो भविष्यति;—स्थापितेऽग्नौ विनष्टे पुनरपि लक्षणं कृत्वा तत्रैवान्योऽग्निः स्थापनीयः—इति। किमतापि भवति?। एतदतो भवति;—यदि नामाग्निर्नष्टो न तावता संस्कृतापि भूमिरसंस्कृता भवितुमर्हति। येन भूयः संस्कारोऽर्थवान्। आम्नायते च संस्कारः। तस्मादनुमीयते,—अग्नेरेवैष संस्कारः—इति। उच्यते। नैतदस्ति—अग्नेरेवैष संस्कारः—इति। कस्मात्?। प्रमाणाभावात्। न खल्वस्ति प्रमाणम्—अग्नेरेष संस्कारः—इति। नन्वेवमनुमीयते इत्युक्तम्। सत्यमुक्तम्। प्रमाणन्तु तत्र किमिति पृच्छामः। पुनर्वचनमिति चेन्नाविशेषात्। इति चेद्भवान् पश्य-ति;—पुनर्वचनमेव प्रमाणमग्निसंस्कारोलक्षणमित्यत्र। अन्यथा वचनमिदमनर्थकं स्यादिति। तत्रोच्यते। नैतदस्ति—पुनर्वचनमग्नि-

संस्कारो लक्षणमित्यस्मिन्नर्थे प्रमाणमिति । कस्मात्? । अविशेषात् । विशेषाभावादित्यर्थः । किमनेनोक्तं भवति? । एतदनेनोक्तं भवति,—भवेदपि पुनर्व्वचनं प्रमाणं नाम; यदि पुनरुच्यमानस्यास्य काचिदन्या वचनव्यक्तिः सम्भवेत् । न तु सम्भवति । कस्मात्? । अविशेषादेव । यद्विधाविशिष्टा वचनव्यक्तिरस्याग्न्यर्थतायां प्रमाणम्, तद्विधा खल्विह वचनव्यक्तिर्नास्ति । सकृदुच्चरितेऽप्यस्य यावानर्थः, शतकृत्वोऽप्युच्चारणे तावानेवार्थः प्रतीयते, न ततोऽधिक इति । तदेवमत्यल्पमिदमुच्यते—पुनर्व्वचनम्—इति । पुनः पुनरपि वचनं नैतदवगमयितुमर्हति । तस्माद् भूमेरेवैष संस्कारः पुनराम्नायते नाग्नेरित्यवगम्यते । भूयः संस्कारवचनञ्चैवमाञ्जस्येनोपपत्स्यते इति । कथं नाम? भूयः पुनरिति खल्वेकोऽर्थः । तदनेनावगम्यते,—यदनेन पूर्वं संस्कृतं तदेव पुनरपि संस्क्रियते इति । अथेदानीमग्निः संस्क्रियते? तर्हि पूर्वं भूमिरिदानीञ्चाग्निः संस्क्रियते इति विषयभेदात् भूयो वचनमसमञ्जसमापद्येत । न चैतदुचितम्

अथापिस्यात्—अस्मादेवकारणात् पूर्व्वमप्यग्निरनेन संस्कृत इत्यनुमास्यामहे; ततो नैष दोषो भविष्यति—इति । अत्रोच्यते । नाविमोचात् । न खल्वेवमपि दोषाद्विमोचः सम्भवति । कस्मात्? । अन्यत्वाविशेषात् । पूर्व्वमन्योऽग्निरिदानीञ्चान्योऽग्निः संस्क्रियते—इत्यभ्युपगच्छतोपि अन्यत्वाविशेषात् स एव दोषोऽनुवर्त्तते—इत्यविमोचादोषादित्यर्थः । इतश्च । अप्रमाणत्वात् । न खल्वेवमनुमाने किञ्चिदपि प्रमाणमुपलभ्यते । सेयमप्रमाणिकी पुरुषबुद्धिमात्रमूला कल्पनाप्रेक्षावतामनपेक्षणीया भवति । अन्यथा चापपत्तेः ।

भवेदपि कदाचिदियं कल्पना; यदि नामान्यथा शास्त्रमिदं नोपपद्येत, न तु नोपपद्यते। अन्यथा खल्वस्मदुक्तरीत्या शास्त्रमर्थवत् कथमप्रमाणमनुमानमनुष्ठास्यतीति शक्यमध्यवसातुम्। प्रमाणविरोधाच्च। प्रमाणेन च खल्वेषा कल्पना विरुध्यते। श्रुत्या तावल्लक्षणं भूमेरुपकारकं, वाक्याद्वा प्रणयनस्येत्यवोचाम। तदिदमागमबाधितमनुमानमप्रमाणमित्यनादरणीयम्। संस्कृताया भूमेः पुनः संस्कारोऽनर्थकः?—इति चेत्—काममनर्थको भवतु। नैवान्या वचनव्यक्तिः सम्भवति। अपि च। असंस्कृताया अपि भूमेः संस्कारे कमर्थं भवान् पश्यति? न खल्वत्रापि लक्षणेन भूमेर्दृष्टः कश्चिदुपकारः क्रियते! वचनबलाददृष्टमत्र किञ्चिदनुमास्यामहे?—इति चेदयमपि वचनबलादेवादृष्टं किञ्चिदनुमास्यामहे। वचनबलात् खल्वेवं कुर्व्वाणाः किमित्युपालभ्येमहि—किमिति क्रियते?—इति। तस्मात् स्वतः शुद्धप्रदेशे गङ्गापुलिनादाविवात्रापि वचनबलादेव लक्षणं कर्त्तव्यम्। तस्मादेवमपि विनष्टेऽग्नौ पुनरन्यस्याग्नेः प्रणयनाङ्गतया प्राप्तं लक्षणं संस्कृतायामपि भूमौ कर्त्तव्यमिति न किञ्चिदनुचितम्। दर्शितञ्चास्माभिः,—लक्षणेन सममग्नेः सम्बन्धो नास्ति, अस्ति च प्रणयनस्येति। "तस्मादग्न्यर्थाः परिसमूहनादयः"—इति कर्कभाष्यमप्रमाणम्। "परिसमूह्योपलिप्योल्लिख्योद्धृत्याभ्युक्ष्याग्निमुपसमाधाय"—इति वचनादरमग्निसमाधानार्था भवन्तु परिसमूहनादयः, न त्वातुचिदग्न्यर्था भवितुमर्हन्ति। तस्मादस्मदुक्तमेव व्याख्यानमादरणीयम्। तदनेन प्रबन्धेनैतदप्यवगम्यते,—यदि स्वस्यास्त्रिस्त

एवाग्नौ किञ्चित् श्रूयते, न तत्र लक्षणं कर्त्तव्यमिति। भट्टनारायणस्त्वाह—"यत्र यत्राग्निप्रणयनं क्रियते, तत्र तत्र भुवः संस्कारविधानात् भूसंस्कारः। अनुगतेऽग्नौ संस्कृताया अपि भूमेः पुनः संस्कारविधानात् अग्निसंस्कार इति। तथाच गृह्यान्तरम्। समूह्योपलिप्योल्लिख्योद्धृत्याभ्युक्ष्येदेष संस्कारोऽनुगतेऽग्नौ भूयः—इति। तस्मादयमसंस्कारः इति सिद्धम्"—इति ॥ १० ॥ * ॥

भूर्भुवः स्वरित्यभिमुखमग्निं प्रणयन्ति ॥ ११ ॥

"शुभं पात्रन्तु कांस्यं स्यात्तेनाग्निं प्रणयेद्बुधः।
तस्याभावे शरावेन नवेनाभिमुखश्च तम्"।

इति गृह्यासंग्रहवचनात्। "प्राञ्चं नीत्वावर्त्त्य स्थापयन्ति"—इति स्मरणाच्च—वक्ष्यमाणयोनिमग्निं कांस्यपात्रस्थं कृत्वा, तथा नीत्वा, आवर्त्त्य—सम्यक् भ्रामयित्वा च, 'अभिमुखं' यथा भवत्यात्मन इत्यर्थात्, तथा भूर्भुवः स्वरित्यनेन मन्त्रेण 'प्रणयन्ति' स्थापयन्ति रेखापरीत्यर्थः। यत्पुनः—

"शरावे भिन्नपात्रे वा कपाले वोल्मुकेऽपि वा।
नाग्निप्रणयनं कुर्य्याद्व्याधिहानिभयावहम्"।

इति स्मृत्यन्तरम्। तदुदाहृतगृह्यासंग्रहवचनविरोधात् कौथुमादिव्यतिरिक्तविषयम्। कांस्यादिपात्रसद्भावे शरावनिषेधकमिति राघवभट्टप्रभृतयः ॥ ११ ॥

लक्षणादिकमभिधायायेदानीमन्याधानकालानुपदिशति त्रिभिः सूत्रैः—

प्रेते वा गृहपतौ परमेष्ठिकरणम् ॥ १२ ॥

प्रेते इति कर्त्तरि निष्ठा। प्रकर्षेण इते गते—अस्माल्लोकादित्यर्थात्। मृत इत्येतत्। वाशब्दादेकल्पिकोऽयमाधानकाल इति दर्शयति। गृहपतौ गृहस्वामिनि। तथाच गौतमः। "भार्य्यादिरग्निर्दायादिर्वा"—इति। "दायाद्य काल एकेषाम्"—इति च गृह्यान्तरम्। परेते खलु गृहस्वामिनि दायसम्बन्धः पुत्राणामिष्यते। अतएव स्मर्य्यते।

"ऊर्द्ध्वं पितुश्च मातुश्च समेत्य भ्रातरः समम्।
भजेरन् पैतृकं रिक्थमनीशास्ते हि जीवतोः"।

इति।

"पितर्य्युपरते पुत्रा विभजेयु र्धनं पितुः।
अस्वाम्यं हि भवेदेषां निर्दोषे पितरि स्थिते"।

इति चैवमादि। कर्कोपाध्यायास्त्वाहुः—व्यवस्थितोऽयं विकल्पः।—अभ्रातृकस्य दारकालः, भ्रातृमतो दायाद्य कालः—इति। तेषामयमाशयः। विभागमन्तरेण साधारणधनस्य परित्यागासम्भवादनधिकार एवाविभक्तानां धनसाध्येष्वाधानादिषु। अतो भ्रातृमतो विभागकाल एवाधिकारः। स एव कालो दायाद्य काल इत्युच्यते—इति। आचार्य्यस्तु प्रेते वा गृहपताविति ब्रुवन्नैतदनुजानातीत्यवगम्यते। न चाविभक्तधनस्य कथं परित्याग इति वाच्यं स्वत्वस्य तथाप्यविशेषात्। निर्दोषे पितरि स्थिते पुत्राणामस्वाम्यम्—इति स्मरन्मुनिः परेते पितरि स्वाम्यमेषामनुमन्यते। नारदोऽपि स्मरति।—

"यद्येकजाता बहवः पृथग्धर्म्माः पृथक्क्रियाः ।
पृथक्कर्म्मगुणोपेता न चेत् कार्य्येषु सम्मताः ।
स्वभागानथ दद्युस्ते विक्रीणीयुरथापि वा ।
कुर्य्युर्यथेष्टं तत् सर्व्वमीशास्ते स्वधनस्य वै" ।

इति। परेते पितरि दायसम्बन्धात् स एव कालोदायाय काल इत्युच्यते इति न किञ्चिदनुचितम् ।—तदेवं प्रेते गृहपतौ, 'परमेष्ठिकरणम्' परमे श्रेष्ठस्थाने तिष्ठतीति परमेष्ठी अग्निरित्याचक्षते। तस्य परमेष्ठिनोऽग्नेः, करणम्—यथोक्तेन विधिना स्वीकरणम्, समाधानमित्येतत् । कर्त्तव्यमिति वाक्यशेषः । "तच्चैकादशेऽह्नि स्यात्, प्रागनधिकारात्"—इति भट्टभाष्यम् । कात्यायनस्तु—

"एतद्गृहपतौ प्रेते कुर्य्यादेकादशेऽहनि ।
प्रागेवैकादशात् शुद्धात् सद्यो जागरणादिकम्" ।

इत्यभिधायाह—

"ज्येष्ठः कुर्य्यात्तथाऽऽधानं कनीयांश्च विवर्ज्जयेत् ।
सैकादशेऽह्नि कुर्व्वीत द्वादशे वा विचक्षणः" ।

इति। तदत्र वृद्धिश्राद्धं न भवति। कस्मात्?।

"न तत् पूर्व्वं यतः प्रोक्तः सपिण्डनविधिः क्वचित् ।
वृद्धिश्राद्धस्य लोपः स्यादुभयोरपि पक्षयोः" ।

इति कर्म्मप्रदीपदर्शनात् ॥ १२ ॥ * ॥

तथा तिथिनक्षत्रपर्व्वसमवाये ॥ १३ ॥

तथेति वैकल्पिकत्वं दर्शयति । नक्षत्रान्दसेको लुप्तवत् द्रष्टव्यः ।

"नक्षत्रशब्दः काकाक्षिन्यायेनोभयत्र सम्बध्यते"—इति भट्टनारायणोपाध्यायाः। तिथिश्च नक्षत्रञ्च तिथिनक्षत्रे, नक्षत्रञ्च पर्व्व च नक्षत्रपर्व्वणी, तयोस्तयोश्च समवायस्तस्मिन्निति। तिथिः,—(पर्वेतिपुनः करणात्—"पौर्वापर्य्ये सति पूर्वदौर्वल्यम्"—इति च सिद्धान्तात्)—पर्वेतरा शोभना ज्योतिः शास्त्रानुमता, नक्षत्रमपि शोभनं ज्योतिः शास्त्रानुमतमेव। तयोस्तिथिनक्षत्रयोः समवाये संयोगे, "अग्निसमाधानं कुर्वीत"—इति सम्बध्यते। तिथिनक्षत्रकीर्त्तनञ्चेदम्—

"वक्रिग्रहं कुजगुरुशदिनेशवारे
माघादिषट्सु च मृदुध्रुववक्रिभेषु।
कुम्भाजभांशकविलग्नमशुद्धकालं
लग्नस्थशीतगुसितौ च विहायकुर्य्यात्"॥

इति ज्योतिःशास्त्रोक्तमन्यदप्युपलक्षयति। तथा। नक्षत्रं मासंसंज्ञानिमित्तं चित्रादिकम्, पर्वपौर्णमासम्, तयोः समवाये संयोगे, अग्निसमाधानं कुर्वीत। तथेत्यनुषज्यते वैकल्पिकत्वावेदकम्। तिथिनक्षत्रपर्वणां वा समवाये—युगपदसम्भवात्, तिथिनक्षत्रसमवाये, नक्षत्रपर्वसमवाये चेत्यर्थः। तदयमेक एव नक्षत्रशब्दो ज्योतिःशास्त्रानुमतमेकविधमेव नक्षत्रमभिधत्ते इति द्रष्टव्यम्।

अथ वा। तिथिनक्षत्रयोर्ज्योतिःशास्त्रोक्तयोः समवाये इति यथोक्त एवार्थः। नक्षत्रपर्वणोश्च—"कृत्तिकासु रोहिण्यां मृगशिरसि फल्गुनीषु विशाखयोरुत्तरयोः प्रोष्ठपदयोः" "एतेषां कस्मिंश्चित्"—इति श्रौताश्वलायनोक्तयोः,—"या वैशाख्याममावस्या रो-

च्छिया सम्बध्यते, तस्यामादधीत"—इति श्रुत्युक्तयोर्वा समवाये इत्यर्थः। तदत्र नक्षत्रशब्दस्यार्थद्वयम्—(ज्योतिःशास्त्रोक्तं श्रुत्युक्तञ्च नक्षत्रम्) प्रामाणिकमित्यादरणीयम्। तदिदमाधानकालद्वयम्—यस्य तिथिनक्षत्रसमवायो, यस्य नक्षत्रपर्व्वसमवायः—इति।

इयमप्यपरा सूत्रयोजना भट्टभाष्ये दर्शिता—"तिथिना पौर्णमास्या यानि नक्षत्राणि समाध्यायन्ते, तानि नक्षत्राणि मघादीनि द्वादश, तेषामन्यतमस्य पर्व्वणा पौर्णमासेन समवायः संयोगस्तिथिनक्षत्रपर्व्वसमवायस्तस्मिन्"—इत्यन्तेन सन्दर्भेण। अस्मिंस्तु नये, अनेन सूत्रेणैक एवाधानकालोऽभिहितः—इत्यवगन्तव्यम्॥ १३ ॥ * ॥

दर्शे वा पौर्णमासे वाऽग्निसमाधानं कुर्वीत ॥ १४ ॥

दर्शोऽमावस्या सूर्य्येन्दुसङ्गम इत्यनर्थान्तरम्। पौर्णमासः पौर्णमासीत्युच्यते। तदेतस्मिन् दर्शे वा पौर्णमासे वा; यस्मिन् कस्मिन्नपि—(केवल एव—नतु नक्षत्रमप्यपेक्ष्य इत्यर्थः)—अग्निसमाधानं कुर्वीत। वाशब्दद्वयन्तुल्यवद्विकल्पार्थम्। समेत्य—आधानं समाधानम्। समेत्य—मिलित्वा। केन?—

"नैकयापि विना कार्य्यमाधानं भार्य्यया द्विजैः।
अकृतं तद्विजानीयात् सर्वा, नान्वारभन्ति यत्"।

इति कर्मप्रदीपवाक्यात्—भार्य्ययेति वाक्यशेषः। अग्नेः समाधानम्,—'अग्निसमाधानम्'। अत्र च—कया भार्य्यया कथम्भूतया च मेलनम्, कया च, न—इत्येतत् सर्व्वमप्याह कात्यायनः।—

"वर्णज्येष्ठ्ये न बह्वीभिः सवर्णाभिश्च जन्मतः।
कार्य्यमग्निच्युतेराभिः साध्वीभिर्मथनं पृथक्।
नात्र शूद्रां नियुञ्जीत न द्रोहद्वेषकारिणीम्।
नाव्रतस्थां नान्येन पुंसा च सह सङ्गताम्।
ततः शक्तिवरा पश्चादासामन्यतमैव या।
उपेतानाश्चान्यतमा मन्थेदग्निं निकामतः"।

इति। इदञ्चाधानमनग्न्यावग्रजे सति न कर्त्तव्यम्,—कर्त्तव्यञ्चानग्न्यावप्यग्रजे क्लीवादौ सत्यपि, निर्दोषेपि तस्मिंस्तदनुमत्या,—इत्यप्याह स एव।—

"आधानकाला ये उक्तास्तथा याश्चाग्नियोनयः।
तदाश्रित्याग्निमादध्यादग्निमानग्रजो यदि।
दाराधिगमनाधाने यः कुर्य्यादग्रजाग्रिमः।
परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्व्वजः।
परिवित्तिः परिवेत्ता च नरकं गच्छतो ध्रुवम्।
अपीर्णप्रायश्चित्तौ तौ पादोनफलभागिनौ।
देशान्तरस्थक्लीवैकवृषणानसहोदरान्।
वेश्यातिशक्तपतितशूद्रतुल्यातिरोगिणः।
जड़मूकान्धवधिरकुब्जवामनकुण्ठकान्।
अतिवृद्धानभार्य्यांश्च कृषिशक्तान्नृपस्य च।
धनवृद्धिप्रसक्तांश्च कामतः कारिणस्तथा।
कुलटोन्मत्तचौरांश्च परिविन्दन्नदुष्यति।
धनवार्द्धुषिकं राजसेवकं कर्षकं तथा।

प्रोषितश्च प्रतीक्षेत वर्षत्रयमपि त्वरन्।
प्रोषितं यद्यशृण्वानमब्दादूर्द्धं समाचरेत्।
आगते च पुनस्तस्मिन् पादं तच्छुद्धये चरेत्"।

इति।

"अग्रजः स्याद्यदाऽनग्निरधिकार्य्यनुजः कथम्?।
अग्रजानुमतः कुर्य्यादग्निहोत्रं यथाविधि"।

इति।

"ज्येष्ठोभ्राता यदा तिष्ठेदाधानं नैव कारयेत्।
अनुज्ञातस्तु कुर्व्वीत शङ्खस्य वचनं यथा।
नाग्नयः परिविन्दन्ति न वेदा न तपांसि च।
दारेण परिविन्नं स्यात् पृथग्धर्म्मा हि ब्राह्मणाः।
नाग्नयः परिविन्दन्ति न यज्ञा न तपांसि च।
न च श्राद्धं कनिष्ठस्य या च कन्याविरूपिका"।

इति च। पितरि चानग्नावपि पुत्रस्याधानाधिकारो न व्याहन्यते। तदप्याह स एव।—

"पितुर्यस्य च नाधानं कथं पुत्रस्तु कारयेत्।
अग्निहोत्राधिकारोऽस्ति शङ्खस्य वचनं यथा"।

इति। आधानपरिपाटीचाचार्य्यैरनुक्तापि—

"परिधायाहतं वासः प्रावृत्य च यथाविधि"।

इत्येवमादि कर्म्मप्रदीपवचनेभ्य एवावगन्तव्या। नत्वध्वर्य्युभ्योऽयष्टी- नत्वा। पराङ्गत्वात्। अक्रियैव खल्वसावस्माकमिति॥ १४॥ *॥

उक्ता आधानकालाः। अथेदानीमग्नियोनयोवक्तव्याः। तास्त्रिभिः सूत्रैरभिधीयन्ते।—

वैश्यकुलाद्वाऽम्बरीषाद्वाऽग्निमाहृत्याभ्यादध्यात् ॥

॥ १५ ॥

वैश्यस्तृतीयो वर्णः शूद्र एवाभिमतः। तस्मात् वैश्यस्य कुलात्—गृहात्, वा, अम्बरीषात्; भ्राष्ट्रात्—यवादिभर्ज्जनपात्रात्, वा, अग्निमाहृत्य आनीय, अभ्यादध्यात् अभिसर्वतोभावेनादध्यादित्यर्थः। व्याख्यातौ वाशब्दौ। स खल्वयमग्निर्द्धतोर्च्छिष्टः संस्कृतो वा गृह्यतेऽविशेषादिति कर्कोपाध्यायाः॥ १५॥ * ॥

अपि वा बहुयाजिन एवागाराद्ब्राह्मणस्य वा, राजन्यस्य वा, वैश्यस्य वा ॥ १६ ॥

अपि वा—इत्यम्बरीषात् पक्षान्तरमुपदिशति। बहुभिः सोमैर्येनेष्टं स बहुयाजीत्याचक्षते। तस्मामुष्य बहुयाजिन एव। एवकारस्तदितरं व्यवच्छिनत्ति। 'अगारात्' गृहात्। 'अग्निमाहृत्याभ्यादध्यात्'—इति सम्बध्यते। कस्य बहुयाजिनः?—इत्येतदाह।—'ब्राह्मणस्य वा' 'राजन्यस्य'—क्षत्रियस्य, 'वा', 'वैश्यस्य वा'। वाशब्दत्रयन्तुल्यवद्विकल्पार्थं। वैश्यकुलात्—इति सामान्यतोऽभिहितं, तमेव वैश्यमिदानीं बहुयाजितया विशिशिषुराचार्य्यः पुनर्वैश्यग्रहणञ्चकार। नात्र पुनरुक्तिः शङ्कनीया;—सामान्यप्राप्तस्य पुनर्विशेषकथनं खल्वपुनरुक्तमेवेत्याहुः। अन्येवाग्नियोनिर्वैश्यकुलमबहुयाजिनेऽपीत्येवमर्थं वा पूर्व्वत्र वैश्यकुलग्रहणमित्यवगन्तव्यम्॥

॥ १६ ॥ * ॥

अपिवाऽन्यं* मथित्वाऽभ्यादध्यात् ॥ १७ ॥

अपि वा,—अथवा । अन्यम्—

"अश्वत्थोयः शमीगर्भः प्रशस्तोर्वीसमुद्भवः ।

तस्य या प्राङ्मुखी शाखा वोदीची वोर्द्धगापि वा" ।

इत्येवमादि कर्म्मप्रदीपोक्तं मन्थनयन्त्रम्—(पुंस्त्वं छान्दसम्)—अरणिं वा ।

"परिधायाहतं वासः प्रावृत्य च यथाविधि ।

बिभृयात् प्राङ्मुखोयन्त्रमावृता वक्ष्यमाणया" ।

इत्येवमादिकया कर्म्मप्रदीपोक्तयैवावृता मथित्वा, अभ्यादध्यादग्निमिति वाक्यशेषः । मथित्वा अरणिं, अन्यम्—परिकीर्त्तितादपरमग्निमारणेयमिति वाऽर्थः । "अरणिप्रदानमेके"—इति ।—"आरणेयमल्पपुण्यकोपकामः"—इति च ग्रन्थान्तरदर्शनात् ॥ ॥ १७ ॥ * ॥

पुण्यस्त्वेवानर्द्धुकोभवतीति ॥ १८ ॥

पुण्यः, पुण्यजनक एव, प्रशस्तत्वादयमारणेयोऽग्निर्भवति । ननु ऋद्धिजनकोपीत्याह—अनर्द्धुकः,—इति । ऋद्धिरिति शस्यवर्षमादिकमुच्यते । तामृद्धिं न जनयतीत्यनर्द्धुकः । तुशब्दो वैशेष्यमवगमयत्यारणेयस्य । आह्मणकुलादियोनयः खल्वग्नयो जनयन्ति

---

* इत्थमेव पाठः सर्व्वेषु सूत्रग्रन्थेषु । भट्टभाष्यग्रास्यसर्व्वस्वयोरपि इत्थमेवेदम्—सूत्रमधारि । परिशिष्टप्रकाशे तु—'अपि वाऽरणिम्'—इति लिखितम् ॥

ब्रह्मवर्चसादिकम्, अथन्त्वारणेयोग्निः तथेत्यनर्हुक इत्याह। तथा च गृह्यान्तरम्। "ब्राह्मणकुलाद्ब्रह्मवर्चसकामोऽग्निमाहृत्यादधीत, राजन्यादोजोवीर्य्यकाम:, वैश्यात् पुत्रपशुकाम:, अम्बरीषाद्‌-अन्नधान्यकाम:, आरणेयमुरुपुण्यलोकषकाम:"—इति। कथन्त्वारणेयोऽग्निर्विशिष्यतेऽनर्हुकत्वात्। नैष दोष:। उरुपुण्यलोकषकारित्वादारणेयस्य। उरुपुण्यलोकषकारी खल्वारणेय एव भवतीति स एव विशिष्यते। स खल्वारणेयोऽग्निरुरुपुण्यलोकषं कुर्व्वाणस्तेनैव ब्रह्मवर्चसादिकमपि कर्त्तुमर्हति। तदधीनत्वात्तेषाम्। अत एव स्मर्य्यते।

"न हि पुण्यकृत: किञ्चित्त्रिषु लोकेषु दुर्लभम्।
दुष्प्रापमपि येनाप्तं ब्राह्मण्यं गाधिसूनुना"।

इति। स्वाधीना चेयमन्या योनि: पराधीना चान्या। दैवाच्च पुनराधातव्येऽग्नौ पूर्व्वैव योनिराश्रयितव्या भवति।—

"पूर्व्वैव योनि: पूर्व्वावृत्पुनराधानकर्म्मणि"।

इति कात्यायनस्मरणात्। "पूर्व्वैवानुगतेऽग्नौ योनि:"—इति च गृह्यान्तरात्। तत्र च स्वाधीनत्वादेवान्या योनि: सुलभा भवति। पराधीनानाञ्च योनीनां सुतरां दुर्लभत्वमिति पराधीनां पूर्व्वां योनिमलभमान: पुनराधाता प्रत्यवेयादिति चारणेयोविशिष्यते। इतरेपि खल्वग्नय: कर्म्मणैवाधानेन ऋद्धिसाधनमित्ययमारणेयोपि काम्यै: स्वनिष्ठऋद्धिसाधनहोमै: शक्नोति प्रणाल्या ऋद्धिं साधयितुमित्यदोष:। अत एव कर्म्मप्रदीपे स्मरति भगवान् कात्यायनोपि।—

"पुण्यमेवादधीताग्निं स हि सर्व्वैः प्रशस्यते ।
अनर्द्धुकत्वं यत्तस्य काम्यैस्तन्नीयते शमम्" ।

इति । इतिरेतावत्य एवाग्नियोनय इति दर्शयति ॥ १८ ॥ * ॥

यथाकामयेत, तथा कुर्य्यात् ॥ १९ ॥

सत्स्वेतेषु आधानकालेषु,—सतीषु चैतास्वग्नियोनिषु, यथाकामयेतेच्छेदाधानकर्त्ता, तथा कुर्य्यादाधानमिति वाक्यशेषः ॥ ॥ १९ ॥ * ॥

स, यदेवान्त्यां समिधमभ्यादधाति, जायाया वा पाणिम्—जिघृक्षन् जुहोति, तमभिसंयच्छेत् ॥ २० ॥

स यथोक्तः कर्त्ता, यदेव यस्मिन्नेवाग्नौ । एवकारादिति कर्त्तव्यतान्तरव्यवच्छेदः । 'अन्त्याम्—समिधमभ्यादधाति'—यस्मिन्नेव वा 'जायायाः पाणिं जिघृक्षन् जुहोति'—लाजादिकमर्थात्; तमग्निमभिसंयच्छेत्, आभिमुख्येन धारयेत्, रक्षेदित्येतत् ॥ ॥ २० ॥ * ॥

स एवास्य गृह्योऽग्निर्भवति ॥ २१ ॥

स यथोक्त एव न पुनरन्य इत्यन्यस्मिन्नग्नावस्य होमप्रतिषेधो गृह्याग्निसम्पाद्यकर्म्मस्वन्याहिते गृह्येपीति विज्ञायते । 'अस्य'—आधातुः, गृह्यो गृहार्थो गृह्यनामा वाऽग्निर्भवति । सोयमग्निराधातुरेव गृह्यो भवति न पुनरन्यस्य इति वा सूत्रार्थः । तदेतत् सर्व्वमाह कात्यायनः ।

"नष्टाहिताग्नेः स्वं कर्म लौकिकेऽग्नौ विधीयते"।

इति।

"यस्याग्नावन्यहोमः स्यात् स वैश्वानरदैवतम्।

चरुं निरूप्य जुहुयात् प्रायश्चित्तन्तु तस्य तत्"।

इति।

"परेणाग्नौ कृते स्वार्थे परस्याग्नौ कृते स्वयम्"।

इति चैवमादि। अस्य चापवादः पुरस्तादेवोक्तः—ब्रह्मचारी वेद-मधीत्यान्त्यां समिधमभ्याधास्यन्नित्यत्र ॥ २१ ॥ ० ॥

तेन चैवास्य प्रातराहुतिर्हुता भवतीति ॥ २२ ॥

तेनान्त्यसमिदाधानेनैव, न त्वन्येन। 'पाणिं जिघृक्षन्'—इत्येतस्मिंश्च कल्पे, तेनैव लाजादिहोमेनेत्येतत्। यस्त्वर्थः—

"वैवाहिकेऽग्नौ कुर्वीत सायम्प्रातस्त्वतन्द्रितः।

चतुर्थीकर्मकृत्वैतदेतच्छाट्यायनेर्मतम्"।

इत्यस्मादपरोऽयं कल्पः—इति दर्शयति। चैवेति वा निपातसमुदायः। गृह्यपरिभाषाकृद्भिरप्युक्तम्—"यदा ऽक्हि विवाहहोमः, तदा सायङ्काले होमारम्भः। यदा रात्रौ विवाहहोमः, तदा उत्तरेद्युः सायङ्काले होमारम्भः"—इति।

"यस्मिन्नह्नि विवाहः स्यात् सायमारभ्य तस्य तु।

परिचर्यां विवाहाग्नेर्विदधीत स्वयं द्विजः।

यदि रात्रौ विवाहाग्निरुत्पन्नः स्यात्तथा सति।

उत्पन्नस्योत्तरस्याह्नः सायं परिचरेदमुम्"।

इति च, अन्त्यमपरम्।—"पाणिग्रहणादिगृह्यं परिचरेत्"—इति च गृह्यान्तरम्।—अत्राग्नेराधातुर्वा प्रातराहुतिर्हुता भवति। इति राधानप्रकरणपरिसमाप्तिं द्योतयति॥ २२॥ ०॥

सायमाहुत्यपक्रम एवात ऊर्द्धं गृह्येऽग्नौ होमो विधीयते॥ २३॥

सायं हूयते इति सायमाहुतिः, सायमाहुत्या उपक्रम्यते आरभ्यते यः, सोयं सायमाहुत्युपक्रमः। केषाञ्चिच्छाखिनामग्निहोत्रं यथा प्रातराहुत्या प्रातरारभ्यते, सायमाहुत्या च निस्तिष्ठते, न तथा कौथुमादीनामित्येतदेव कारेण दर्शयत्याचार्य्यः। तदत्र सायमाहुत्युपक्रमं प्रातराहुत्यन्तमेकमिदं कर्म्मेति विज्ञायते। तदाह कात्यायनः।

"सायमादिप्रातरन्तमेकं कर्म्म प्रचक्षते"।

इति। ततश्च येनैव हविषा—हुतेनाहुतेन वा, दध्ना पयसा वा, सायंहोमः हुतः, तेनैव प्रातर्होमोपि समापनीयोऽन्यत्र प्रतिनिधेः। अपचारे स्वल्पहुतस्य हुतस्य चोपात्तस्य हविषस्तदनुकारिणाऽपरेणैव हविषा प्रातर्होमः कर्त्तव्यो न पुन र्वैकल्पिकं मुख्यमपि हविरुपादेयम्। "सामान्यम्—तच्चिकीर्षा हि"—इति, "निर्देशान्तु विकल्पे यत् प्रवृत्तम्"—इति च सिद्धान्तादित्येषोऽर्थः। अपवर्गविहितमप्यभिरूपभोजनम् प्रातराहुत्यनन्तरमेवे त्यवगन्तव्यम्। सोयं सायमाहुत्युपक्रम एव—'अतः' अस्मादाधानकालात्, 'ऊर्द्धं'—परतो, 'गृह्येऽग्नौ' यथोक्ते, हूयते इति 'होमः—

"तद्युक्ते श्रवणात् जुहोतिरासेचनाधिकः स्यात्"—इत्युक्तलक्षणः, 'विधीयते' क्रियते ॥ २३ ॥ * ॥

पुरा प्रादुष्करणवेलायाः सायंप्रातरनुगुप्ता अप आहरेत् परिचरणीयाः ॥ २४ ॥

पुरा पूर्व्वम्। कस्मात्? । 'प्रादुष्करणवेलायाः'—"पुरास्तमयादग्निं—प्रादुष्कृत्य"—इत्यादिना वक्ष्यमाणायाः । 'सायंप्रातः'—चशब्दश्च—समुच्चयार्थोलुप्तवद्, द्रष्टव्यः । सायंप्रातश्चेत्यर्थः । 'अनुगुप्ता अप आहरेत्'—(कृतभाष्यमेतत्) 'परिचरणीयाः'—परिचर्य्यन्ते निर्व्वाह्यन्ते, आचमनादीनि याभिरिति—"कृत्ययुटोऽन्यत्रापि"—इति वचनादनीयः करणे वेदितव्यः । तदयमर्थः । याभिरद्भिराचमन पर्य्युक्षणादि परिचर्य्यते ; ता इमाः परिचरणीया अपः—इति-सम्बन्धः ॥ २४ ॥ * ॥

अपि वा सायम् ॥ २५ ॥

अपि वा—अथवा । सायं—(पूर्वंचाप्येतदुपादानात्)—सायमेव । अप आहरेत् परिचरणीयाः—इति संबध्यते । सायमाहृताभिरेवाद्भिः सायं प्रातश्च परिचरेदित्यर्थः ॥ २५ ॥ * ॥

अपि वा कुम्भाद्वा मणिकाद्वा गृह्णीयात् ॥ २६ ॥

अपिवेत्याहरेदित्यपेक्षया विकल्पार्थः—अपि वा गृह्णीयादिति । कुम्भात् घटात् वा, मणिरेव मणिकः—तस्मान्मणिकादलिञ्जरात् ।—

महतोजलभाण्डात् वा। वाशब्दद्वयं तुल्यवदनयोर्विकल्पार्थम्। 'गृह्णीयात्'—प्रकृतत्वादपः परिचरणीयाः। "निर्णिक्तकरचरण-मुखी पत्नी स्त्रियो वाऽऽचम्य, कुम्भादेव अप उद्धृत्य दद्यात्, ताभिः परिचरेत्"—इति भट्टभाष्यम्॥ २६ ॥ * ॥

पुरास्तमयादग्निं प्रादुष्कृत्यास्तमिते सायमाहुतिं जुहुयात् ॥ २७ ॥

पुरा, पूर्वस्मिन् काले। कस्मात्?। अस्तमयात्, सवितुरर्थात्। कात्यायनोऽप्याह।—

"सूर्य्येऽस्तशैलमप्राप्ते षट्त्रिंशद्भिरथाऽङ्गुलैः।
प्रादुष्करणमग्नीनां प्रातर्भासाञ्च दर्शनात्"।

इति। तस्मिन्नेतस्मिन् काले। 'अग्निं' आहितं, 'प्रादुष्कृत्य'—प्रकटीकृत्य, प्रज्वाल्येत्येतत्। 'अस्तमिते'—सवितरि।—

"यावत् सम्यङ् न भास्यन्ते नभस्यृक्षाणि सर्व्वतः।
न च लौहित्यमापैति तावत् सायञ्च हूयते"।

इति कर्मप्रदीपपरिदर्शिते काले। 'सायमाहुतिं'—अग्निहोत्रलक्षणां जुहुयात्॥ २७ ॥ * ॥

पुरोदयात् प्रातः प्रादुष्कृत्योदितेऽनुदिते वा प्रातराहुतिं जुहुयात्॥ २८ ॥

पुरा—उदयात्, सवितुः। तमिमं सामान्येनाभिहितं कालं विशिनष्टि—'प्रातर्'—इति।—

"चतस्रोघटिकाप्रातररुणोदय उच्यते"।

इति स्मृत्युक्तलक्षणे—इत्यर्थः। अतएव कात्यायनोऽपि—"प्रातर्भा-साञ्च दर्शनात्"—इत्याह। तस्मिन्नेव खलु काले प्राची दिगरुण किरणारुणीकृता सम्पद्यते। तदेतस्मिन् काले—'प्रादुष्कृत्य'—प्रकाशलादग्निम्। 'उदिते'—उद्गते रवौ।

"हस्तादूर्द्धं रविर्यावद्गुवं हित्वा न गच्छति।

तावद्धोमविधिः पुण्यो नान्योऽभ्युदितहोमिनाम्"।

इति कर्म्मप्रदीपस्पष्टीकृतकाले इत्येतत्। अत्र, "अभ्युदित—इति, अभिशब्दस्य सर्व्वतोभावार्थस्योपादानात् सम्पूर्णसूर्य्यमण्डलदर्शने उदितहोमो न त्वर्द्धोदितादावित्यवगन्तव्यम्"—इति परिशिष्टप्रकाशः। नैवम्। ऐदमर्थ्यानियमात्। न खल्वत्राभेरिदमर्थत्वे किञ्चिन्नियामकमवगम्यते। अनेकार्थाः खल्वेवमादयः शब्दा लोके बहुलमुपलभ्यन्ते, तान्निके स्वागमन्यन्ते। कीर्त्तनस्य चान्यार्थत्वात्। अत्र खल्वभ्युदितहोमिनामित्येतदन्यार्थं संकीर्त्यते। किमर्थम्?। तदुच्यते। तावदेव होमकालः पुण्योनपुनरन्य इत्येतत् खल्विह विधित्सितम्। तस्मात्तदर्थमिदं सङ्कीर्त्तनं नान्यद्विदधाति। यदि पुनरन्यदपि प्रतिपिपादयिषितमिहाभ्युपगम्यते, तर्ह्यर्थभेदाद्वाक्यं भिद्येत! अन्या खल्वस्य वाक्यस्य वचनव्यक्तिरनूद्यमानस्य, अन्यैव विधीयमानस्य। तस्मात् प्राप्तिरहितमन्यार्थसङ्कीर्त्तनमिदमसाधकमस्यार्थस्य—सम्पूर्णसूर्य्यमण्डलदर्शने उदितहोमः—इति। तस्माद् यावदादित्योभुवं हित्वा हस्तादूर्द्धं न गच्छति, उदितहोमिनां तावदेव होमकालः पुण्योनपुनरितोऽप्यधिकं गच्छति,—इत्युक्तार्थं

सूचयितुमृषिरभ्युदितहोमिनामित्याह। स खल्वयम्—उदितहोमिनां नान्यः कालः—इति वक्तव्येऽन्यस्य कालस्यात्यन्तमननुज्ञार्थमभ्युदितहोमिनामित्याह। कथन्नाम?। यं तावदभ्युदितहोमिनस्तेषामपि यदा यावदादित्योहस्तादूर्द्धं न गच्छति, तावानेव होमकालो न परस्तादपि, तदा किमु वक्तव्यमुदितहोमिनाम्?—इति। सोयमभिशब्दोऽस्यार्थस्योपोद्वलको भवति। स खल्वयमभ्युदितहोमोऽस्मन्नप्येवमर्थं मिद्धवन्निर्दिश्यते। सन्नेववाऽनूद्यते। उदितहोमिन एव वा एवं निर्दिश्यन्ते—इति न किञ्चिदनुचितम्। तथाचोक्तम्।

"धात्वर्थं वाधते कश्चित् कश्चित्तमनुवर्त्तते।
तमेव विशिनष्ट्यन्य उपसर्गगतिस्त्रिधा"।

इति। अतएव गृह्यपरिशिष्टम्।

"रेखामात्रन्तु दृश्येत रश्मिभिश्च समन्वितम्।
उदयं तद्विजानीयाद्धोमं कुर्य्याद्विचक्षणः"।

इति। पांशुतुषारादिभिरन्तरिते रवौ यत् कर्त्तव्यं, तदप्याह कात्यायनः।

"रजो नीहारधूमाभ्रवृक्षाग्रान्तरिते रवौ।
सन्ध्यामुद्दिश्य जुहुयात् व्रतमस्य न लुप्यते"।

इति। 'अनुदिते'—उदयमप्राप्ते, 'वा', रवौ, 'प्रातराहुतिं' अग्निहोत्रलक्षणां, 'जुहुयात्'। वाशब्दादुदितानुदितहोमयोर्वैकल्पिकत्वं दर्शयति। एकस्मात्र वाशब्दः श्रूयते—अनुदिते वा—इति। सोयमनुदितहोमो नोदितहोमेन तुल्यवद्विकल्प्यते।

कस्मात्?। वाशब्दद्वयाश्रवणात्। न खलु 'दर्शे वा पौर्णमासे वा'—इत्येवमादिवदिह तथात्वावबोधकं वाशब्दद्वयमस्ति। स खल्वयमुदितहोमोऽन्यस्मात् प्रशस्यते कौथुमादीनामित्यवगम्यते। यस्त्वनुदिते जुहोति, स चेन्न शक्नोत्यनुदिते होतुं; जातुचित् कुतश्चित् प्रतिबन्धात्,—लोप एवास्य प्रातराहुतेर्भवति, न शक्नोत्युदिते जुहुयात्। कस्मात्?। 'उदितेऽनुदिते वा'—इति विकल्पश्रवणात्। विकल्पे च नोभयः शास्त्रार्थः—इति तन्त्रस्थितिः। श्रुतिश्चास्यामेव दशायामुदितहोमं निन्दति। "श्यावोऽस्याहुतिमभ्यवहरति य उदिते जुहोति"—इति। "यथाऽतिथये प्रद्रुतायान्नमाहरेयुस्तादृक् तत्; यदि उदिते जुह्वति"—इति चैवमादिका। आह च भगवानक्षपादः—"अभ्युपेत्यकालभेदे दोषवचनात्"—इति। जैमिनिरपि—"प्रक्रमाद्वा नियोगेन"—इति॥ २८॥ *॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्यात्मजस्य श्रीचन्द्रकान्ततर्कालङ्कारस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये प्रथमप्रपाठकस्य प्रथमा कण्डिका॥ *॥

प्रथमप्रपाठके द्वितीया कण्डिका।

यज्ञोपवीतसम्बन्धमाचमनाचमनञ्च खल्वङ्गं कर्म्मणामित्येतदवगतं—'यज्ञोपवीतिनाचान्तोदकेन कृत्यम्'—इत्यत्र। अथेदानीं तदुभयमपि क्रमेण व्याचिख्यासुः—शिष्यानुजिघृक्षया, यज्ञोपवीतन्तावदाह।—

यज्ञोपवीतं कुरुते सूत्रं वस्त्रं वाऽपि वा कुशरज्जुमेव॥ १॥

यज्ञोपवीतं कुरुते, कुर्व्वीत—धारयेदित्येत्। विध्यर्थे लट्। कीदृशन्तत्?-इत्याह—'सूत्रम्'। सूत्रनिर्म्मितम्।

"त्रिवृदूर्द्ध्ववृतं कार्य्यं तन्तुत्रयमधोवृतम्।
त्रिवृतञ्चोपवीतं स्यात्तस्यैको ग्रन्थिरिष्यते"।

इति कर्म्मप्रदीपोक्तलक्षणमित्यर्थः। अत्र च—

"कार्पासमुपवीतं स्याद्विप्रस्योर्द्ध्ववृतं त्रिवृत्।
शणसूत्रमयं राज्ञो वैश्यस्याविकसौत्रिकम्"।

इति,—"कौषं क्षौमं वा त्रिवृत् यज्ञोपवीतमानाभेः"—इति चैवमादिस्मृत्यन्तरेभ्यो विशेषोऽवगन्तव्यः। मुख्यस्यायं पक्षः, इह वाशब्दाभावात् उत्तरत्र च वाशब्दाम्नानात्—इति भट्टनारायणप्रभृतयः। यत्र—"वाससा यज्ञोपवीतानि कुरुते, तदभावे

विवृता सूत्रेण"—इति निगमपरिशिष्टवाक्यम्। तत्र यज्ञोपवीत-पदमुत्तरीयपरं तद्धर्मविन्यासविशेषलाभार्थम्। यथा "उपःसन्निस्तरित्वा मासमेकमग्निहोत्रं जुहोति"—इति कौण्डपायिनामयनेऽग्निहोत्रपदमग्निहोत्रधर्मप्राप्त्यर्थं गौणम्। एवमिहापीत्यदोषः। एवं बहूनि वचनान्यस्मिन्नेनोपपद्यन्ते। अन्यथा अस्मादेव वाक्यात्तानि वस्त्रालाभविषयाणि वक्तव्यानि। न चैतदुचितम्। कस्मात्?।

"विरोधो यत्र वाक्यानां प्रामाण्यं तत्र भूयसाम्"।

इति स्मरणात्। अतएव स्मर्य्यते।—

"यथा यज्ञोपवीतञ्च धार्य्यते च द्विजोत्तमैः।
तथा सन्धार्य्यते यत्नादुत्तराच्छादनं परम्"।

इति।

"यज्ञोपवीते द्वे धार्य्ये श्रौतस्मार्त्तेषु कर्म्मसु।
तृतीयञ्चोत्तरीयार्थं वस्त्रालाभेतदिष्यते"।

इति चैवमादि। परिशिष्टप्रकाशेप्युक्तम्—"यज्ञोपवीतानीत्युत्तरीये गौणं तद्धर्मविन्यासविशेषप्राप्त्यर्थम्"—इति।

'वस्त्रं वा'—अरण्यादावुपवीतनाशे सूत्रलाभासम्भवात्, यज्ञोपवीतं कुरुते। अन्यथा ह्युपवीतस्य मेहनादावनर्थः स्यात्।

"पिवतो मेहतश्चापि भुञ्जतोऽनुपवीतिनः।
प्राणायामत्रिकं षट्कं नवकञ्च यथाक्रमम्"।

इति स्मरणात्। न खलु समुद्भूतवेगानाममीषां क्षणमपि विलम्बः सम्भवति, वेगप्रतिघातप्रतिषेधाच्च,—इत्यन्यदेतत्।

'अपि वा'—अथवा—(चौरादिभिर्वस्त्रस्यापहारेऽरण्यादौ) 'कुशरज्जुमेव' यज्ञोपवीतं कुरुते। एव शब्दोऽयज्ञोपवीतकरणं नियमति। कर्म्माङ्गमेव यज्ञोपवीतं मन्यमानः, तस्मादन्यत्रायज्ञोपवीती प्रत्यवैतीत्यर्थः। तदत्र यज्ञोपवीतं विहितं पुरुषार्थं यस्य कर्म्मसंयोगः पुरस्तादुक्त इत्यभिप्रायः। तदेतत् कात्यायनेनाप्युक्तम्।

"सदोपवीतिना भाव्यं सदा बद्धशिखेन च।

विशिखो व्युपवीतश्च यत् करोति न तत्कृतम्"।

इति ॥ १ ॥ * ॥

तस्यैव खल्विदानीं यज्ञोपवीतस्य विन्यासविशेषः परिभाष्यते द्वाभ्यां, विनियोगविशेषविवक्षया।—

दक्षिणं बाहुमुद्धृत्य शिरोऽवधाय सव्येंऽसे प्रतिष्ठापयति दक्षिणं कक्षमन्ववलम्बं भवत्येवं यज्ञोपवीतो भवति ॥ २ ॥

दक्षिणं सव्येतरं बाहुं भुजमुद्धृत्योत्क्षिप्य, शिरोमूर्द्धानमवधाय वेष्टयित्वा, 'सव्ये' दक्षिणेतरे—वामे, अंसे स्कन्धे इत्यर्थः। प्रतिष्ठापयति स्थापयति,—यज्ञोपवीतम्। (तथा सति) दक्षिणं कक्षं बाहुमूलकोटरप्रदेशं, अनु-अधः, अवलम्बं लम्बमानं भवति—यज्ञोपवीतमर्थात्। पुरुषस्त्वेवमनेन प्रकारेण यज्ञोपवीती भवति। सेयं परिभाषा कर्म्मार्था—"उपवीतं देवानामुपव्ययते"—इत्येवमादिशास्त्रशेषभूता च। विध्येकवाक्यतया खल्वर्थवादानां प्रमाणमनुमन्यन्ते तान्त्रिकाः—"विधिनात्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः"—इति। न

खल्वयमपूर्व्वस्य यज्ञोपवीतित्वस्य विधिः,—अपि तु संज्ञाविधिरेषः एवं यज्ञोपवीती भवतीति। कस्मात्?। पक्षान्तरे वाक्यभेदात्। अपूर्व्वस्य यज्ञोपवीतित्वस्यायं विधिरित्येतस्मिन् पक्षे भिद्येत वाक्यम्। कथम्?। यज्ञोपवीती भवेत्, स चैवं भवति—इति वचनव्यक्तिभेदात्। न च विशिष्टो विधिः सम्भवति, प्राप्तत्वात् यज्ञोपवीतस्य, अप्राप्तत्वाच्च विन्यासविशेषस्य विध्यनुवादवैषम्यापत्तेः। न च क्लृप्तविधिशेषत्वे सम्भवति कल्प्यविधिशेषत्वं न्याय्यम्। श्रुत्या चैवमवगमात्। श्रुत्या च खल्वेवमवगम्यते—संज्ञाविधिरेवैषः—इति। एवं यज्ञोपवीती भवतीति समाम्नानमेवं खल्वाञ्जस्येनोपपद्यते। नह्यत्र यज्ञोपवीती भवेदित्याम्नायते, किन्तर्हि?—एवम्—अनया रीत्या यज्ञोपवीती भवति—इति। तस्मात्—"उपवीतं देवानामुपव्ययते"—इति, "यज्ञोपवीती निर्व्वर्त्त्य"—इति चैवमादिविधीनामयं शेषः—एवं यज्ञोपवीती भवतीति। ननु यज्ञोपवीतं कुरुते इति पुरुषार्थं यज्ञोपवीतमनूद्य तस्य विन्यासविशेषः परिभाष्यते—एवं यज्ञोपवीती भवति—इति। एवं प्राचीनावीती भवति—इति च। एवन्तर्हि मन्मतमेवानुजानाति भवान्।—यज्ञसूत्रमात्रं पुरुषार्थः, विन्यासविशेषस्तु कर्म्मार्थः—इति। परमार्थतोऽपि, 'यज्ञोपवीतं कुरुते'—इति सूत्रयित्वा, 'एवं यज्ञोपवीती भवति'—इति, 'एवं प्राचीनावीती भवति'—इति च सूत्रयत आचार्य्यस्यास्मदुक्त एवार्थे स्वरसोऽवगम्यते। तदिदमभिहितमस्माभिः—"यज्ञोपवीतिनाचान्तोदकेन कृत्यम्"—इत्यत्र॥

॥ २ ॥ * ॥

सव्यं बाहुमुद्धृत्य शिरोऽवधाय दक्षिणेंऽसे प्रतिष्ठापयति, सव्यं कक्षमन्ववलम्बं भवत्येवं प्राचीनावीती भवति ॥ ३ ॥

सव्यं वामम्। व्याख्यातमन्यत्। यज्ञोपवीतिना कृत्यमित्येतत् व्याचिख्यासुराचार्य्यः प्राचीनावीतित्वमप्यभिदधानोयज्ञोपवीतमस्यास्तीत्यमुमेवार्थं तत्रावगमयति। भाष्यकृत्या खल्वेषा काण्डिका यज्ञोपवीतिनाचान्तोदकेन कृत्यमित्यस्य सूत्रस्य ॥ २ ॥ * ॥

यदर्थं विन्यासविशेषः परिभाषितः स विनियोगविशेष इदानीमभिधीयते।—

पितृयज्ञे त्वेव प्राचीनावीती भवति ॥ ४ ॥

पितृभ्यः, पितॄणां वा, यज्ञः—"यजति चोदनाद्रव्यदेवताक्रियं समुदाये कृतार्थत्वात्"—इत्युक्तलक्षणः, तस्मिन् पितृयज्ञे पितृकर्म्मणीत्येतत्। तुशब्दश्चशब्दार्थोऽन्यदपि समुच्चिनोति। तदाह कात्यायनः।—

"दक्षिणं पातयेज्जानु देवान् परिचरन् सदा।
पातयेदितरज्जानु पितॄन् परिचरन्नपि"।

इति। अथवा। तुशब्दः पितृयज्ञादन्यत् व्यवच्छिनत्ति। तेनान्यत्र विशेषणाभावात् सर्व्वत्र यज्ञोपवीती भवतीति गम्यते। पितृयज्ञमात्रे प्राचीनावीतित्वमभिदधानः खल्वयमाचार्य्योऽर्थादन्यत्र यज्ञोपवीतित्वं दर्शयति। एकः शब्दोऽपरः खल्वार्थोऽप्यर्थो भव-

ति। कर्म्मार्थश्च विन्यासविशेषः पितृयज्ञेऽवकाशमलभमानोऽन्यत्र निविशते। अर्थापत्तिरपि पञ्चमीप्रमाणानामिति हि तन्त्रस्थितिः। अन्यच्च पुरस्तादुक्तम्। एवशब्दश्च पित्र्ये कर्म्मणि प्राचीनावीतित्वं नियमयति। स्मरति च भगवान् मनुः।

"प्राचीनावीतिना सम्यगपसव्यमतन्द्रिणा।
पित्र्यमानिधनात् कार्य्यं विधिवद्दर्भपाणिना"।

इति। ऋज्वर्थमन्यत्॥ ४॥॥*॥

यज्ञोपवीतिना कृत्यमित्येतद्व्याख्यातम्। आचान्तोदकेन कृत्यमित्येतदिदानीं व्याख्यायते।—

उदगग्नेरुत्सृप्य प्रक्षाल्य पाणी पादौ चोपविश्य त्रिराचामेत् द्विः परिमृजीत॥ ५॥

अग्निमाध्यस्याग्निहोत्रस्य प्रकृतत्वात्—गृह्यकर्म्मणः प्रायेणाग्निसाध्यत्वात्, उदगग्नेरित्याह। उदगुत्तरतः। कस्य?। अग्नेः। उत्सृप्योत्क्रम्य (सर्पतिर्गच्छति कर्म्मा) गत्वेत्येतत्। प्रक्षाल्याद्भिः, पाणी हस्तौ, पादौ चरणौ च। तत् कथमित्याह देवलः।

"प्रथमं प्राङ्मुखः स्थित्वा पादौ प्रक्षालयेच्छनैः।
उदङ्मुखो वा दैवत्ये पैतृके दक्षिणामुखः"।

इति। परिशेषादन्यत्राह आपस्तम्बः। "प्रत्यक् पादावसेचनम्"—इति। क्रमश्च पादप्रक्षालने—"सव्यं पादमवनेनिजे इति सव्यं प्रक्षालयेत्, दक्षिणं पादमवनेनिजे इति दक्षिणं प्रक्षालयेत्"—इति

लिङ्गदर्शनादवगन्तव्यः । "सव्यं प्रक्षाल्य दक्षिणं प्रक्षालयति"—इति च स्मृत्यन्तरम् ।—'उपविश्य'—

"अन्तर्जानु शुचौ देशे उपविष्ट उदङ्मुखः ।

प्राग्वा ब्राह्मेण तीर्थेन द्विजोनित्यमुपस्पृशेत्" ।

इति स्मृत्यन्तरोक्तप्रकारेणेत्यर्थः । 'त्रिः'—त्रिवारं, 'आचामेत्'—'आचान्तोदकेन कृत्यम्'—इत्यस्य परिदर्शकतया—'अप' इति वाक्यशेषः । "त्रिः पिबेदम्बु वीक्षितम्"—इति च स्मृत्यन्तरम् । अत्र त्रिराचामेदित्यभिदधान आचार्यः—त्रिरम्भक्षणमाचमनमन्यदिति कर्त्तव्यतेति दर्शयति । मन्त्रार्थमुक्तावल्यामप्येवम् । 'द्विः' वारद्वयम्, 'परिमृजीत'—

"संवृत्याङ्गुष्ठमूलेन द्विः प्रमृज्यात्ततो मुखम्" ।

इति स्मरणान्मुखमङ्गुष्ठमूलेन प्रमृज्यादित्यर्थः ॥ ५ ॥ * ॥

पादावभ्युक्ष्य शिरोऽभ्युक्षेत् ॥ ६ ॥

अद्भिरिति सामर्थ्यात् । स्पष्टमन्यत् । विषमासकरणं पादाभ्युक्षणशेषेण शिरोऽभ्युक्षणनिषेधार्थमिति भट्टभाष्यम् ॥ ६ ॥ * ॥

इन्द्रियाण्यद्भिः संस्पृशेत् ॥ ७ ॥

'इन्द्रियाणि, (इन्द्रियानाममूर्त्तत्वात्) इन्द्रियायतनानि, अद्भिः करणभूताभिः, उदकार्द्रेण हस्तेनेत्येतत् । प्रतीन्द्रियमित्यर्थः । 'संस्पृशेत्'—सम्यक् स्मृत्यन्तरोक्तप्रकारेण स्पृशेत् ॥ ७ ॥ * ॥

कानि तानि इन्द्रियाणि ?—इत्यत आह ।

अक्षिणी नासिके कर्णाविति ॥ ८ ॥

अक्षिणी, चक्षुषी। नासिके, नासाच्छिद्रे। कर्णौ, श्रवणौ। 'स्पृशेत्' इति सम्बध्यते। इतिरन्यदपि स्मृत्यन्तरोक्तं समुच्चिनोति। उपन्यासमात्रमेवेदम्। क्रमश्च शास्त्रान्तरीय एव भवति। तदाह दक्षः।

"प्रक्षाल्य पाणीपादौ च त्रिः पिबेदम्बु वीक्षितम्।
सम्वृत्याङ्गुष्ठमूलेन द्विः प्रमृज्यात्ततो मुखम्।
संहत्य तिसृभिः पूर्व्वमास्यमेवमुपस्पृशेत्।
अङ्गुष्ठेन प्रदेशिन्या घ्राणं पश्चादनन्तरम्।
अङ्गुष्ठानामिकाभ्याञ्च चक्षुः श्रोत्रे पुनः पुनः।
नाभिं कनिष्ठाङ्गुष्ठेन हृदयन्तु तलेन वै।
सर्व्वाभिश्च शिरः पश्चाद्बाहू चाग्रेण संस्पृशेत्"।

इति। तदेतत् सर्व्वं स्पष्टयति कर्म्मप्रदीपे कात्यायनः।

"त्रिः प्राश्यापो द्विरुन्मृज्य मुखमेतानुपस्पृशेत्।
आस्यनासाक्षिकर्णांश्च नाभिवक्षःशिरोंसकान्।
संहताभिस्त्र्यङ्गुलीभिरास्यमेवमुपस्पृशेत्।
अङ्गुष्ठेन प्रदेशिन्या घ्राणञ्चैवमुपस्पृशेत्।
अङ्गुष्ठानामिकाभ्याञ्च चक्षुः श्रोत्रं पुनः पुनः।
कनिष्ठाङ्गुष्ठयोर्नाभिं हृदयन्तु तलेन वै"।

इति ॥ ८ ॥ * ॥

यद्यन्मीमांस्यं स्यात्तत्तदद्भिः संस्पृशेत् ॥ ९ ॥

यत् यत्, इन्द्रियमन्यद्वाऽङ्गं, 'मीमांस्यं'—(मीमांसाविषयः) इदं

प्रक्षुद्रं जातं नवेति सन्देहनिरासाय, विचार्यै—विचारार्थं भव-
ति, तत्तदद्भिरुदकैः, संस्पृशेत्—प्रक्षालयेत्, न तु संशयनिरासाय
विचारं कुर्यादित्यर्थः ॥ ९ ॥ * ॥

तच्चैतदाहुः ॥ १० ॥

तच्च तस्मिन्नाचमने, एतत् वक्ष्यमाणमाहुः ब्राह्मणवाक्यानीति
वाक्यशेषः। सूत्रच्छेदमाभाषान्तं शिष्याणां सुखावबोधार्थं भवति॥
॥ १० ॥ * ॥

नोपस्पृशेद्व्रजन् ॥ ११ ॥

न उपस्पृशेदाचामेत्, व्रजन् (व्रजतिर्गच्छति कर्म्मा) गच्छन्नित्यर्थः ॥
॥ ११ ॥ * ॥

न तिष्ठन् ॥ १२ ॥

न—"उपस्पृशेत्"—इति सम्बध्यते प्रतिवाक्यमितः प्रभृति। तिष्ठन्'—
ऊर्द्धः सन् ॥ १२ ॥ * ॥

न हसन् ॥ १३ ॥

न, स्मयमानः—इति भट्टभाष्यम्। न हास्यं कुर्व्वन्निति फलि-
तार्थः ॥ १० ॥ * ॥

न विलोकयन् ॥ १४ ॥

इतस्ततः किञ्चन विलोकयन्नोपस्पृशेत् ॥ १४ ॥ ० ॥

नाप्रयतः ॥ १५ ॥

उपविष्टोऽप्यप्रयतोऽनवनतशरीरो नोपस्पृशेत्, उच्छिष्टानामपामङ्गेषु पातसम्भवादित्यभिप्रायः ॥ १५ ॥ ० ॥

नाङ्गुलीभिः ॥ १६ ॥

न उपस्पृशेदङ्गुलीभिरूर्द्धमुदकमुत्क्षिप्येत्यर्थः ॥ १६ ॥ ० ॥

नातीर्थेन ॥ १७ ।

तीर्थादाचमनार्थशास्त्रविहिताद् यदन्यत्तदतीर्थमित्युच्यते। पर्य्युदासार्थः खल्वयं निपातः। तेनातीर्थेन पित्र्येण नोपस्पृशेत्। स्मरति च भगवान् मनुः।

"ब्राह्मेण विप्रस्तीर्थेन नित्यकालमुपस्पृशेत्।
कायत्रैदशिकाभ्यां वा न पित्र्येण कदाचन"।

इति। तान्येतानि तीर्थानि—

"कनिष्ठादेशिन्यङ्गुष्ठमूलान्यग्रं करस्य च।
प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात्"।

इति स्मृत्यन्तरादवगन्तव्यानि ॥ १७ ॥ ० ॥

न सशब्दम् ॥ १८ ॥

सशब्दं यथा भवति, न तथोपस्पृशेत् ॥ १८ ॥ ० ॥

नानवेक्षितम् ॥ १९ ॥

अनवेक्षितमदृष्टमुदकं नोपस्पृशेत्। "रात्राववीक्षितेनापि शुद्धि-

दशा मनीषिभिः"—इति स्मरणान्न रात्रावेतन्नियम इति द्रष्टव्यम्॥ ॥१९॥०॥

न वाह्यांसः॥२०॥

जानुभ्यां वाह्यौ—बहिष्कृतावंसौ—"अन्तर्ज्जानुरत्नी कृत्वा शिरपोऽ-ङ्गाद्भिः पिवेत्"—इति स्मृत्यन्तरदर्शनात्—हस्तौ यस्य, सोऽयं वाह्यांसो नोपस्पृशेत्॥२०॥०॥

नान्तरीयैकदेशस्य कल्पयित्वोत्तरीयताम्॥२१॥

अधः परिधानमन्तरीयमित्याचक्षते। तस्यान्तरीयस्य,—एकदेश-स्यावयवस्य, उत्तरीयतां कल्पयित्वा। एकवासा इत्येतत्॥२१॥०॥

नोष्णाभिः॥२२॥

न, उपस्पृशेत्—उष्णाभिः, वह्नितप्ताभिरद्भिर्न पुनर्घर्म्मतप्ताभि-रपीत्यर्थः।

"उदकेनातुराणाञ्च तथोष्णेनोष्णपायिनाम्"।

इति स्मृत्यन्तरदर्शनादनातुरः पुरुष इति वाक्यशेषः॥२२॥

न सफेनाभिः॥२३॥

अद्भिरित्येव॥२३॥०॥

न च सोपानत्कः क्वचित्॥२४॥

चकारोऽप्यर्थे भिन्नक्रमो द्रष्टव्यः। उपानहौ प्रसिद्धे, ताभ्यां

वेष्टितः पुरुषः सोपानत्क इत्युच्यते । सोऽयं सोपानत्कः, क्वचिच्च—कस्याञ्चिदप्यवस्थायाम् ।—

"राज्ञां गुरूणां देवानां न दृश्येदन्तिके चरन्।
आजानुपत्रचरणस्तथाचमनकर्म्मणि"।

इति स्मृत्यन्तरोक्तायामपि । नोपस्पृशेत्। सोऽयं कौथुमादीनां विशेषविधिः । भट्टभाष्ये त्विदं स्मृत्यन्तरमस्यापवादतया वर्णितम् ॥ २४ ॥ ० ॥

कासक्तिकः ॥ २५ ॥

"शिरः प्रावृत्य कण्ठं वा मुक्तकच्छशिखोऽपि वा।
अकृत्वा पादयोः शौचमाचान्तोऽप्यशुचिर्भवेत्"।

इति स्मृत्यन्तरदर्शनात्—'के,' शिरसि, आसक्तिका आवेष्टिका कृता येन, सोऽयं कासक्तिकः कृतशिरोवेष्टनः । 'नोपस्पृशेत्' इति सम्बध्यते । बद्धपरिकरः कञ्चुकी चैवमुच्यते इत्यप्याहुरन्ये ॥ ॥ २५ ॥ ० ॥

गले बद्धः ॥ २६ ॥

गलावलम्बितवासाः, प्रावृतोत्तरासङ्ग इत्येतत्। 'नोपस्पृशेत्'—इत्यनुवर्त्तते ॥ २६ ॥ ० ॥

चरणौ न प्रसार्य्य च ॥ २७ ॥

चरणौ पादौ, प्रसार्य्य वितत्य । चशब्दः—

"नासनारूढचरण आचामेन्न जपेत् क्वचित्"।

इति स्मृत्यन्तरोक्तं समुच्चिनोति। तेन, तथाविधस्य, न, उपस्पृशेत्॥ २७ ॥ ० ॥

अन्ततः प्रत्युपस्पृश्य शुचिर्भवति ॥ २८ ॥

अन्ततोयथोक्ताचमनात् परतः, प्रत्युपस्पृश्य-स्पृष्ट्वोदकं पाणिना, शुचिर्भवति पुरुष इत्यर्थः। अन्ततोमध्यत इन्द्रियायतनान्युपस्पृश्य शुचि र्भवति, न पार्श्वत इत्यन्ये ॥ २८ ॥ ० ॥

हृदयस्पृशस्त्वेवाप आचामेत् ॥ २९ ॥

हृदयं याः स्पृशन्ति, ता इमा हृदयस्पृश एवाप आचामेदिति हृदयस्पृश आपोनियम्यन्ते। तुशब्दश्च च शब्दार्थः—

"हृद्गाभिः पूयते विप्रः कण्ठगाभिस्तु भूमिपः।
वैश्योद्भिः प्राशिताभिश्च शूद्रः स्पृष्टाभिरन्ततः"।

इति स्मृत्यन्तरोक्तं समुच्चिनोति ॥ २९ ॥ ० ॥

उच्छिष्टोहैवातोऽन्यथा भवतीति ॥ ३० ॥

उच्छिष्टोह किल इत्येतिह्यार्थकोऽनर्थको वा निपातः। उच्छिष्ट एव न शुद्ध इत्यर्थः। अतोऽस्मात् यथोक्तात् विधेरन्यथाऽन्येन प्रकारेणाचान्तोऽपि भवति। इति आह्मणवाक्यसमाप्तिं द्योतयति॥ ३० ॥ ०॥

अथ प्रत्युपस्पर्शनानि ॥ ३१ ॥

अथोपस्पर्शानन्तरं प्रति पुनरुपस्पृशन्ति येषु निमित्तेषु, ता-

णीमानि प्रत्युपस्पर्शनानि—द्विराचमननिमित्तानीत्येतत्। वक्ष्यन्ते इति वाक्यशेषः॥ २१ ॥ ० ॥

सुप्त्वा, भुक्त्वा, क्षुत्वा, स्नात्वा, पीत्वा, विपरिधाय च, रथ्यामाक्रम्य, श्मशानञ्चाचान्तः पुनराचामेत् ॥२२॥

सुप्त्वा—निद्रामासेव्य, भुक्त्वा—भक्षयित्वा,—किञ्चिद्भक्ष्यमित्यर्थात्, क्षुत्वा—क्षुतं कृत्वा; स्नात्वा—आप्लुत्य, पीत्वा—पेयमुदकादि, विपरिधाय—वासः। चः समुच्चये।

"होमे भोजनकाले च सन्ध्ययोरुभयोरपि।

आचान्तः पुनराचामेद्वासोविपरिधाय च"।

इत्येवमादिस्मृत्यन्तरोक्तं समुच्चिनोति। रथ्या, प्रतोली, त्रिशिखेत्यनर्थान्तरम्। तामाक्रम्य, शवानां शयनं श्मशानम् चकारादाक्रम्येत्यनुषज्यते। आचान्तः कृताचमनः सन् पुनर्भूय आचामेदिति द्विराचमनमेषु निमित्तेषु कर्त्तव्यमन्यत्र कर्म्मकालात्। तथाच स्मृत्यन्तरम्।

"क्षुते निष्ठीविते सुप्ते परिधानेऽश्रुपातने।

कर्म्मस्थ एषु नाचामेद्दक्षिणश्रवणं स्पृशेत्"।

इति ॥ २२ ॥ ० ॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मजस्य श्रीचन्द्रकान्ततर्कालङ्कारस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये प्रथमप्रपाठकस्य द्वितीया काण्डिका ॥ ० ॥

गोभिलीयगृह्यसूत्रे

प्रथमप्रपाठके तृतीया काण्डिका।

उक्तौ सायंप्रातर्होमकालौ, अथेदानीमाहुतनयोर्वक्तव्या—कथं होतव्यमिति । तामाह।—

अग्निमुपसमाधाय परिसमूह्य दक्षिणजान्वक्तो दक्षिणेनाग्निमदितेऽनुमन्यस्वेत्युदकाञ्जलिं प्रसिञ्चेत्॥ १॥

प्रादुष्कृतमग्निमुपसमीपे होमकालस्य, समाधायेन्धनेन सम्यगाधाय प्रज्वाल्य, परि सर्व्वतोभावेन समूह्य विक्षिप्तानग्न्यवयवानेकीकृत्य, मन्त्रानुपदेशादमन्त्रकमित्यभिप्रायः। यत् पुनराचार्य्य एव समन्त्रकं परिसमूहनं वक्ष्यति—"इमं स्तोममिति त्र्यृचेन परिसमूहेत्"—इति। तदत्र न भवति; परिसमूह्येत्येतावन्मात्रोपदेशात्। तदाह कर्म्मप्रदीपः।

"न कुर्य्यात् क्षिप्रहोमेषु द्विजः परिसमूहनम्।
वैरूपाक्षञ्च न जपेत् प्रपदञ्च विवर्ज्जयेत्"।

इति। क्षिप्रं ये हूयन्ते त इमे क्षिप्रहोमाः सायंप्रातर्होमादय उच्यन्ते। एवं स्तरणमप्यत्र न कर्त्तव्यम्। कस्मात्? इतः परं स्तरणाख्यानात्। इतः परं खल्वाचार्य्यः स्तरणमभिदधानः शास्त्रेषु स्तरणमिति दर्शयति। तदप्याह कर्म्मप्रदीप एव।

"यान्यधः स्तरणाम्नानान्न तेषु स्तरणं भवेत्।
एककार्य्यार्थसाध्यत्वात् परिधीनपि वर्ज्जयेत्"।

इति। अग्नस्थापनमपि नास्त्येव। कस्मात्? तदधः समाम्नानादेव। अत एव गृह्यान्तरम्।

"एकसाध्येष्ववर्हिःषु न स्यात् परिसमूहनम्।
नोदगासादनञ्चैव चिप्रहोमा हि ते स्मृताः"।

इति चिप्रहोमानामेकसाध्यत्वम्—होमामात्रसाध्यत्वं दर्शयति। गृह्यासंग्रहोप्याह।—

"राकाग्नौ पितृयज्ञे च ब्रह्माणं नोपकल्पयेत्।
सायंप्रातश्च होमेषु तथैव वलिकर्म्मसु"।

इति। न्यञ्चकरणन्तु—(इदं भूमेर्भजामह इति)—कर्त्तुमुचितम्। कस्मात्?। "पूर्व्वेषु चैके"—इति तस्य पक्षप्राप्तत्वात्। न खल्वेतत् प्रतिषिध्यते। परमकरणेपि न वैगुण्यं भवति; पक्षप्राप्तत्वादेव। एकेषां खल्वाचार्य्याणां मतम्—कर्त्तव्यमिति, न कर्त्तव्यमिति चापरेषाम्। तस्मात् कारणेऽभ्युदयः, अकरणे चावैगुण्यमिति सिद्धम्।

दक्षिणजान्वक्तः,—दक्षिणं जानु अक्तम्—(अञ्चतिर्गच्छति कर्म्मा) गतं, (भूमिमित्यर्थात्) यस्य, स दक्षिणजान्वक्तः भूमिगतदक्षिणजानुक उच्यते। स खल्वयं दक्षिणजान्वक्तः, 'दक्षिणेनाग्निं' दक्षिणस्यामदूरवर्त्तिन्यान्दिश्यग्नेः, अदितेऽनुमन्यस्वेत्यनेन मन्त्रेण करणभूतेन (तस्मान्मन्त्रं पठित्वेत्यर्थः। "मन्त्रान्ते कर्म्मादीन् सन्निपातयेत्"—इति स्मरणाच्च।) 'उद-

काञ्जलिं' विन्यासविशेषविशिष्टहस्तावञ्जलिरित्याचक्षते। 'उदकपूरितोऽञ्जलिः, अञ्जलेर्व्वा उदकमित्युदकाञ्जलिः। तमिममुदकाञ्जलिं प्रसिञ्चेत् प्रागग्रमित्यर्थः। अग्नेः खलु दक्षिणस्यामदूरवर्त्तिन्यां दिश्ययं प्रसेकः पूर्व्वाभिमुखस्य होता भवति। "प्राञ्चि उदञ्चि वा कर्म्माण्यनुतिष्ठेरन्"—इति च ब्राह्मणम् ॥ १ ॥ * ॥

अनुमतेऽनुमन्यस्वेति पश्चात् ॥ २ ॥

पश्चात् पश्चिमस्यां दिश्यग्नेः—उदकाञ्जलिं प्रसिञ्चेदित्यनुवर्त्तते। उदगग्रमित्यर्थः। कृतभाष्यमन्यत् ॥ २ ॥ * ॥

सरस्वत्यनुमन्यस्वेत्युत्तरतः ॥ ३ ॥

उत्तरत उत्तरस्यां दिश्यग्नेरुदकाञ्जलिं प्रसिञ्चेत् पूर्व्वाग्रम्। स्पष्टमन्यत् ॥ ३ ॥ ० ॥

देवसवितः प्रसुवेति प्रदक्षिणमग्निं पर्य्युक्षेत् सकृद्वा त्रिर्वा ॥ ४ ॥

देवसवितः प्रसुवेत्यनेन मन्त्रेणकरणभूतेन प्रदक्षिणं यथा भवत्यग्नेस्तथाऽग्निं पर्य्युक्षेत् परिषिञ्चेदेष्टव्यदुदकाञ्जलिधारयेत्यर्थः। सकृदेकवारं वा त्रिर्व्वारत्रयं वा यथा भवति तथा पर्य्युक्षेदिति क्रियाविशेषणमेतत्। पर्य्युक्षणस्येदावर्त्त्यते मन्त्रोऽप्यावर्त्तनीयः। करणत्वादस्य। प्रधानस्य खल्वावृत्तौ तदनुयायिनो गुणा अप्यावर्त्तन्ते। वाशब्दौ तुल्यवद्विकल्पार्थौ। तदत्र

चिरावृत्तिपक्षे फलभूमाकल्पनीयः। इतरथा लघुप्रयत्नसाध्य
मसकृत् पर्य्युक्षणे यावानर्थस्तावानेव चेत् गुरुप्रयत्नसाध्ये पक्षा-
न्तरेपि स्यात्;—स्यात्तर्ह्यप्रामाण्यमेवाननुष्ठानलक्षणमस्य। कः
खल्वनुन्मत्तः सत्यपल्पीयस्युपाये तावन्तमेवार्थमुत्पिपादयिषु गरी-
यांसमुपायमुपादत्ते। अत एवाह कात्यायनः।—

"यत्र स्यात् कृच्छ्रभूयस्त्वं श्रेयसोपि मणीषिणः।
भूयस्त्वं ब्रुवते तत्र कृच्छ्रात् श्रेयो ह्यवाप्यते"।

इति॥ ४ ॥ ० ॥

पर्य्युक्षणप्रकारमाह।—

पर्य्युक्षणान्तान् व्यतिहरन्नभिपर्य्युक्षन् होमी-
यम्॥ ५ ॥

इण्डरज्जूदकधारादिष्वादिरयन्त शब्दो भवतीत्याहुः। वक्ष्यमाण-
नस्रुतिस्त्रिर्वेति पक्षाभिप्राया। तदयमर्थः। पर्य्युक्षणानां पर्य्युक्ष-
णोदकधाराणामन्तान् व्यतिहरन् अभ्यन्तरतः कुर्व्वन्नित्यर्थः।
अनेनैतदुक्तं भवति। पर्य्युक्षणारम्भकोटिमभ्यन्तरतोऽवसानको-
टिञ्च वहिः कुर्य्यादिति। व्यतिहरन् व्यतियोजयन् मिश्रीकु-
र्व्वन्निति वा। अन्ये त्वाहुः—व्यतिहारो विकर्षः व्यतिहरन् विकृष्टा-
न्तरालान् कुर्व्वन्नित्यर्थः—इति। होमीयं होमार्थमुपक्लृप्तं श्री-
ह्यादि, अभिपर्य्युक्षन् धारया अभ्यन्तरतः कुर्व्वन्नित्यर्थः।
अथवा। अभिपर्य्युक्षन् आभिमुख्येन सिञ्चन् स्पर्शयन्नित्येतत्।
पर्य्युक्षेदग्निमिति पूर्व्वसूत्रस्थं सम्बध्यते॥ ५ ॥ ० ॥

अथ हविष्यस्यान्नस्याग्नौ जुहुयात् कृतस्य वाऽकृतस्य वा ॥ ६॥

अथेत्यानन्तर्य्यार्थोविशिष्टमानन्तर्य्यमभिद्योतयति ।

"समिदादिषु होमेषु मन्त्रदैवतवर्ज्जिता ।
पुरस्ताच्चोपरिष्टाच्च इन्धनार्थं समिद्भवेत्" ।

इति कर्म्मप्रदीपदर्शनात् पर्य्युक्षणानन्तरं तूष्णीं समिधम् धायेत्यर्थः । समिच्च प्रोक्षितैवाधातव्येत्याहापस्तम्बः । "नाप्रोक्षितमिन्धनमग्नावादध्यात्"—इति । हविष्यस्य हविषिसाधोः—

"हविष्येषु यवा मुख्यास्तदनुव्रीहयः स्मृताः ।
माषकोद्रवगौरादीन् सर्व्वालाभेपि वर्ज्जयेत्" ।

इति कर्म्मप्रदीपोक्तस्य माषकोद्रवादिवर्ज्जस्य यवादेः । अन्नस्य अदनीयस्य कीटाद्यदुष्टतया भक्षणयोग्यस्येत्येतत् । षष्ठी चेयं सम्बन्धार्था । हविष्येनान्नेनाग्नौ जुहुयात् होममभिनिर्व्वर्त्तयेदित्यर्थः । अथवा । अवयवार्थैवेयं षष्ठीद्रष्टव्या । हविष्यस्यान्नस्यावयवेन होममभिनिर्वर्त्तयेत्—इति । किमनेनोक्तं भवति ? । एतदनेनोक्तं भवति । न सर्व्वमिह हविष्यमन्नं होतव्यम् । किन्तर्हि ? । अवयवस्तस्य होतव्यः—यथाऽनग्निश्यते तथा होतव्यम्—इति । स खल्वयं होमः—

"होमपात्रमनादेशे द्रवद्रव्ये स्रुवः स्मृतः ।
पाणिरेवेतरस्मिंस्तु स्रुचा चात्र न हूयते" ।

इति ।

"पाण्याहुतिर्द्वादशपर्व्वपूरिका
कंसादिना चेत् स्रुवमात्रपूरिका।
दैवेन तीर्थेन च हूयते हवि—
र्व्यङ्गारिणि स्वर्चिषि तच्च पावके"।

इति च कर्म्मप्रदीपदर्शनात्।—

"उत्तानेनैव हस्तेन ह्यङ्गुष्ठाग्रेण पीडितम्।
संहताङ्गुलिपाणिस्तु वाग्यतो जुहुयाद्धविः"।

इति च स्मरणात्, यथोक्तप्रमाणं यथोक्तं हविर्गृहीत्वा यथोक्तेन प्रकारेण दक्षिणेन पाणिना कर्त्तव्यः। अत्र च पुनः—'अग्नौ'—इति सूचयन्नाचार्य्यः—समिद्धे वह्नौ होतव्यमिति द्योतयति। सूचितं खल्वाचार्य्येण पुरस्तादेव—"गृह्योऽग्नौ होमो विधीयते"—इति। तदाह कर्म्मप्रदीपः।—

"योऽनर्च्चिषि जुहोत्यग्नौ व्यङ्गारिणि च मानवः।
मन्दाग्निरामयावी च दरिद्रश्चोपजायते।
तस्मात् समिद्धे होतव्यं नासमिद्धे कदाचन।
आरोग्यमिच्छतायुश्च श्रियमात्यन्तिकीन्तथा"।

इति। समिन्धनञ्चाग्नेर्व्यजनादिनाकर्त्तव्यमित्यप्याह स एव।

"जुह्वत्सु स्त्रुतेचैव पाणिशूर्पस्फ्यदारुभिः।
न कुर्य्यादग्निधमनं कुर्य्याद्वा व्यजनादिना।
मुखेनैके धमन्त्यग्निं मुखाद्ध्येषोऽध्यजायत।
नाग्निं मुखेनेति च यल्लौकिके योजयन्ति तत्"।

इति। होमे च कर्त्तव्ये यत्र यदभिधानोऽग्निस्तत्र तमाह्वयसं-पूज्य होतव्यम्—

"सम्पूजयेत्ततो वह्निं दद्याच्चैवाहुतीः क्रमात्"।

इति।

"आह्वय चैव होतव्यं यत्र यो विहितोऽनलः"।

इति चैव मादिस्मरणात्। यत्र चाग्निर्यदभिधानो भवति तदाह गृह्यासंग्रहः।

"लौकिके पावको ह्यग्निः प्रथमः परिकीर्त्तितः।
अग्निस्तु मारुतो नाम गर्भाधाने विधीयते।
पुंसवने चन्द्रनामा शुङ्गाकर्म्मणि शोभनः।
सीमन्ते मङ्गलो नाम प्रगल्भो जातकर्म्मणि।
नाम्नि स्यात् पार्थिवो ह्यग्निः प्राशने च शुचिस्तथा।
सत्यनामा च चूडायां व्रतादेशे समुद्भवः।
गोदाने सूर्य्यनामा स्यात् केशान्ते ह्यग्निरुच्यते।
वैश्वानरोविसर्गे च विवाहे योजकः स्मृतः।
चतुर्थ्यान्तु शिखी नाम धृतिरग्निस्तथाऽपरे।
प्रायश्चित्ते विधुश्चैव पाकयज्ञे च साहसः।
लक्षहोमे च वह्निः स्यात् कोटिहोमे हुताशनः।
पूर्णाहुत्यां मृडोनाम शान्तिके वरदस्तथा।
पौष्टिके बलदश्चैव क्रोधोऽग्निश्चाभिचारिके।
कोष्ठे तु जठरो नाम क्रव्यादोमृतभक्षणे"।

इति। विशेषनामासम्भवे च विश्वरूपो नामाग्निः सर्व्वत्र भवति।

"सर्व्वतः पाणिपादान्तः सर्व्वतोऽक्षिशिरोमुखः।
विश्वरूपो महानग्निः प्रणीतः सर्व्वकर्म्मसु"।

इति वचनात्। हविर्द्रव्यस्यानस्येत्येतद्विशिनष्टि;—'कृतस्य' ओदनादेर्वा, 'अकृतस्य' व्रीह्यादेर्वा। तदाह कात्यायनः।

"कृतमोदनसक्त्वादि तण्डुलादि कृताकृतम्।
व्रीह्यादि चाकृतं प्रोक्तमिति हव्यं त्रिधा मतम्"।

इति। व्याख्यातौ वाशब्दौ ॥ ६ ॥ * ॥

अकृतञ्चेत् प्रक्षाल्य जुहुयात् प्रोदकं कृत्वा ॥ ७ ॥

अकृतं व्रीह्यादि, चेत् यदि, जुहुयात्,—तर्हि पूर्व्वमेव तत् प्रक्षाल्य—"त्रिर्देवेभ्यः प्रक्षालयेदित्याहुः"—इति लिङ्गदर्शनात् देवार्थत्वाच्चास्य वारत्रयमिति वाक्यशेषः। प्रगतमुदकं यस्मात्तदिदं प्रोदकम्—प्रगतोदकं कृत्वा जुहुयात्। तदयमर्थः। पूर्व्वमेव व्रीह्यादि प्रक्षाल्य प्रगतोदकञ्च कृत्वा संस्थापयेत् शुचौ भाजने। आगते च होमकाले तस्मादेवोद्धृत्योद्धृत्य जुहुयात्। न तु होमकाले प्रक्षालयेत्। अप्रगतोदकतयाऽग्नेरपचयापत्तेरित्यभिप्रायः। शब्दप्रमाणकत्वादस्यार्थस्य न किमपि शङ्कितव्यम्। तस्मादेव च नास्ति कृतस्य प्रक्षालनापेक्षा। न खल्वस्ति शब्दः—कृतं प्रक्षालयेदिति ॥ ७ ॥ ० ॥

अथ यदि दधिपयोयवागूं वा, कंसेन वा चरुस्थाल्या वा स्रुवेण वै वा ॥ ८ ॥

अथ व्रीहियवयोरभावे, यदि—दधि, पयो, यवागूं वा जुहुयात्।

यवागूर्यवसूक्तः। स खल्वयं दध्यादिहोमानुवादो दध्यादिहोमविधिमनुमापयति—(ब्रीहियवयोरभावे दध्यादि जुहुयादिति)। कस्मात्?। प्राप्त्यनुसारित्वादनुवादस्य। यथा चतुरवत्तं पञ्चावत्तं वा जुहोतीति होमानुवादो होमविधिमिति शूलपाणिः। यथा वा—

"असंस्कृतप्रमीतानां त्यागिनां कुलयोषिताम्।
उच्छिष्टं भागधेयं स्याद्दर्भेषु विकिरश्च यः"।

इति दर्भेषु विकिरानुवादो दर्भेषु विकिरविधिम्। तथा चोक्तम्।

"लिङ्गादपि विधिर्ज्ञेयो दर्भेषु विकिरो यथा"।

इति। यथा वा—"यद्युवा उभयं चिकीर्षेद्धोतुश्चैव ब्रह्मत्वञ्चैव"—इत्युभयचिकीर्षानुवादस्तदुभयचिकीर्षाविधिमिति। दृश्यते च—"यदि ब्राह्मणो यजेत, वार्हस्पत्यं मध्ये निधायाहुतिमाहुतिं हुत्वाऽभिधारयेत्, यदि राजन्य ऐन्द्रं, यदि वैश्यो वैश्वदेवम्"—इति स यदि कादध्याम्नानात् ब्राह्मणादीनां क्रतोर्विधानमिति। तथा च गृह्यान्तरम्।

"अभावे ब्रीहियवयोर्दध्ना वा पयसापि वा।
तदभावे यवाग्वा वा जुहुयादुदकेन वा"।

इति। तदयमर्थः। यदि ब्रीहियवयोरभावे दधिपयो जुहुयात्—"खादिरे बध्नाति, पालाशे बध्नाति, रोहितके बध्नाति"—इतिवदनयोरपि दधिपयसोर्विकल्पः। वाशब्दाभावस्तु तुल्यवद्विकल्पार्थः। तयोरप्यभावे यदि यवागूं वा जुहुयात्—तर्हि

कंसेन कांस्यभाजनेन वा जुहुयात्। 'चरुस्थाल्या' चरुर्यत्र श्रप्यते, सा चरुस्थालीत्युच्यते। तया चरुस्थाल्या—

"तिर्य्यगूर्द्धं समिन्मात्रा दृढ़ा नातिबृहन्मुखी।
मृण्मय्यौदुम्बरी वापि चरुस्थाली प्रशस्यते"।

इति कर्म्मप्रदीपोक्तलक्षणया वा जुहुयात्। 'स्रुवेण', स्रुवः खलु होमपात्रमुच्यते—

"खादिरो वाथ पालाशो द्विवितस्तिः स्रुवः स्मृतः।
स्रग्वाङ्गमात्रा विज्ञेया वृत्तस्तु प्रग्रहस्तयोः।
स्रुवाग्रे घ्राणवत् खातं द्व्यङ्गुष्ठपरिमण्डलम्।
जुह्वाः शराववत् खातं सनिर्व्वाहं षडङ्गुलम्"।

इति कर्म्मप्रदीपोक्तलक्षणः। तेन स्रुवेण वा जुहुयात्। 'वै'—इति प्रसिद्धार्थकोनिपातः स्रुवस्यैवम्विधेषु होमेषु प्रसिद्धिं द्योतयति। कात्यायनोप्याह।

"होमपात्रमनादेशे द्रवद्रव्ये स्रुवः स्मृतः"।

इति। ततश्चाभावविकल्पोयम्—'कंसेन वा चरुस्थाल्या वा'—इति। तस्मात् स्रुवेणेति प्रथमः कल्पः। तस्य खल्वभावे कंसचरुस्थाल्योर्विकल्प इति सिद्धम्।

केचिदत्र सूत्रद्वयं कल्पयन्ति। तत्र—"अथ यदि दधिपयो-यवागूं वा"—इत्येकं, "कंसेन वा चरुस्थाल्या वा स्रुवेण वै वा"—इति चैकं सूत्रमिति मन्यन्ते। विवरणञ्चेत्थं कुर्व्वन्ति।—अथ यदिशब्दौ प्रश्नाध्याहारार्थौ। अथ यदि व्रीहियवयोरभावः स्यात् किं जुहुयात्?—इति प्रश्नोऽध्याहारार्थः। एवं पृष्ट

आह—दधि जुहुयात्, पयो जुहुयात्, तयोरप्यभावे यवागूं वा जुहुयात्। ओष्ठ्यादेस्तावत् पाणिना होमः सिद्धः, दध्यादि केन जुहुयात्?—इत्यत आह। "कंसेन वा चरुस्थाल्या वा स्रुवेण वै वा"। उक्तार्थमन्यत् ॥ ८ ॥ * ॥

अग्नये स्वाहेति पूर्व्वां तूष्णीमेवोत्तरां मध्ये चैवापराजितायाञ्चैव दिशीतिसायम् ॥ ९ ॥

अग्नये स्वाहेत्यनेन मन्त्रेण पठितेन पूर्व्वां प्रथमां यथोक्तहविराहुतिमग्निहोत्रलक्षणां जुहुयात्। ताञ्चेमां पूर्व्वामाहुतिं मध्य एवाग्ने जुहुयात्—न तु दध्यादिहोमपक्षेप्यग्नेरपचयाशङ्कां कुर्य्यादित्येवकारार्थः। तूष्णीमेवेत्येवकारो वाग्व्यापारप्रतिषेधं नियमयत्युत्तरस्यामाहुत्याम्। सेयमुत्तराहुतिर्मन्त्रदैवतयोरनादेशात्, प्रधानाहुतिद्वया चामन्त्रदैवतताया अनुचितत्वात्,—"तद्युक्ते श्रवणाज्जुहोतिरासेचनाधिकः स्यात्"—इति च देवतानियमात्, प्रजापतये स्वाहेति मनसैवोच्चार्य्य मन्त्रं होतव्या। कस्मात् पुनः कारणात् प्रजापतये स्वाहेत्ययमत्र मन्त्रो भवति?।

"आज्यं द्रव्यमनादेशे जुहोतिषु विधीयते।

मन्त्रस्य देवतायाश्च प्रजापतिरितिस्थितिः।

इति कात्यायनस्मरणात्। न खलु वाग्व्यापारप्रतिषेधनियमेपि मनसोव्यापारः प्रतिषिद्धो भवति। तस्मात् प्रजापतये स्वाहेत्ययं मन्त्रः मनसैवोच्चारणीयो होमार्थम्। "यदग्नये च प्रजापतये च सायं जुहोति"—इति। "तस्मात् प्राजापत्यां मनसा जुहोति मनो

हि प्रजापतिः"—इति च ब्राह्मणम्। "अग्नये स्वाहा प्रजापतये स्वाहा इति सायं, सूर्य्याय स्वाहा प्रजापतये स्वाहा इति प्रातः"—इति च गृह्यान्तरम्। ताञ्चेमामुत्तराहुतिमपराजितायां दिश्यग्नेर्जुहुयात्। अपराजिता, प्रागुत्तरा ऐशानीत्यनर्थान्तरम्। 'इति' अनेन प्रकारेण सायं जुहुयादग्निहोत्रलक्षणम्॥ ९ ॥ ० ॥

अथ प्रातः,—सूर्य्याय स्वाहेतिपूर्व्वां, तूष्णीमेवोत्तरां मध्ये चैवापराजितायाञ्चैव दिशि ॥ १० ॥

अथेतिपूर्व्वप्रकृतार्थम्। येनैव हविषा सायं होमः कृतः,—कृतेन वा, अकृतेन वा, दध्ना वा, पयसा वा;—तेनैव प्रातरपि होतव्यमन्यत्र प्रतिनिधेरिति खल्ववोचाम—"सायमाहुत्युपक्रम एवातऊर्द्ध्वं गृह्येऽग्नौ होमोविधीयते"—इत्यत्र। 'प्रातर्'—यथोक्तलक्षणे। कृतभाष्यमन्यत् ॥ १० ॥ * ॥

समिधमाधायानुपर्य्युक्ष्य तथैवोदकाञ्जलीन् प्रसिञ्चेदन्वमंस्था इति मन्त्रविशेषः ॥ ११ ॥

समिधं मन्त्रदैवतवर्ज्जितां प्रकृतहोमापवर्गविहितामिन्धनार्थामाधाय निःक्षिप्याग्नौ, अनुपर्य्युक्ष्याग्निं 'देवसवितः प्रसुव'—इत्यनेन मन्त्रेणेत्यर्थः। तथैव तेनैव प्रकारेण, पूर्व्वोक्तयैवावृता उदकाञ्जलीन् प्रसिञ्चेत्—'अदिते'—इत्येवमादिभिर्मन्त्रैः। 'अनुमन्यस्व'—इत्येतस्मिंश्च स्थानत्रये, 'अन्वमंस्थाः'—इति मन्त्रविशेषः मन्त्रस्य विशेषः कर्त्तव्य इति वाक्यशेषः ॥ ११ ॥ * ॥

प्रदक्षिणमग्निं परिक्रम्यापां शेषं निनीय पूरयित्वा चमसं प्रतिष्ठाप्य यथार्थम् ॥ १२ ॥

प्रदक्षिणं यथा भवति, तथाग्निं परिक्रम्यापां परिचरणीयानां शेषमवशिष्टं परिचरणकर्म्मणः, निनीय संस्थाप्य। संस्थापितानामप्यपां पुनः संस्थापनवचनमपरित्याज्यत्वं दर्शयति। अथवा। निनीय मिश्रयित्वा, अन्याभिरद्भिः, पूरयित्वा चमसं पात्रविशेषम्। आचमनमितिपाठेपि, आचम्यतेऽनेनेत्याचमनं पात्रमेवार्थः। तच्च पात्रं प्रतिष्ठाप्य, आत्मनोऽन्तिके स्थापयित्वा, यथार्थं कर्म्मापवर्गविहितं वामदेव्यगानादिकं, प्रातराहुतिपश्चाद्विहितं ब्रह्मयज्ञं वा कुर्य्यादिति वाक्यशेषः। तत्र प्रमाणं वक्ष्यामः। प्रातराहुत्यनन्तरञ्चेद्ब्रह्मयज्ञः क्रियते, तदा वामदेव्यगानमपि तदन्त एव कर्त्तव्यम्। न त्विदानीमेव प्रातराहुत्यन्ते। 'वामदेव्यं गणेष्वन्ते'— इति कात्यायनस्मरणात्। तदिदं पुनरुदकपात्रपरिपूरणमुदकालम्भनार्थमेव भवति। नत्वदृष्टार्थम्।—

"यस्य दृष्टं न लभ्येत तस्यादृष्टं प्रकल्प्यते"।

इति ह्यभियुक्ताः स्मरन्ति। विहितं खल्वेतदुदकालम्भनं कर्म्म-कुर्व्वतोनिमित्तविशेषेषु। तदाह कर्म्मप्रदीपः।

"पित्र्यमन्त्रानुद्रवणे आत्मालम्भे अवेक्षणे।
अधोवायुसमुत्सर्गे प्रहासेऽनृतभाषणे।
मार्ज्जारमूषिकस्पर्शे आक्रुष्टे क्रोधसम्भवे।
निमित्तेष्वेषु सर्व्वत्र कर्म्म कुर्व्वन्नपः स्पृशेत्"।

इति।

"रौद्रञ्च राक्षसं पित्र्यमासुरञ्चाभिचारिकम्।
उक्त्वा मन्त्रं स्पृशेदाप आलभ्यात्मानमेव च"।

इति च गृह्यान्तरम्॥ १२॥ * ॥

एवमत ऊर्द्ध्वं गृह्येऽग्नौ जुहुयाद्वा हावयेद्वाऽऽजीवितावभृथात्॥ १३॥

एवमनेन प्रकारेणातोऽस्मात् पूर्व्वोक्ताद्धोमद्वयादूर्द्ध्वं परतः, गृह्येऽग्नौ—(पुनरुपादानात्—अन्यान्यपि यानि कर्म्माणि गृह्येऽग्नौ विधीयन्ते, तेष्वपि, न पुनरग्निहोत्रमात्र एवेत्यर्थः।)—जुहुयाद्वा स्वयं, सम्भवश्चेत्, हावयेद्वा पुत्रादिभिरसम्भवश्चेत्। असम्भवकारणञ्चोक्तं कात्यायनेन कर्म्मप्रदीपे।

"सूतके च प्रवासे च अशक्तौ श्राद्धभोजने।
एवमादि निमित्तेषु हावयेदिति योजयेत्"।

इति। यदा पुनरसमर्थो व्याध्यादिना हावयति, तदा यत् कर्त्तव्यं तदप्याह स एव।

"स्वयं होमासमर्थस्य समीपमुपसर्पणम्।
तत्राप्यशक्तस्य सतः शयनाच्चोपवेशनम्"।

इति। तदनेन, नायं तुल्यवद्विकल्पः—जुहुयाद्वा हावयेद्वा—इति। किन्तर्हि?—व्यवस्थितोऽयं विकल्पः। कथं नाम?—सम्भवे जुहुयात्, असम्भवे हावयेदिति यथोक्तैव व्यवस्था।

"सन्ध्याकर्म्मावसाने तु स्वयं होमोविधीयते।
स्वयं होमे फलं यत्तु तदन्येन न जायते"।

इति च स्मृत्यन्तरम्। तदत्राद्यमग्निहोत्रहोमद्वयं स्वयमेव कर्त्त-व्यम। कस्मात्?। अत ऊर्द्धम्—इत्यभिधानात्। अत ऊर्द्धमिति खल्वभिदधान आचार्य्य आद्ये होमद्वये नायं विकल्पः—(जुहुयाद्वा हावयेद्वेति)—इति दर्शयति। तस्मादाद्यं होमद्वयं स्वयमेव कर्त्तव्यम्, ऊर्द्धन्त्वस्मात् जुहुयाद्वा हावयेद्वेति सिद्धम्। तस्य खल्वेतस्याग्नि-होत्रस्यावधिरुच्यते—'आजीविताववभृथात्'—इति। अवभृथोऽव-सान्त इत्यनर्थान्तरम्। जीवितस्यावभृथोऽन्तोविनाशः क्षय इत्ये-कोऽर्थः। तस्मात् जीविताववभृथात् आ। (पदद्वयञ्चेदम्)। जीवित-क्षयपर्य्यन्तमित्यर्थः। तथाच श्रुयते। "यावज्जीवमग्निहोत्रं जुहोति"—इति। "एतद्वै जरामर्य्यं सत्रं यदग्निहोत्रं, जरया वा ह्येवास्मान्मुच्यते मृत्युनाच"—इति। "जरामर्य्यं वा एतत् सत्रं यदग्निहोत्रं दर्शपूर्णमासौ च, जरया ह वा एताभ्यां निर्मुच्यते, मृत्युना च"—इति चैवमादि॥ १३ ॥ * ॥

अथाप्युदाहरन्ति ॥ १४ ॥

अथेति पूर्व्वप्रकृतार्थम्। अथ यत् प्रकृतं—हावयेद्वेति, तदस्यार्थस्य द्रढिम्ने ब्राह्मणवाक्यमप्युदाहरन्ति शिष्टा इत्याभाषान्तं सूत्रम्॥ ॥ १४ ॥ * ॥

कामं गृह्येऽग्नौ पत्नी जुहुतात् सायंप्रातर्होमौ, गृहाः पत्नी, गृह्यएषोऽग्निर्भवतीति ॥ १५ ॥

काममित्यनुमत्यर्थकोनिपातः। अस्मामर्थ्ये गृह्येऽग्नौ पत्नी जुहुयात्

सायंप्रातर्होमौ। गृह्योऽग्नौ खल्वयं होम इति पत्नी जुहुयात्। कस्मात्?। तदुच्यते। गृह्याः पत्नी, एष चाग्निर्गृह्य इति स्माच- चते। तथाच—एतस्मात् समाख्यानात् पत्नी जुहुयात्। तथाच स्मर्य्यते।

"न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते।

तयाहि सहितः सर्व्वान् पुरुषार्थान् समश्नुते"।

इति। ततश्च यावता होमनिष्पत्तिर्भवति, तावन्मात्रं पत्नीमध्याप- येत्। कस्मात्?। पत्नी जुहुयादितिवचनात्। न खल्वनधीत्य शक्नोति पत्नी होतुम्। न च तूष्णीमित्याह वचनम्। किमिव हि वचनं न कुर्य्यान्नास्ति वचनस्यातिभारः—इति हि तन्त्रस्थितिः। सा खल्वियं पत्नी होतुरन्यस्याभाव एव जुहुयात्। कस्मात्?—

"निक्षिप्याग्निं स्वदारेषु परिकल्प्यर्त्विजन्तथा।

प्रवसेत् कार्य्यवान् विप्रो वृथैव न चिरं क्वचित्"।

इति कर्म्मप्रदीपवाक्ये ऋत्विक् परिकल्पनस्यार्थवत्त्वात्।

"असमक्षन्तु दम्पत्योर्होतव्यं नर्त्विगादिना।

द्वयोरप्यसमक्षन्तु भवेद्धुतमनर्थकम्"।

इति च तस्याः समक्षमेवर्त्विगादिना होमानुष्ठानात्। यदपि स्मरणम्—

"पत्नी पुत्रः कुमारी वा शिष्योवापि यथाक्रमम्।

पूर्व्वपूर्व्वस्य चाभावे विदध्यादुत्तरोत्तरः"।

इति। तदपि नास्माकं सम्भवति। कुमारीश्रवणात्। न खल्व- स्माकं स्वशास्त्रे कुमार्य्या होतव्यमिति श्रूयते। इतश्च। स्वशास्त्र-

विरोधात्। खशास्ते खल्वस्माकं पत्न्याः समक्षमेवर्त्विगादिना होमोऽनुज्ञायते इत्यवोचाम। न च पत्न्याः अप्यशक्तौ तदिति वाच्यं मानाभावात्। न खल्वस्मिन् सङ्कोचे प्रमाणमस्ति। न च सामान्यमपि वचनमृते कारणाद्विशेषपरं कल्पयितुमुचितम्!। इतश्च। ऋत्विक् परिकल्पनवैयर्थ्यात्। ऋत्विक्परिकल्पनं खल्वेवमनर्थकं स्यात्। पत्न्याः खल्वशक्तौ ऋत्विजा होतव्यमिति स परिचिकल्पयिषितः। सा खल्वियमनर्थिका कल्पना स्यात्। कस्मात्?। तयैव तत्सम्भवात्। यदि नामाशक्ता पत्नी भवति, तर्हि सैव तदानीमृत्विजं परिकल्पयिष्यति, किमिदानीमेव तत् परिकल्पनेन। तदशक्तौ चान्यपरिकल्पनाऽविशेषात्। परिकल्पितस्यापि ऋत्विजोऽशक्तौ अन्योपि ऋत्विक् पत्न्यापरिकल्पयितव्य एव—इति इदानीं ऋत्विक्परिकल्पने, न कश्चिद्विशेषोऽस्ति।

ननु—"जातिन्तु वादरायणोऽविशेषात्, तस्मात् स्त्र्यपि प्रतीयेत जात्यर्थस्याविशिष्टत्वात्"—इति सिद्धान्तात् पत्न्यप्यधिकारिणी कथमिवादितो न जुहुयात्?। उच्यते। नैतदस्ति—केवलायाः पत्न्या अधिकार इति। किन्तर्हि?—दम्पत्योः सहाधिकार इति सिद्धान्तः। तथा चोक्तम्। "स्ववतोस्तु वचनादेककर्म्यं स्यात्"—इति। "धर्मे चार्थे च कामे च नातिचरितव्या"—इति, "सहधर्मश्चरितव्यः"—इति चैवमादि खल्वभियुक्ताः स्मरन्ति। तस्मान्नास्ति पत्न्याः केवलायाः पृथगधिकारः। सहाधिकारेपि यावदुक्तमेव साऽधिकारोति इति तदन्यत्रानधिकार एव तस्याः सिध्यते। "तस्या यावदुक्तमाशीर्ब्रह्मचर्य्यमतुल्यत्वात"—इति सिद्धान्तात्। वचनबलादेवानया

होतव्यमिति यथा वचनमेवाधिक्रियते। दर्शितश्चास्माभिर्वचनस्य तात्पर्य्यम्—होतुरन्यस्याभावे पत्नी जुहुयात्—इति। "सा चान्य-होतुरभावे जुहुयात्"—इति च भट्टभाष्यम्। तस्मादन्येषामेवैष नियमः। परशास्त्रोक्तं खल्वेतदिति नास्माकं भवति। तथा चाश्वलायनगृह्यम्। "पाणिग्रहणादि गृह्यं परिचरेत् स्वयं पत्न्यपि वा पुत्रः कुमार्य्यन्तेवासी वा"—इति।

इतिर्ब्राह्मणवाक्यपरिसमाप्त्यर्थः, सायंप्रातर्होमप्रकरणपरिसमाप्त्यर्थो वा ॥ १५ ॥ * ॥

उपदिष्टो सायंप्रातर्होमो, उपदिष्टस्य प्रातर्होमानन्तरं ब्रह्मयज्ञः, —'प्रदक्षिणमग्निं परिक्रम्यापां शेषं निनीय पूरयित्वा चमसं प्रतिष्ठाप्य यथार्थम्'—इत्यत्र। स खल्वयं ब्रह्मयज्ञः पञ्चानां महायज्ञानामादिभूतः। तदाह कर्म्मप्रदीपः।

"देव-भूत-पितृ-ब्रह्म-मनुष्याणामनुक्रमात्।
महासत्राणि जानीयात्त एव हि महामखाः।
अध्यापनं महायज्ञः, पितृयज्ञस्तु तर्पणम्।
होमोदैवो, बलिर्भौतो, नृयज्ञोऽतिथिपूजनम्"।

इति। अनुक्रमाद्वक्ष्यमाणानीत्यर्थ इति परिशिष्टप्रकाशः। ते खल्विमे पञ्च महायज्ञाः पञ्चसूना पापापनुत्तये गृहमेधिना प्रत्यहं कर्त्तव्याः। अत एव स्मरति भगवान्मनुः।

'पञ्चैतान् यो महायज्ञान्नहापयति शक्तितः।
स गृहेपि वसन्नित्यं सूनादोषैर्न लिप्यते"।

इति।

"पञ्चसूना गृहस्थस्य चुल्लीपेषण्युपस्करः।
कण्डनी चोदकुम्भश्च वध्यते यास्तु वाहयन्"।

इति च। स खल्वयं ब्रह्मयज्ञोऽध्यापनं श्रुतिजपश्च। तदप्याह कर्म्मप्रदीपः। "अध्यापनं ब्रह्मयज्ञः"—इति।

"वेदमादित आरभ्य शक्तितोऽहरहर्जपेत्"।

इति। "यश्च श्रुतिजपः प्रोक्तः ब्रह्मयज्ञः स चोच्यते"।

इति च। अत्र शक्तित इत्युपादानादशक्तौ कियानपि श्रुतिजपो ब्रह्मयज्ञो भवतीत्यवगम्यते। "एकाम्टचं एकं वा यजुरेकं वा सामाभिव्याहरेत्"—इति च स्मृत्यन्तरम्। तदेवं च्छन्दोगानां स्वशाखापरिभावितोद्विविधो ब्रह्मयज्ञो भवति। परिशिष्टप्रकाशोप्येवमेवाह। भट्टभाष्ये तु—

"गुरावध्ययनं कुर्व्वन् शुश्रूषादि यदाचरेत्।
स सर्व्वो ब्रह्मयज्ञः स्यात्तत्तपः परमुच्यते"।

इति स्मरणात् गुरोर्यदध्ययनं सोपि ब्रह्मयज्ञ इत्यभिहितम्। तस्य खल्वस्य ब्रह्मयज्ञस्य विकल्पेन त्रयः काला भवन्ति। तदप्याह कर्म्मप्रदीपः।

"स चार्व्वाक् तर्पणात्कार्य्यः पश्चाद्वा प्रातराहुतेः।
वैश्वदेवावसाने वा नान्यत्रेति निमित्ततात्"।

इति। तर्पणादर्व्वाक् श्रुतिजपात्मको ब्रह्मयज्ञः कार्य्य इत्येकः कालः। न चायं ब्रह्मयज्ञः सवितुरुपस्थानरूप इति वाच्यं तस्य ब्रह्मयज्ञत्वेप्रमाणाभावात्। न खल्वस्तिप्रमाणं—सवितु रुपस्थानं ब्रह्मयज्ञ इति। कात्यायनः खल्वादितः सन्ध्योपासनमुक्त्वा

उक्ता च तदतिक्रमदोषम्,—"वेदमादित आरभ्य"—इत्यादित आरभ्य यथाशक्तिवेदाध्ययनं विदधौ। न चेदं सवितुरुपस्थानरूपं सम्भवति। आदित आरभ्येत्यभिधानात्। न च सवितुरुपस्थाने आदित आरभ्यवेदो जप्यते, तस्मात् सन्ध्योपासनादन्य एव कश्चित् श्रुतिजपो वचनार्थः। यस्य श्रुतिजप इत्यादिना च तस्यैव ब्रह्मयज्ञसञ्ज्ञामभिधाय,—स चार्व्वाक्तर्पणात् कार्य्यः,—इति तस्यैव तर्पणादर्व्वाक् कर्त्तव्यतामाह स्म। अतएव स्मरति बृहस्पतिः।

"ब्रह्मयज्ञार्थसिद्ध्यर्थं विद्यामाध्यात्मिकीं जपेत्।
जप्त्वाथ प्रणवं वापि ततस्तर्पणमाचरेत्"।

इति। तथा च सन्ध्योपासनमभिधाय ब्रह्मपुराणे।

"कृत्वा प्रदक्षिणं सूर्य्यं नमस्कृत्योपविश्य च।
स्वाध्यायं प्राङ्मुखः कृत्वा तर्पयेद्देवतामृषीन्।

इति। स्वाध्यायब्राह्मणेपि, "रक्षांसि वा पुरानुवाके तपोग्रमतिष्ठन्त तान् प्रजापतिर्वरेणोपामन्त्रयत"—इत्येवमादिना तृतीयेनानुवाकेन सन्ध्योपासनमभिधाय, "अजान् ह वै पृश्नींस्तपस्यमानान् ब्रह्म स्वयं स्वयम्भ्वभ्यानर्षत्"—इति, "यत् स्वाध्यायमधीयीतैकामप्यृचं यजुः साम वा तद्ब्रह्मयज्ञः सन्तिष्ठते"—इति चैवमादिभिरष्टाभिरनुवाकैः सविस्तरं पृथगेव ब्रह्मयज्ञः समाम्नायते। तस्मात् सवितुरुपस्थानरूपोयं ब्रह्मयज्ञ इत्यप्रमाणं वचनम्। अथैवमाचार्य्येण—"अथ नित्यवत् सन्ध्यामुपासीत उदुत्यं चित्रम्"—इत्युपक्रम्य,—"आभिर्ऋग्भिः सवितुरुपस्थानम्"—इत्यभिधाय,—"नमो ब्रह्मणे इत्युपजाप चेत्यन्तेनाग्निस्तुप्यलिङ्गिं च

सर्व्वांश्च सव्येनैतां स्तर्पयेत्"—इत्येवमादिना तर्पणमभिधाय,—"गायत्र्यष्टशतमादौ कृत्वा भासं दशसोमम्"—इत्यादिना,—"अहरहर्ब्रह्मयज्ञाय"—इत्येवमन्तेन तर्पणानन्तरं ब्रह्मयज्ञोऽभिहितः कथं सङ्गच्छते?। उच्यते। नैष दोषः। श्रुतिसाम्येप्यर्थभेदात्। समानायामप्युभयत्र तर्पणश्रुतावनयोरर्थभेदो भवति। भिद्यते खल्वनयोरर्थ इत्यदोषः। आचार्य्यः किल सूर्य्योपस्थानादनन्तरं स्नानाङ्गमेव तर्पणमभिदधौ, न त्वन्यत् प्रधानभूतम्—पितृयज्ञस्तु तर्पणम्—इति। स्नानप्रकरणे खल्वाचार्य्यस्तर्पणं सूर्य्योपस्थानादनुपदमाह स्म। तदस्य तर्पणस्य स्नानाङ्गतायामस्ति प्रमाणं प्रकरणम्, न तु प्रधानतायां किञ्चिदपि प्रमाणं पश्यामः। कात्यायनवाक्यस्वरसादप्येवमेवाचार्य्यस्याभिप्रायोऽवधार्य्यते। कात्यायनोपि खल्वाचार्य्यस्याभिप्रायस्य प्रकाशयितेत्यवोचाम। स च ब्रह्मयज्ञानन्तरं तर्पणं पितृयज्ञमभिदधानः सूर्य्योपस्थानादनन्तरं स्नानाङ्गमेव तर्पणमाचार्य्येणाभिहितमिति दर्शयति। अन्यथा कथमिव स्वोपजीव्यस्यैवाचार्य्यस्य विरुद्धमयमभिदधीत! एवं खल्वस्यैव वचस्यनाश्वासो लोकानां प्रसज्येत! तस्मादाचार्य्येण—"अथातः स्नानविधिं व्याख्यास्यामः"—इति प्रतिज्ञाय, "पुनः शन्नो देव्यादिभिर्मार्जनञ्च"—इत्येवमन्तेन स्नानमभिधाय, तदङ्गस्य तर्पणस्याभिधाने प्राप्ते, "इयं नित्यवत् सन्ध्यामुपासीत"—इति, "आभिर्ऋग्भिः सवितुरुपस्थानम्"—इति चामुष्य क्रमार्थं, तर्पणमभिहितम्। तस्मात् स्नानाङ्गं तर्पणं सवितुरुपस्थानात्परं पितृयज्ञस्तु तर्पणं ब्रह्मयज्ञात्परमित्यविरोधः।

ननु स चाव्यीकृतपणात् कार्य्य इति कात्यायनवाक्यस्य पितृयज्ञपरत्वे किं मानम्?। उच्यते। पञ्चमहायज्ञप्रकरणे खल्वेवमभिहितं कात्यायनेन। तदत्र तर्पणपदस्योपक्रमोपस्थितं पितृयज्ञ एव तर्पणमर्थः। "सन्निहिते बुद्धिरन्तरङ्गा"—इति न्यायात्। "प्रकृतप्रत्ययस्य नाम्य:"—इति चाभियुक्तवचनात्। व्यक्तिवचनानाञ्चामीषाम् आग्नेयीवत् सन्निहितव्यक्तिपरताया न्याय्यत्वात्। तस्माद् यथा "आग्नेय्या अग्नीध्रमुपतिष्ठते"—इत्याग्नेयीपदेन प्रकृतौ ज्योतिष्टोमसमाम्नातोऽन्यत्र विनियुक्तोपि मन्त्रो गृह्यते, न पुनर्दाग्नतया लिङ्गवन्तोपि मन्त्रा नापि तदुभयम्—इति तृतीयाध्याये निरूपितम्। एवमिहापि प्रकृतं पितृयज्ञरूपमेव तर्पणं परामृश्यते, न स्नानाङ्गं नाप्युभयमिति। न खल्वत्र तर्पणस्याङ्गत्वं प्रामाणिकम्; न चात्र श्रुतिलिङ्गादिकं किमपि प्रमाणमुपलभामहे; येन स्नानाङ्गमिदं तर्पणमिति प्रतिपद्येमहि। ब्रह्मयज्ञसाहचर्य्यादपि पितृयज्ञस्तर्पणं प्रधानमेवावगम्यते। साहचर्य्यमपि खल्वर्थस्य नियामकमिष्यते। अतएव कर्म्मप्रदीपे—पितृयज्ञस्तु तर्पणम्—इति स्नानप्रकरणैरपेक्ष्येणाम्नातम्। मनुस्मृतावपि—पितृयज्ञस्तु तर्पणम्—इत्युक्तम्। तत्र स्नानस्य तदङ्गतर्पणस्य वा नामापि न श्रूयते। न च लाघवात् स्नानाङ्गतर्पणमेव पितृयज्ञ इति वाच्यं प्रामाणाभावात्। न च धर्म्मे लाघवं प्रमाणं नाम। शब्दमूलः खल्वयमर्थो भवति। प्रकरणान्तरे खल्विदमाम्नानं प्रकरणाधिकरणन्यायेन कर्म्मान्तरमवगमयति। तथा चोक्तम्। "प्रकरणान्तरे प्रयोजनान्यत्वम्"—

इति। तुल्यञ्च समाम्नानम्—अध्यापनं ब्रह्मयज्ञस्तर्पणं पितृयज्ञो होमो देवयज्ञ इत्येवमादि, न च स्नानाङ्गतर्पणादर्व्वाक् छन्दोगानां ब्रह्मयज्ञो भवति। छन्दोगानां विहितस्यैव ब्रह्मयज्ञस्य खल्वेष कालविधिर्भवति—सचार्व्वाक् तर्पणात् कार्य्यः—इत्येवमादिः। न चान्यविषयमेतद्वाक्यम्। न खल्वस्यैव पूर्व्वस्मिन् परस्मिंश्च वाक्यप्रवाहे छन्दोगविषये सति मध्यमिदं वाक्यमकस्मादेवान्येषां भवितुमर्हति। न चार्द्धजरतीयमुचितम्। तस्मान्न किञ्चिदेतत्। स्नानाङ्गञ्च तर्पणमन्तरेण स्नानं न भवति, भवति चेदं तर्पणमन्तरेणापि स्नानं रोगाद्युपद्रवेषु।

"तर्पणन्तु शुचिः कुर्य्यात् प्रत्यहं स्नातकोद्विजः।
देवेभ्यश्च ऋषिभ्यश्च पितृभ्यश्च यथाक्रमम्"।

इति च स्मृत्यन्तरम्। तदेवं सिद्धे तर्पणद्वैते, स्नानाङ्गतर्पणं सवितुरुपस्थानात् परं पितृयज्ञस्तु तर्पणं ब्रह्मयज्ञादिति न किञ्चिदनुचितम्।

यदि पुनः सामान्येन तर्पणस्य ब्रह्मयज्ञोत्तरत्वमाम्नायेतापि,—तर्हि तत् प्रकृत्या वा गृह्येत, विकृत्या वा—इति द्वयी गतिः स्यात्। तत्र यदि प्रकृत्या गृह्येत, तर्ह्युभयोः कालयोरन्यतरः कालः पक्षे त्यज्येत। यदि विकृत्यापि गृह्येत, तत्रापि चोदकेन सवितुरुपस्थानोत्तरत्वं प्राप्यते—इत्यन्यतरः कालस्त्यज्येतैव। तदेवमुभयथाप्यन्यतरस्य कालस्य परित्यागे समानेपि यतरस्मिन् पक्षे न्यायोऽनुगृह्यते, ततरः पक्ष इहाश्रयितव्यो भवति। तत्र विकृतौ चोदकप्राप्तः काल आनुमानिक इति स त्यज्यताम्, प्रकृतौ तु सूर्य्योपस्थानोत्तरकालः साक्षादाम्नात इति स न युज्यते त्यक्तुमित्य-

स्मत्पक्षे न्यायोऽनुगृह्यते। अतएव—"य इष्ट्वा पशुना सोमेन आग्रयणेन वा यक्ष्यमाणः स पौर्णमास्याममावस्यायां वा यजेत"—इति सामान्यवचनेन साङ्गस्य यागस्यामावस्यायां पौर्णमास्यां वा करणाम्नानात्; तस्य च प्रकृतिपरत्वे तत्र प्रत्यक्षसमाम्नातस्य—(पूर्व्वेद्युरग्निं गृह्णाति उत्तरमहर्देवतां यजेत इति)—कालस्य पक्षे परित्यागप्रसङ्गात् सामान्यवचनं विकृतिपरमिति तत्र चोदकप्राप्तमानुमानिकं द्वैयहकाल्यं परित्यज्यते इति वैकृतानामैन्द्राग्नादीनां यद्यस्कालत्वमिति पञ्चमाध्याये सिद्धान्तितम्। यदि पुनः सामान्यमप्यभिधानं कस्माच्चिदपि कारणात् प्रकृतिविषयमप्यभविष्यत्;—अभविष्यत्तर्हि विकल्पोऽप्यनयोः कालयोः। स खल्वनुचित एव। कस्मात्?। अतुल्यबलत्वात्। अस्तु तर्ह्यन्येषामेव ब्रह्मयज्ञोत्तरत्वमिति चेद्भ्रान्तोऽसि। विकृतिपरतया सावकाशमत एव दुर्ब्बलं सामान्यमाम्नानं न प्राकृतेन समाम्नानेन विकल्प्यते—इति ब्रूमः। तत् किमिति स्वशास्त्रोक्तमपि ब्रह्मयज्ञोत्तरत्वमन्येषां भवतु, छन्दोगस्य तदेव नित्यवत् त्यजतु। परमार्थतस्तु ब्रह्मयज्ञोत्तरत्वाम्नानं न सामान्यविषयं किन्तर्हि विकृतिविषयमेवेति पुरस्तादुपदर्शितमस्माभिः। अतएव गोभिलीयवचनम्।

"आप्लवने तु सम्प्राप्ते तर्पणं तदनन्तरम्।
गायत्रीन्तु जपेत् पश्चात् स्वाध्यायञ्चैव शक्तितः।
आप्लवने तु सम्प्राप्ते गायत्रीं जपतः पुरा।
तर्पणं कुर्व्वतः पश्चात् स्नानमेव वृथा भवेत्"।

इति। तदनेनस्नानाङ्गस्यैव तर्पणस्यायं काल इति स्पष्टमवगम्यते।

कस्मात्? । "आप्लवने तु सम्प्राप्ते—इत्युपक्रमात् । स्नानमेव वृथा भवेत्—इति चोपसंहारात् । स्नानाङ्गं खल्विदं तर्पणं अपयज्ञात् पूर्वं कर्त्तव्यं, अपयज्ञादनन्तरञ्च तर्पणं प्रधानभूतं पितृयज्ञरूपं कर्त्तव्यमिति कात्यायनस्याभिप्रायः । स चार्व्वाक्तर्पणात् कार्य्य इति तर्पणादर्व्वाग् ब्रह्मयज्ञमभिदधानः कात्यायनोऽर्थाद्ब्रह्मयज्ञात् परं पितृयज्ञरूपं तर्पणं दर्शयति । "अथ सधृतवासा उदकान्तं कृत्वा प्रयतः शुचौ देशे विधीयते"—इत्यापस्तम्बस्मृतावपि अथ सधृतवासा इत्युपादानात् व्यक्तमिदमवगम्यते; यदुत स्नानाङ्गतर्पणानन्तरं ब्रह्मयज्ञ इति । तदनेन तन्त्रता निरस्ता । कस्मात्? । कालभेदात् । अन्यः कालः पितृयज्ञस्य तर्पणस्य ब्रह्मयज्ञोत्तरत्वमन्यस्य कालः स्नानाङ्गस्य तर्पणस्य सूर्य्योपस्थानोत्तरत्वमिति भवति कालभेदः ।

ननु भवतु तर्पणद्वयं शास्त्रार्थः । तथापि स्नानाङ्गस्यैव तर्पणस्य सपरिकराभिहितत्वात्तदेव प्रकृतीभूतमितरच्च विकृतीभूतं प्रधानरूपि, इति चोदकप्राप्ताधर्म्मास्तत्र भवन्ति इति तस्यापि सूर्य्योपस्थानोत्तरत्वं भवितुमर्हति । उच्यते । नैव भवितुमर्हति । स चार्व्वाक् तर्पणात् कार्य्यः—इत्याम्नानात्तु न भवति । चोदकेन हि विप्रकृष्टाधीतः कालोऽभ्योयेत, सन्निकृष्टन्तु ब्रह्मयज्ञोत्तरत्वमिति शीघ्रमुपस्थितेन ब्रह्मयज्ञोत्तरत्वेन विलम्बोपस्थितं सूर्य्योपस्थानोत्तरत्वं बाध्यते । शरमयेनेव वर्हिषा कुशमयं वर्हिः । अपिच । यदि विकृतत्वानुमानिकं चोदकप्राप्तं सामिधेनीनां पाञ्चदश्यं बाधित्वा, "सप्तदशसामिधेनीरनुब्रूयात्"—इत्यनारभ्याधीतेनापि वाक्येन साप्तदश्यं सामिधेनीनामिष्यते, तर्हि, स चार्व्वाक् तर्पणात् कार्य्यः—इति, ब्रह्म-

यज्ञप्रसिद्ध्यर्थम्—इति चैवमादिभिर्वाक्यैः साक्षादेव पितृयज्ञविषयैः चोदकप्राप्तं सूर्योपस्थानोत्तरत्वं बाधित्वा पितृयज्ञस्य तर्पणस्य ब्रह्मयज्ञोत्तरत्वं सुतरामेष्टव्यम्। अतएव चातुर्मास्येषु साकमेधे तृतीये पर्व्वणि—"अग्नयेऽनीकवते प्रातरष्टाकपालो, मरुद्भ्यः सान्तपनेभ्योमध्यन्दिने चरुः, मरुद्भ्योगृहमेधिभ्यः सर्व्वासां दुग्धे सायमोदनम्"—इति प्रातर्मध्यन्दिने सायमित्युक्तः कालेषु इष्टीनां समाम्नानात्,—यथा देवदत्तः प्रातरपूपं भक्षयति, मध्यन्दिने विविधमन्नमश्नाति, अपराह्णे मोदकान् भक्षयति—इत्येकस्मिन्नहनि इति गम्यते, तथात्रापि गम्यते—इत्येकस्मिन्नहनि इष्टीनामवगमात् सद्यस्कालताविकृतीनाममूषामिष्टीनामिति चोदकप्राप्तमानुमानिकं द्व्यहकालत्वं बाध्यत इति पञ्चमाध्याये सिद्धान्तितम्। तथा चोक्तम्। "अपि वा क्रमकालसंयुक्ता सद्यः क्रियेत तत्र विधेरनुमानात् प्रकृतिधर्म्मलोपः स्यात्"—इति। एवमिहापि भविष्यति। स चार्व्वाक् तर्पणात् कार्य्यः—इति वचनबलादवगम्यमानं तर्पणस्य पितृयज्ञस्य ब्रह्मयज्ञोत्तरत्वं कथमनर्थकम्—प्रलापमात्रं प्रतिपद्येमहि। एवं हि महर्षिमाप्तं सन्तमनाप्तं प्रकल्पयेमहि। न चैतदुचितम्। यावान् खल्वश्रुतकल्पनायां दोषस्तावानेव श्रुतस्योत्सर्गे भवति। ननु नास्त्यत्र शब्दोब्रह्मयज्ञानन्तरन्तर्पणं पितृयज्ञ इति। साकमेधेऽपि तर्हि नास्तिशब्दः—सद्यस्काला इमा इष्टय इति। तत्रार्थादवगम्यते सद्यस्कालता इति चेदिहाप्यर्थादवगम्यते ब्रह्मयज्ञोत्तरतेत्यविशेष एव। न खलु वयं शब्दस्याप्रयोगमर्थाभावे हेतुमभ्युपगच्छामः। सत्यप्यर्थे तदवसराभावान्न प्रयुज्यते शब्द इति खल्वभियुक्ताः कथयन्ति।

गम्यते चान्यस्मात् कारणादयमर्थो—यदुत ब्रह्मयज्ञादनन्तरं पितृयज्ञतर्पणं कर्त्तव्यमिति। अस्ति चात्र साक्षादपि ब्रह्मयज्ञोत्तरत्वावगमकं किञ्चिद्वचनम्। तच्च पुरस्तादेवोदाहृतमस्माभिः।

ननु छन्दोगानां स्नानाङ्गतर्पणस्य सूर्य्योपस्थानोत्तरत्वं साक्षादाम्नातं विकृतावपि तदेवलभ्यते। तथा ज्योतिष्टोमस्य दृष्ट्युत्तरकालत्वं विकृतावप्यतिदेशप्राप्तम्। एवमिहापि। तस्मादनायत्या ब्रह्मयज्ञोत्तरत्वं साक्षादाम्नातमपि तदन्येषामेव भविष्यति। तत्र तावदाम्नातमपि ब्रह्मयज्ञोत्तरत्वमन्येषामस्त्वेतीति वदन् प्रष्टव्यः,—साक्षादाम्नातं ब्रह्मयज्ञोत्तरत्वं छन्दोगैः कुतस्त्यज्येत? तेषां सूर्य्योपस्थानोत्तरत्वस्य चोदकप्राप्तत्वादिति चेन्न तेषामस्यापि कालस्य वाक्येन प्राप्तत्वाविशेषात्। अपि च। चोदकेन सूर्य्योपस्थानोत्तरत्वमवगम्यते, वाक्येन च ब्रह्मयज्ञोत्तरत्वमपि, तत् कतरदिह त्यक्तव्यमिति भवति विचारणा। तत्र च चोदकप्राप्तएवानुमानिकः कालस्त्यक्तव्यः स्वशास्त्रे खल्वाम्नातं ब्रह्मयज्ञोत्तरत्वं न युज्यते त्यक्तुम्—इत्यवोचाम। ननु उक्तम्—वाजसनेयिप्रभृतिविषयमाम्नानं भविष्यतीति। नैष दोषः। न खल्वत्र समाम्नाने वाजसनेयिप्रभृतयः श्रूयन्ते, किन्तर्हि भवता कल्पयितुमभिप्रेयन्ते, सैव कल्पना न सम्भवतीति ब्रूमः। छन्दोगानां विकृतितर्पणस्य सूर्य्योपस्थानोत्तरत्वञ्चेत् केनचित् कारणेन सिध्येत्;—सिध्येदपि नाम सामान्यसमाम्नानस्य तदन्यविषयत्वमिति मन्येमहि। तच्च चोदकेन सिषाधयिषितम्, तच्च न सम्भवतीत्युक्तम्। स्वशास्त्रे च खल्वस्माकमाम्नातं ब्रह्मयज्ञोत्तरत्वमिति चावोचाम। इतरेतरा-

र्थापत्तिसिद्धिः। चोदकेन छन्दोगानां प्रधानतर्पणस्य सूर्योपस्थानोत्तरत्वसिद्धावेव तद्विरोधाद्वाक्यस्य तदन्यपरत्वं सेत्स्यति, सिद्धे च वाक्यस्य तदन्यपरत्वे तर्पणस्य सूर्योपस्थानोत्तरत्वसिद्धिरितीतरेतराश्रयमापद्येत। न खलु साक्षादाम्नानस्य सामान्यविषयत्वे सत्यपि चोदकस्य व्यापारोऽस्तीत्यवोचाम। तस्मादितरेतराश्रयाच्च न सिध्यति वाजसनेयिप्रभृतिविषयत्वं वचनानाम्। वैकृतस्त्वर्थोऽर्थादप्यवगतश्चोदकं बाधितुमीष्टे, चोदकस्य दुर्बलत्वादित्यप्यस्माभिरुपपादितमधस्तादेव।

एतेन यत्परिशिष्टप्रकाशकृताऽभिहितम्—स चार्वाक् तर्पणात्कार्य्य इति यजुर्वेदिविषयम्, छन्दोगानान्तर्पणात्परं ब्रह्मयज्ञाभिधानादिति, यच्च तत्त्वकारेण—ब्रह्मयज्ञानन्तरन्तर्पणं सामगेतरेषामिति, तदसङ्गतम्। पितृयज्ञरूपं खल्विदं तर्पणं—स चार्वाक् तर्पणात्कार्य्य इति, स्नानाङ्गञ्च तर्पणं ब्रह्मयज्ञादर्वागभिहितमिति विभिन्नविषयतयाविरोधानवसरात्। शब्दमूलः खल्वयमर्थो भवति—अनेनेदं कर्त्तव्यमनेनेदमिति। न खल्वस्ति शब्दो—ब्रह्मयज्ञानन्तरन्तर्पणं सामगेतरेषामिति। सेयमशाब्दी पुरुषबुद्धिमूला कल्पनाप्रेक्षावतामनपेक्षणीया भवति। कस्मात्?—"धर्मस्य शब्दमूलत्वादशब्दमनपेक्षं स्यात्"—इति सिद्धान्तात्। लाघवादेवमस्तु, इति चेदुच्यते। न खलु शास्त्रबलाद्वस्तुसिद्धौ लाघवं किमपि कर्त्तुमर्हति। पुरुषप्रवृत्तौ खल्वेतदुपयुज्यते। अल्पीयस्य दृष्टानुमानकल्पनान्याय्येति चेदुच्यते। सत्यं न्याय्या—अल्पीयसी दृष्टानुमानकल्पना यत्र विशेषहेतुर्नास्ति। इह चास्ति विशेषहेतुः

—स चार्व्वाक्तर्पणात् कार्य्य इति वचनम्। न च लाघवमिति कृत्वा—छन्दोगानामयाज्ञानं वाजसनेयिनामिति कल्पयितुमुचितम्। । प्रमाणस्य खल्वभावेऽल्पीयस्यपि अदृष्टानुमानकल्पना न क्रियते,—क्रियते पुनर्गरीयस्यपि सति प्रमाणे इति हि प्रमाणपरतन्त्राणां समयः। तथा चाभियुक्तानां वचनम्।

"प्रमाणवन्त्यदृष्टानि कल्प्यानि सुबह्नन्यपि ।

अदृष्टशतभागोऽपि न कल्प्यो निष्प्रमाणकः"।

इति। "प्रातर्मध्याह्ने च स्नानतर्पणयोः प्रधानाङ्गयोर्मध्य एव सन्ध्यावन्दनं तथैव कात्यायनादिना तत्प्रयोगाभिधानात्"—इति वाचस्पतिमिश्राः। तदनेन वाजसनेयिनां स्नानाङ्गतर्पणं सन्ध्योपासनात् परमेव प्रतीयते, नतु ब्रह्मयज्ञात्परमिति।

"स्नात्वोपास्य द्विजः सन्ध्यां देवादींश्चैव तर्पयेत्"।

इति च व्यासस्मरणम्। न चेदं छन्दोगानामिति शक्यते वक्तुम्, सवितुरुपस्थानानन्तरमेव तेषान्तर्पणविधानात्। न चोपस्थानान्तमेव छन्दोगानां सन्ध्योपासनम्, किन्तर्हि?—गायत्रीजपान्तमेव। कस्मात्? अस्मात्। "अथातः सन्ध्योपासनविधिं व्याख्यास्यामः"—इति प्रतिज्ञाय, "ध्यानयुक्तमावर्त्तयेद्दो पूर्व्वां गायत्रीम्"—इति गायत्रीजपान्तमभिधाय, "अथ य इमां सन्ध्यां नोपास्ते"—इत्युपसंहरन्नाचार्य्यो गायत्रीजपान्तमेव सन्ध्योपासनमिति दर्शयति। अत एव स्नानप्रकरणे—"अथ नित्यवत् सन्ध्यामुपासीत"—इत्यभिधाय, "सवितुरुपस्थानं, नमो ब्रह्मणे इत्युपजाय च"—इत्यभिहितम्। तदत्र—सन्ध्यामुपासीत—इति गायत्रीजपान्तमेव सन्ध्योपासनं

प्राप्नोतीत्यन्तरातर्पणार्थम्—सवितुरुपस्थानम्—इति वचनं सङ्ग-च्छते। तदन्तस्य सन्ध्योपासनत्वे तु—सन्ध्यामुपासीत—इत्यनेनैव, प्राप्तत्वात्—सवितुरुपस्थानम्—इति पुनर्वचनमाचार्यस्यानर्थकमेव स्यात्। कर्मप्रदीपेऽपि।

"अत ऊर्द्ध्वं प्रवक्ष्यामि सन्ध्योपासनिकं विधिम्।
अनर्हः कर्मणां विप्रः सन्ध्याहीनो यतः स्मृतः"।

इति प्रतिज्ञाय,—

"तिष्ठेदोदयनात् पूर्व्वां मध्यमामपि शक्तितः।
आसीतोडूगमाच्चान्त्यां सन्ध्यां पूर्व्वत्रिकं जपन्"।

इति गायत्रीजपान्तमभिधाय,—

एतत् सन्ध्यात्रयं प्रोक्तं ब्राह्मण्यं यत्र तिष्ठति।
यस्य नास्त्यादरस्तत्र न स ब्राह्मण उच्यते"।

इत्युपसंजहार। व्यासस्मृतौ च, प्रायेण वाजसनेयिनां कर्म्मो-पलभ्यते। यदि केषाञ्चित् स्नानाङ्गतर्पणस्य ब्रह्मयज्ञोत्तरत्वमि-ष्येतापि, नैतावता कारणेनास्माकमेवोपदेशो नास्माकं भविष्यतीति समीचीनमुपलभामहे। न खल्वन्यशास्त्रोक्तमपि पुरुषबुद्ध्या बला-दन्यत्र नीयते इति युक्तम्। न खल्वेवमयं धर्म्मो भवति। तस्मादा-चार्य्येण मध्याह्नस्नानप्रयोगेऽन्तरा सन्ध्योपासनस्य सवितुरुप-स्थानादनन्तरं तदङ्गतर्पणाभिधानात्,—"यथाहनि तथाप्रातर्नि-त्यं स्नायादनातुरः"—इति कर्मप्रदीपेन प्रातःस्नानेऽपि तद्धर्म्माति-देशात् उभयत्र सूर्य्योपस्थानादनन्तरं छन्दोगानां स्नानाङ्गतर्प-णम्। सायं सूर्य्यासादौ सत्यपि सन्ध्योपासने स्नानप्रयोगान्तर्गत-

मेव तद्भवति तत्र तादृशप्रयोगविधेरभावात्। यत्र च चन्द्रोप-रागादौ नास्ति सन्ध्योपासनं, तत्र सुतरां स्नानप्रयोगान्तर्भूतमेव तदङ्गं तर्पणमित्यविवाद एव। पितृयज्ञस्तु तर्पणं ब्रह्मयज्ञोत्तर-मेवेति सिद्धम्। यत्पुनर्मनुवचनम्—

"यदेव तर्पयत्यद्भिः पितॄन्, स्नात्वा द्विजोत्तमः।
तेनैव सर्व्वमाप्नोति पितृयज्ञक्रियाफलम्"।

इति। तत्स्नात्वेति साङ्गस्य सतर्पणस्य स्नानस्याभिधानात् यदेवेति स्नोक्तमेव—पितृयज्ञस्तु तर्पणम्—इति प्रधानतर्पणं परामृशति,—अशक्तावप्यन्यस्य पितृयज्ञस्य तर्पणादेव सर्व्वं पितृयज्ञफलं दर्शयति। स्नात्वेति तु प्राप्तस्यैव कर्म्मार्थस्नानस्यानुवादः। यथा स्मृत्यन्तरे—

"यदादौ वेदमारभ्य स्नात्वा भक्त्या द्विजोत्तमः।
अध्यापयेत् द्विजान् शिष्यान् सोयं ब्रह्ममखः स्मृतः"।

इत्येवमादौ। अथवा। अत्यन्ताशक्तः स्नात्वा यदेव तर्पयति स्ना-नाङ्गमपि, तेनापि पितृयज्ञः कृतो भवतीत्येवमर्थं मनुवचनं भवि-ष्यतीत्यदोषः। न चास्मादेव मनुवचनात् स्नानाङ्गतर्पणादेव प्रधान-तर्पणं तन्त्रात् सेत्स्यति इति वाच्यम्। नैयायिक्यास्तन्त्रतायाः कालभेदऽसम्भवात्। नैयायिकी खल्वियं तन्त्रतेष्यते। न च काल-भेदे तन्त्रतान्यायोऽस्ति। न च वचनशतेनापि न्याय आनेतुं शक्यते। तथाच—

"गणशः क्रियमाणे तु मातृभ्यः पूजनं सकृत्।
सकृदेव भवेत् श्राद्धमादौ न पृथगादिषु"।

इत्येवमादिवत् सकृदनुष्ठानबोधकं शास्त्रमस्ति। तस्मादशक्तविषयं

मनुवचनं वाच्यम्। न च वाच्यं—कात्यायनवचनमेव स्नानाशक्तविषयं किमिति न स्यादिति। प्रमाणाभावात्। नहि मनुः स्नानाकृततर्पणस्य पितृयज्ञत्वं स्मरति, किन्तर्हि?—तेनैव पितृयज्ञफलप्राप्तिम्। उक्तञ्चास्माभिः स्नानाकृततर्पणस्य जपयज्ञात् पूर्व्वत्वं, पितृयज्ञस्य च तर्पणस्य जपयज्ञात् पराचीनत्वं प्रधानत्वञ्च। तदनयो र्विभिन्नविषययोर्व्वाक्ययोर्नास्त्येकविषयत्वम्। विशेषवचनत्वाच्च। विशेषवचनं खल्विदं कात्यायनस्य छन्दोगविषयं, न सामान्येन मनुवचनेनान्येन वा सङ्कोचयितुमुचितम्। विशेषस्य बलवत्त्वात्। "पदार्थान्तरसाकाङ्क्षविशेषमपहाय तदितरत्र सामान्यमन्वेति"—इति हि न्यायः। कथं पुनर्मनोर्दुर्बलत्वमुच्यते? वृहस्पतिस्तस्य प्राधान्यं स्मरति—

"वेदार्थोपनिवन्धृत्वात् प्राधान्यं हि मनोः स्मृतम्।
मन्वर्थविपरीता या सा स्मृतिर्न प्रशस्यते"।

इति। अत्रोच्यते। सत्यं स्मरति वृहस्पतिरस्य प्राधान्यम्, अस्त्येव तत्, तच्च वयमपि नापलपामः। परमेतत् प्राधान्यमवष्टभ्य नात्र निर्णयो युक्त इति ब्रूमः। यत्र खल्वन्यत् विनिगमनाकारणं नास्ति समानविषयञ्च समाम्नानद्वयमुपलभ्यते, तत्र मनोः प्राधान्यमवष्टभ्य शास्त्रार्थावधारणा कर्त्तुमुचिता। सामान्यविशेषवचनयोस्तु विशेषवचनं बलवदिति को नाम साहसिकः समुत्सहतेऽपलपितुम्?। एवं खल्वपहस्तितैव शास्त्रमर्य्यादा स्यात्। सर्व्वाणि दर्शनानि सर्व्वे च लोकाः व्याकुप्येरन्। अतएव वृहस्पतेरेव स्मरणम्—

"केवलं शास्त्रमाश्रित्य न कर्त्तव्यो विनिर्णयः।

युक्तिहीनविचारेण धर्म्महानिः प्रजायते" ।

इति । अतएव मनोरननुमतमपि वैश्वदेवादिकमाचार्य्यानुमतमनुष्ठीयते, मन्वनुमतन्तु काम्यतया क्रियते इति निपुणतरमुपपादयिष्यामः । परमार्थतस्तु स्नात्वा यदेव तर्पयति—इति, तेनैव—इति च ब्रुवाणो मनुरेवकारादन्यत् तर्पणं विनापि, पित्र्यवलिनेव, स्नानाङ्गतर्पणेनैव पितृयज्ञफलप्राप्तिं दर्शयति इति —तद्वचनमेव पृथक्तर्पणाशक्तविषयं भवितुमुचितम् । अपिच। मनुना स्नानाङ्गतर्पणेनैव पितृयज्ञक्रियाफलप्राप्तिवचनात् तत्त्वतामनुमायान्यथानुपपत्त्या पितृयज्ञतर्पणस्य तत्कालत्वमनुमिमीते भवान् । अस्मादेव च कारणात् ब्रह्मयज्ञोत्तरत्ववचनं स्नानाशक्तविषयमिति प्रतिपद्यते, । तच्चैतदनुचितम् । कस्मात्? । इतरेतराश्रयात् । सिद्धे हि स्नानाङ्गतर्पणकालत्वे प्रधानतर्पणस्य, ब्रह्मयज्ञोत्तरत्ववचनं स्नानाशक्तविषयमवतिष्ठते । सिद्धे च ब्रह्मयज्ञोत्तरत्ववचनस्य स्नानाशक्तविषयत्वे प्रधानतर्पणस्य तत्कालत्वानुमानकल्पना—इति इतरेतराश्रयमापद्येत । अपि चार्थविप्रकर्षात् । विप्रकृष्टा खल्वेषा कालकल्पना, सन्निकृष्टेन कालेन ब्रह्मयज्ञोत्तरत्वेन वाध्यते । आनुमानिकं खल्विदं स्नानाङ्गतर्पणकालत्वं प्रत्यक्षन्तु ब्रह्मयज्ञोत्तरत्वं, प्रत्यक्षञ्चानुमानाद्बलीयः । यावत् खल्वनुमातुमुत्सहते भवान्, तावदेव ब्रह्मयज्ञोत्तरत्वमन्वीयते—इति प्रत्यक्षविरोधादनुमानमेव वाध्यते—इति युक्तम् । सदाचारस्य स्मृत्यपेक्षया दुर्व्वलतायामित्यमेव कारणमभिहितं वार्त्तिककृद्भिः । तथा चोक्तम् ।

"सदाचारः स्मृतिं यावदनुमातुं समुत्सुकः।
स्मृतिर्लब्धश्रुतिस्तावद्धर्म्ममेव प्रमापयेत्"।

इति। न्यायमालायामपि।

"स्मृतिमूलो हि सर्व्वत्र शिष्टाचारस्ततोऽत्र च।
अनुमेया स्मृतिः स्मृत्या वाध्या प्रत्यक्षया तु सा"।

इति। अपि च। तेनैव सर्व्वमाप्नोति पितृयज्ञक्रियाफलम्—इत्यवधारणमनुरशक्तविषयमिदमिति दर्शयति। शक्तस्य तु श्राद्धादिकरणं दर्शयिष्यामः। यदि पुनः केषाञ्चिदपि शाखिनां तर्पणयोः समानकालत्वं प्रामाणिकम्। तर्हि कामं तत्परमस्तु मनुवचनम्। तावताप्यस्माकं ब्रह्मयज्ञोत्तरत्ववचनं नापचीयते। तस्मादस्मदुक्त एवार्थः समादरणीयः।

अथैवमेकस्मिन्नेव दिने स्नानाङ्गं प्रधानञ्चेति तर्पणद्वयं कर्त्तव्यमित्युक्तम्। तत् खल्वनुचितमेव। कस्मात्?।—

"नावर्त्तयेत् पुनः कर्म्म तर्पणादिकमन्वहम्।
काम्यनैमित्तिके हित्वा एकं ह्येकत्र वासरे"।

इत्येवमादि स्मरणात्। उच्यते। इदं हि वाक्यं, एकं ह्येकत्र वासरे—इत्युपसंहारादेकस्यैव कर्म्मणः पुनरावृत्तिं निषेधयतीति—सकृदनुष्ठानेनैव शास्त्रार्थस्य कृतत्वात् सुतरां नावर्त्त्यते कर्म्मेति न्यायमूलम्। न पुनर्निमित्तभेदेऽपि नैमित्तिकानामावृत्तिं निषेधयति। सति निमित्ते नैमित्तिकस्यावश्यम्भावात्। अत एवैकस्मिन्नहनि प्रातर्मध्याह्ने च स्नानाङ्गतर्पणमुपपद्यते। काम्यनैमित्तिके हित्वा—इति च निमित्तभेदे नावृत्तौ मुनेः स्वरसोऽवगम्यते।

अत एवेदमपि प्रदर्शनमात्रं न पुनर्नियमार्थम्। न्यायस्यान्यथा-प्यविशेषात्।*अतएव—

"विषुवद्दिवसे प्राप्ते पञ्चतीर्थी विधानतः।

स्नात्वा सङ्कर्षणं कृष्णं दृष्ट्वा भद्रांश्च भो द्विजाः!"।

इत्येकस्मिन्नपि दिने निमित्तभेदेन नैमित्तिकावृत्तिर्न्यायावगतैव स्मर्य्यते। तथा।

"धर्मविन्नाचरेत् स्नानमाह्निकञ्च पुनः पुनः।

तर्पणं ब्रह्मयज्ञञ्च वैश्वदेवं न चाचरेत्"।

इति। इदमपि वचनं एकस्यैव कर्मण एकदैव पुनराचरणं नि-षेधयतीति न्यायमूलमेव। वैश्वदेवसाहचर्य्याच्चैवमवगम्यते। न खल्वेकस्मिन् दिने सकृदेव वैश्वदेवः कर्त्तव्य इति शक्यते वक्तुम्, रात्रावपि पुनर्वैश्वदेवस्य वक्ष्यमाणत्वात्। अतएव सामान्यतः स्मर्य्यते।

"यथाब्देनाब्दिकं कर्म्म मासेनैव तु मासिकम्।

न्यूनाधिकं न कर्त्तव्यं न चैकत्र क्रियाद्वयम्"।

इति। एकस्याः क्रियाया एकदा वारद्वयविधानं न युक्तमिति हलायुधः। तस्मात् तर्पणद्वयमविरुद्धम्। तदेवं ब्रह्मयज्ञस्यैकः कालः—'स चार्व्वाक् तर्पणात् कार्य्यः'—इति। 'पश्चाद्वा प्रातरा-हुतेः'—इत्यपरः कालः। अध्यापनं श्रुतिजपश्चाच कर्त्तव्यम्। तथा च स्मर्य्यते।

"द्वितीये च तथा भागे वेदाभ्यासो विधीयते।

वेदाभ्यासो हि विप्राणां परमन्तप उच्यते।

ब्रह्मयज्ञः स विज्ञेयः षडङ्गसहितस्तु सः।
वेदस्वीकरणं पूर्व्वं विचारोऽभ्यसनं जपः।
तद्दानञ्चैव शिष्येभ्यो वेदाभ्यासस्तु पञ्चधा"।

इति। अनया च स्मृत्येदमवगम्यते—यत् गुरोरध्ययनमपि ब्रह्मयज्ञोऽप्येव कर्त्तव्यमिति। अत्र चाध्यापनं प्रथमः कल्प इति भट्टभाष्यम्। कर्म्मप्रदीपेऽप्याह।

"ब्रह्मयज्ञादपि ब्रह्मदानमेवातिरिच्यते"।

इति। 'वैश्वदेवावसाने वा'—इत्यपरः कालः। वैश्वदेवो नाम होम उच्यते देवयज्ञरूपः—विश्वे देवाः सर्व्वे देवाः, ते यस्य होमस्य देवताः सोयं देवयज्ञात्मको होमो वैश्वदेव इत्युच्यते। तदवसानमन्यः कालो ब्रह्मयज्ञस्य। तस्य खल्वस्य वैश्वदेवस्यावसाने विहितमपि वामदेव्यगानं बलिकर्म्मान्त एव कर्त्तव्यम्।

"अहोमकेष्वपि भवेत् यथोक्तं चन्द्रदर्शने।
वामदेव्यं गणेष्वन्ते बल्यन्ते वैश्वदेविके"।

इति कर्म्मप्रदीपदर्शनात्। स खल्वयं वामदेव्यगानरूपो ब्रह्मयज्ञो वैश्वदेवावसाने वलिकर्म्म कृत्वा कर्त्तव्यः—इति परिशिष्टप्रकाशः। वल्यन्ते वामदेव्यगानान्तिको यो जपः स ब्रह्मयज्ञः—इति भट्टभाष्यम्। ते खल्विमे त्रयो ब्रह्मयज्ञकाला व्यवस्थिता वेदितव्याः। कथन्नाम?—तर्पणादर्व्वाक् श्रुतिजपः। प्रातराहुतेः पश्चात् स चाध्यापनञ्चाध्ययनञ्च। वैश्वदेवावसाने स एवेति। सा खल्वियं व्यवस्था बहुसम्मतत्वादरणीया। अनियमेनैते यथासम्भवं ब्रह्मयज्ञकाला इत्यपरमतम्। वैश्वदेवावसाने तु व्याख्यातारो विव-

इत्न। केचिदाहुः—वामदेव्यगानमेवाच श्रुतिजप इति। अन्ये त्वाहुः—वामदेव्यगानमपि अन्यदप्यध्ययनमच श्रुतिजप इति। इदमेव तावन्मतमाद्रियामहे। कस्मात्?। ब्रह्मयज्ञस्यैव काल-त्रयविधानात्। व्यवस्थायाश्च प्रमाणविशेषाभावात्। इयान् परं विशेषः। यदस्मिं कर्मापवर्गविहितेनापि वामदेव्यगानेन स कृतो भवति। तस्मात्—ब्रह्मयज्ञस्य कालत्रयविधानात्—ब्रह्मयज्ञोऽ-निर्दिष्टकालो मनुष्ययज्ञात् पूर्व्वमेवेति कर्कभाष्यमप्रमाणम्। तमिमं वैश्वदेवमुपदिदिक्षुराचार्य्य इदमाह।—

निष्ठिते सायमाशप्रातराशे भूतमिति प्रवाचयेत् ॥ ॥ १६ ॥

निष्ठा निष्पत्तिः संजाताऽस्येति निष्ठितः, तस्मिन्निष्ठिते निष्पन्ने इत्येतत्। अन्ये त्वाहुः—निष्ठिते निःशेषेण व्यञ्जनोपसेचनादिसहित स्थिते सिद्धे—इति। कस्मिन्?। सायमाशप्रातराशे, सायमाश्यते इति सायमाशः, प्रातराश्यते इति प्रातराशः, स च स चेति द्वन्द्वैकवद्भावस्तस्मिन् सायमाशप्रातराशे। सायंप्रातःशब्दौ खल्विमौ दिवारात्रिपरौ। कस्मात्?।

"मुनिभिर्द्विरशनं प्रोक्तं
विप्राणां मर्त्यवासिनां नित्यम्।
अहनि च तथा तमस्विन्यां
सार्द्धप्रहरयामान्तः"।

इति कर्मप्रदीपदर्शनात्। भूतमिति प्रवाचयेत्, प्रकर्षेण वाचयेत्।

भूतमिति प्रवाचयेदिति सूत्रयन्नाचार्य्यो—भूतमिति ब्रूहीति प्रवाचयितुः प्रश्नोऽर्थादायात इति दर्शयति। कः प्रवाचयेत्?—गृहपतिः। कस्मात्?—प्रकृतत्वात्। कां प्रवाचयेत्?—पत्नीम्। कस्मात्?—अन्नपंक्त्यां तस्या एवाधिकारात्। कथमन्नपंक्त्यां तस्या एवाधिकारः?—मन्वादिस्मरणात्। तथा च स्मरति भगवान्मनुः।

"अर्थस्य संग्रहे चैनां व्ययेचैव नियोजयेत्।
शौचे धर्म्मेऽन्नपंक्त्याञ्च पारिणाय्यस्य रक्षणे"।

इति। केनचित् प्रतिबन्धेन पत्नी चेदसन्निहिता रजस्वलां, तर्हि किं कर्त्तव्यम्?—इत्यत्राह कर्म्मप्रदीपः।

"भूतप्रवाचने पत्नी यद्यसन्निहिता भवेत्।
रजोयोगादिना तत्र कथं कुर्व्वन्ति याज्ञिकाः?।
महानसेऽन्नं या कुर्य्यात्सवर्णान्तां प्रवाचयेत्।
प्रणवाद्यपि वा कुर्य्यात् कात्यायनवचो यथा"।

इति ॥ १६ ॥ * ॥

ऋते भगया वाचा शुचिर्भूत्वा ॥ १७ ॥

ऋते विना, अभगया अभजनीयया अशोभनया वाचा, तां विनेति व्यत्ययेनेयं तृतीया द्रष्टव्या। अथवा। ऋते प्रदीप्ते, प्रकृतत्वादग्नौ, वैश्वदेवार्थमिति वाक्यशेषः। भट्टभाष्ये तु—"ऋते गते। ऋगतौ। कस्मिन्?—प्रकृतत्वादग्नेर्होमार्थमग्निसविधमासादिते

इत्यर्थः । एतस्मिन् काले प्रवाचयेत्"। इति व्याख्यातम् । तथाच गृहपतिना भगया वाचा भूतमिति ब्रूहीत्येवमभिहिता पत्नी, शुचिर्भूत्वाऽऽचमनादिना, भगया वाचा शोभनया विस्पष्टया भूतमिति ब्रूयादित्यर्थः। गृहपतेः खल्वाचान्तोदकेन कृत्यमित्यनेनैव शौचं सिद्धमिति शुचिर्भूत्वेत्येतत् पत्नीसम्बन्धविवक्षयैवाचार्य्यः सूत्रयाञ्चकारेति गम्यते ॥ १७ ॥ * ॥

पत्न्या खल्वेवमुक्ते गृहपतिः—

प्रतिजपत्योमित्युच्चैस्तस्मै नमस्तन्माख्या इत्युपांशु ॥ ॥ १८ ॥

ॐ—इत्युच्चैः प्रतिजपति । तस्मै नमस्तन्माख्या इत्युपांशु—

"शनैरुच्चारयेन्मन्त्रमीषदोष्ठौ प्रचालयन् ।
किञ्चित् शब्दं स्वयं विद्यादुपांशुः स जपः स्मृतः" ।

इत्युक्तलक्षणं यथा भवति, तथा प्रतिजपतीत्यनुषज्यते ॥ १८ ॥ ० ॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मजस्य श्रीचन्द्रकान्ततर्कालङ्कारस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये प्रथमप्रपाठकस्य तृतीया काण्डिका ॥ * ॥

प्रथमप्रपाठके चतुर्थी काण्डिका।

अथेदानीमुपक्रान्तेनान्नेन वैश्वदेवबलिकर्म्मणी कर्त्तव्ये—इत्येतदिदानीमाह।

अथ वाग्यतो बलीन् हरेत् ॥ १ ॥

अथेत्यानन्तर्य्यार्थम्। वक्ष्यमाणं वैश्वदेवहोमं निवर्त्त्याथानन्तरं वाग्यतः संयतवाक्, बलीन् वक्ष्यमाणान्, हरेन्निदध्यादित्यर्थः। ननु वक्ष्यति होमानन्तरम्—अथ बलीन् हरेत्,—इति, तत् किमित्यस्मिन्नर्थेत्युच्यते?। उच्यते। होमानन्तरं बलीनेव हरेत्, नत्वन्यत् किञ्चित् कुर्य्यादित्येवमर्थम्। तदनेन वैश्वदेवावसानविहितमपि वामदेव्यगानादिकं बलिहरणान्त एव कर्त्तव्यम्। अत एव कात्यायनोऽपि—

"वामदेव्यं गणेष्वन्ते बल्यन्ते वैश्वदेविके"।

इति स्मरति। एतेन—

"प्रियो वा यदि वा द्वेष्यो मूर्खः पण्डित एव वा।
संप्राप्तो वैश्वदेवान्ते सोऽतिथिः स्वर्गसंक्रमः"।

इति स्मृतिरपि व्याख्याता वेदितव्या ॥ १ ॥ * ॥

वाग्यत इत्यस्यापवादमाह—

भाषेतान्नसंसिद्धिमतिथिभिः कामं सम्भाषेत ॥ २ ॥

भाषेत वदेत्, अन्नसं सिद्धिमन्नस्य सम्यक्सिद्धिं प्रकृतिमित्येतत्। —किमिदमन्नमुपसिक्तं उत न?—इत्येवमादिकामन्नप्रकृतिं प्रतिभाषेत। भाषणञ्चेदं पृच्छारूपम्। अन्नसंसिद्धिमन्नसंसिद्ध्यर्थं भाषेत—इति भट्टनारायणोपाध्यायाः। अतिथिभिः—

"एकरात्रं हि निवसन्नतिथि र्ब्राह्मणः स्मृतः।
अनित्यं हि स्थितो यस्मात्तस्मादतिथिरुच्यते"।

इति मन्वादिस्मरणात् नास्ति द्वितीया तिथिरस्येत्यतिथिरुच्यते। तैरतिथिभिः सह। (बहुवचनात् सम्भवे बहवोऽप्यतिथयो भवन्तीति दर्शयति।) काममिच्छया सम्भाषेत बलिहरणकालेऽपि। अतिथिगुणविशेषादिकं ज्ञात्वा इच्छया सम्भाषेत वा, न वा सम्भाषेत—इत्यनियमः॥ २ ॥ * ॥

अथ हविष्यस्यान्नस्योद्धृत्य हविष्यैर्व्यञ्जनैरुपसिच्याग्नौ जुहुयात् तूष्णीं पाणिनैव ॥ ३ ॥

अथेति प्रकृतममन्त्रकपरिसमूहनादिसमिदाधानान्तं स्मारयति। कर्म्मप्रदीपेऽप्याह—

"पर्य्युक्षणञ्च सर्व्वत्र कर्त्तव्यमदितेन्विति।
अन्ते च वामदेवस्य गानं कुर्य्यादृचस्त्रिधा"।

इति। हविष्यस्यान्नस्येति षष्ठी सम्बन्धार्था अवयवार्था वा। सावशेषः खल्वेष होमो भवति। न खल्वत्र सर्व्वहुतत्वे प्रमाणमस्ति। एतद-

वग्निष्टेनैवान्नेन बलिहरणं, गृहमेधिनो भोजनञ्चान्नेन इति च वक्ष्यामः। अन्नस्येति च सूचयन्नाचार्य्यो नात्र चरोरावृदस्तीति दर्शयति। स्थालीपाके—चरौ खलु तामावृतं वक्ष्यति। न खल्वत्र स्थालीपाकः श्रूयते। मनुरपि—

"वैश्वदेवस्य सिद्धस्य गृह्येऽग्नौ विधिपूर्व्वकम्।

आभ्यः कुर्य्याद्देवताभ्यो ब्राह्मणो होममन्वहम्"।

इति स्मरति। विश्वे देवाः सर्व्वे देवास्ते यस्य पाकस्य देवताः सोऽयं वैश्वदेवोऽहरहर्यत् पच्यते तदुच्यते। तदयमर्थः। अथ समिदाधानान्तकर्म्मानन्तरं हविष्यस्यान्नस्य उद्धृत्य गृहीत्वा, हविष्यै र्घृतदुग्धदध्यादिभि र्व्यञ्जनैरुपकरणैरुपसिच्य सन्नीयाग्नौ जुहुयात्। तूष्णीमिति वाग्व्यापारप्रतिषेधान्मनसा मन्त्रमुच्चार्य्येत्यर्थः। वाग्यतोबलीन् हरेत्,—इति बलिहरण एव वाग्यतत्वमुक्तमितीह होमे, न प्राप्नोतीति खल्वाचार्य्यस्तूष्णीमित्याह। 'पाणिनैव' जुहुयान्न स्रुवादिपात्रान्तरेणेत्यर्थः॥ ३॥

प्राजापत्या पूर्व्वाऽऽहुतिर्भवति सौविष्टकृत्युत्तरा॥ ४॥

प्रजापतिर्द्देवताऽस्येति प्राजापत्या प्रजापतिदेवताका पूर्व्वा प्रथमा आहुतिर्भवति। 'सु' शोभनं 'इष्टं' अभिलषितं करोतीति, स्विष्टकृदित्यग्निरुच्यते। कस्मादग्निरुच्यते?। तदुच्यते। 'अग्नये स्विष्टकृते स्वाहेत्युत्तरार्द्धपूर्व्वार्द्धे जुहुयात्'—इति लिङ्गात्। "देवा वै अग्निं स्विष्टकृतमब्रुवन्;—हव्यं नोवहेति, सोऽब्रवीत्; किं मे ततः स्यात्?—इति, यत् कामयसे इत्यब्रुवन्, सोऽब्रवीत्; सर्व्वेष्टिषु

स्विष्टकृतीति, तथेति, सोऽवहद्धवींषि"—इति च ब्राह्मणं भवति। तस्य खल्वस्य स्विष्टकृत इयं सौविष्टकृती। सा खल्वियं सौविष्टकृती स्विष्टकृद्देवताका उत्तरा द्वितीया आहुतिर्भवतीत्यनुषज्यते। अत्रच—प्रजापतये स्वाहा, अग्नये स्विष्टकृते स्वाहा—इति होममन्त्रः पर्य्यवस्यति। कस्मात्?—लिङ्गदर्शनादेव। वक्ष्यति चाचार्य्यः—"मन्त्रान्ते स्वाहाकारः"—इति। "नमः स्वस्ति स्वाहा स्वधा अलं वषड्योगे चतुर्थी"—इति च शाब्दिकस्मरणम्। "अमुष्मै स्वाहेति जुहुयात्"—इति च गृह्यान्तरम्। होमोदैवः—इति वचनाद्यन्त्वादैवयज्ञो वैश्वदेव इति चोच्यते।

इदमिदानीं सन्दिह्यते। "अग्नावग्निर्धन्वन्तरिर्विश्वे देवाः प्रजापतिः स्विष्टकृदिति होमाः"—इति गोतमेन पञ्च आहुतयो दर्शिताः। अन्यैरपि मुनिभिरन्यथैव होमः समाम्नातः। किमेते होमा विकल्पेरन्, आहोस्वित् समुच्चीयेरन्?। यदा समुच्चीयेरन्, तदापि किं स्वशाखाहोमानामर्व्वागन्तरा परतो वा निविशेरन्, अथ वा परत एवेति?। किन्तावत् प्राप्तम्?—विकल्पेरन्निति। कस्मात्?। एकार्थत्वात्। वैश्वदेवनिर्वृत्त्यर्थं खल्विमे होमाः समाम्नायन्ते।'एकार्थास्तु विकल्पेरन्'—इति खल्वाचार्य्याणां समयः। अथवा। समुच्चीयेरन्निति प्राप्तम्। कस्मात्?। अतुल्यबलत्वात्। अतुल्यबलाः खल्विमे होमा भवन्ति;—स्वशाखाविहितो होमः स्वस्यैव भवति, अन्यस्तु स्वस्य चान्यस्य च—इत्यतुल्यबलत्वात् समुच्चीयेरन्निति युक्तम्। ते खल्विमे समुच्चीयमाना होमाः, स्वशाखाहोमानाम् आदावन्ते मध्ये वाऽनियमेन सन्निविशन्ते नियमकारिणः शास्त्र-

स्याभावादिति तावत् प्राप्तम्। एवं प्राप्ते उच्यते। विकल्पस्तावद-मीषां न सम्भवति, अतुल्यबलत्वादेव। इतश्च। स्वशाखपरित्याग-प्रसङ्गात्। यदा खल्विमे विकल्प्येरन्, तदा स्वशाखसमाम्नातोऽपि होमः पक्षे परित्यज्येत। न चैतदुचितम्। न खलु स्वशाखाश्रयमुत्सृज्य परोक्तमुपादीयते। तस्मान्न विकल्पः। अथ समुच्चीयेरन्नमी होमाः? एतदपि न सम्भवति। कस्मात्?। एकसिद्धावन्यवैयर्थ्यात्। एकेन स्वशाखोक्तहोमेन सिद्धे फले न खल्वन्यस्य होमस्य प्रयोजनमुपलभामहे। येन तमपि समुच्चिनुमः। अपि च। गौतमेन प्राजापत्याहुतेरर्व्वागन्यास्तिस्र आहुतयः समाम्नायन्ते। ताः खल्विमास्तिस्र आहुतयः कौथुमादीनां प्राजापत्याहुतेरर्व्वाक् न सम्भवन्ति। कस्मात्?। प्राजापत्या पूर्व्वाहुतिर्भवतीति समाम्नानात्। इयमेव पूर्व्वा नातोऽन्येत्यर्थः। अन्यथा पूर्व्वेति व्यर्थमापद्येत। एवं 'प्राक् स्विष्टकृत आवापः'—इति समाम्नानात् प्राजापत्याहुतेः परतः स्विष्टकृदाहुतेरर्व्वागन्यः सामान्याभिहितः पौराणिकादिको होमो माभूदित्येतदर्थं सौविष्टकृत्युत्तरेत्याह। इयमेवोत्तरा नान्येतितदर्थः। अन्ते सन्निविशन्तामितिचेन्न स्वशाखाविहितहोमेन सिद्धे फले साधनव्यापारवैयर्थ्यात्। नन्वमी सामान्यहोमाः स्वशाखहोमानामन्ते नित्यतया मा सन्निविशन्तां काम्यत यैव सन्निविशन्तामिति चेदोमिति ब्रूमः। सामान्येन खल्वभिहितानां सर्व्वशाखिधर्म्मत्वमुचितम्,। कस्मात्?। सामाम्नानस्यार्थवत्त्वात्। तेषां समाम्नानं खल्वेवमर्थवद्भवति। इतरथाऽनर्थकं प्रलापमात्रं स्यात्। कस्मात्?। प्रातिस्विकसमाम्नानाविशे-

षात् । सर्व्वेषामेव शाखिनां प्रातिस्विकं समाम्नानमस्ति होमाना-
मिति कस्मिंश्चिदपि शाखिन्यवकाशमलभमानं सामान्यसमाम्नानं
निर्विषयमेव स्यात् । तेषां खल्वाहिताग्निमप्युपक्रम्य किञ्चिदाम्नातमि-
त्यनाहिताग्निपरतयापि तदकृतार्थमेव भवति । तस्मात् सामा-
न्यसमाम्नाता होमाः सामान्यधर्म्मा इति सिद्धम् । ननु शाखान्त-
राधिकरणन्यायेनैकमेवेदं कर्म्मेति सर्व्वत्र सर्व्वोपसंहारो भवि-
ष्यति । नैष दोषः । भिन्नशास्त्रसमाम्नानात् । विभिन्नेषु शास्त्रेषु
खल्वाम्नातानां परस्परनिराकाङ्क्षाणामेषां उपसंहारो न सम्भ-
वति । अतएव गृह्यपरिशिष्टम् ।

"प्रयोगशास्त्रं गृह्यादि न समुच्चीयते परैः ।
प्रयोगशास्त्रताहानादनारम्भविधानतः ।
बह्वल्पं वा स्वगृह्योक्तं यस्य कर्म्म प्रकीर्त्तितम् ।
तस्य तावति शास्त्रार्थे कृते सर्व्वः कृतोभवेत्" ।

इति । अपि चागुणत्वात् । उपसंहारः खलु गुणानामेव भवति
न प्रधानानाम् । प्रधानानि चेह सामान्यसमाम्नाता होमाः ।
अपि च देवताभेदात् । देवताभेदः खल्विहोपलभ्यते । न च
देवताभेदे कर्म्मैक्यं भवति । अपि च पूर्व्वोत्तरत्वाम्नानात् । प्रा-
जापत्या पूर्व्वाहुतिर्भवति सौविष्टकृत्युत्तरेति पूर्व्वोत्तरत्वमाहु-
त्योराम्नायमानः खल्वाचार्य्य एतावानेवहोम इति दर्शयति—
इत्यवोचाम । तस्मान्नामीषामेककर्म्मत्वमस्ति । तस्मादादौ मध्ये च
सन्निवेशासम्भवात् स्वशास्त्रहोमानामन्त एवेच्छया सामान्य-
होमाः सन्निविशन्ते । स्वशास्त्रोक्तहोमः खल्वावश्यकः सामान्य-

होमोपि निर्विषयो माभूदितीच्छया काममन्ते भवतु, नत्वावश्यकः। ततश्च सामान्यहोमानामकरणे प्रत्यवायो नास्ति। करणे-त्वभ्युदयः।

"यत्र स्यात् कृच्छ्रभूयस्त्वं श्रेयसोपि, मणीषिणः।
भूयस्त्वं ब्रुवते तत्र कृच्छ्रात् श्रेयो ह्यवाप्यते"।

इति स्मरणात्। वलिकर्म्मण्यप्येष न्यायश्चिन्तनीयः। एतेन—"सदा भोजनस्योपनीतस्याग्रमग्नौ जुहुयात्, अग्ने विवस्वदुषस इति पूर्व्वेण, वलिञ्चोत्तरेण कुर्य्यात्, बहुपशुधनधान्यो भवति"—इत्येवमादि श्रुत्यादिसमाम्नाते काम्ये होमवलिकर्म्मणी व्याख्याते। तदेतत् सर्व्वमाह कात्यायनः।

"न स्यातां काम्यसामान्ये जुहोति वलिकर्म्मणी।
पूर्व्वं नित्यविशेषोक्त जुहोति वलिकर्म्मणोः।
काममन्ते भवेयातां न तु मध्ये कदाचन।
नैकस्मिन् कर्म्मणि तते कर्म्मान्यत्तायते यतः"।

इति। "अग्निहोत्रदेवताभ्यः सोमाय वनस्पतये अग्नीषोमाभ्यां इन्द्राग्निभ्यां द्यावापृथिवीभ्यां धन्वन्तरये इन्द्राय विश्वेभ्यो देवेभ्यो ब्रह्मणे"—इत्येवमादिकस्तु परशास्त्रोक्तो होमोवलिश्चपरैर्न कर्त्तव्य एव। परोक्तत्वात्। अक्रियैव खल्वसावन्येषामित्यवोचाम। अनाहिताग्नेर्यत् कर्त्तव्यन्तदप्याह कात्यायनः।

"अग्न्यादिर्गोतमेनोक्तो होमः शाकल एव च।
अनाहिताग्नेरेवैष युज्यते वलिभिः सह"।

इति। यः खल्वग्न्यादिहोमो गोतमेनोक्तः, स तदुक्तैरेव वलिभिः—

"दिग्देवताभ्यश्च यथा स्वं, द्वारेषु मरुद्भ्यो, गृहदेवताभ्यः प्रविश्य, ब्रह्मणे मध्ये, अद्भ्य उदकुम्भे, आकाशायेत्यन्तरीक्षे, नक्तञ्चरेभ्यश्च सायम्"—इत्येवं लक्षणैः सहित इत्येकः कल्पः। यश्च शाकलहोमो देवकृतस्यैनस—इत्याद्यष्टाहुत्यात्मकः सामवेदपठितः स चाग्निपुराणाद्युक्तवलिभिः सहित इत्यन्यः कल्पः। तथा चाग्निपुराणयोगियाज्ञवल्क्यौ।

"अन्नं व्याहृतिभिः पूर्वं हुत्वा मन्त्रैश्च शाकलैः।
भूतेभ्यश्च वलिं दत्त्वा ततोऽश्नीयादनग्निमान्"।

इति। प्रणवपरिशिष्टम्।

"अन्नं व्याहृतिभिर्हुत्वा तथा मन्त्रैस्तु शाकलैः।
भूतेभ्यश्च वलिं दत्त्वा तदाश्नीयादनग्निकः"।

इति। तथा स्मृत्यन्तरम्।

"अनग्निकस्तु योविप्रोह्यन्नं व्याहृतिभिः स्वयम्।
हुत्वाशाकलहोमैश्च शिष्टाद्भूतवलिं हरेत्"।

इति। तदेवं गोतमोक्तहोमस्तदुक्तवलिभिः सहेति, शाकलहोमोऽग्निपुराणाद्युक्तवलिभिः सहेति च निरपेक्षौ द्वौ कल्पाविति रघुनन्दनादीनां मतम्। तेषां मते, 'शाकल एव च'—इत्येवकारोऽनन्तरोक्तकल्पव्यवच्छेदार्थः, च शब्दश्च वाशब्दार्थः, एष इति च प्रकृतवाचिना सर्वनाम्ना निरपेक्षं कल्पद्वयमुच्यते। पितृदयिताकारादिभिस्तु—एकस्मिन् प्रयोगे गोतमोक्ताग्न्यादिहोमशाकलहोमौ समुच्चितौ लिखितौ। तेषां मते एवचेति निपातसमुदायः समुच्चयवाची। यथा स्मृत्यन्तरे—

"विश्वेभ्यश्चैव देवेभ्यो धन्वन्तरय एव च।
कुह्वै चैवानुमत्यै च प्रजापतय एव च"।

इति।

"दिवाचरेभ्यो भूतेभ्यो नक्तञ्चारिभ्य एव च"।

इति चैवमादौ। एवशब्दो गृह्योक्तहोमव्यवच्छेदार्थः, चशब्दः समुच्चयार्थो वा। एष इति चैकवचनान्तेन प्रकृतवाचिना सर्वनाम्ना समुच्चितं होमद्वयमेकप्रयोगभूतं परामृश्यते। एष इति खल्वेकवचनं विधेयविशेषणतया विवक्षितं भवितुमुचितम्। न चाचाविवक्षायां कारणमस्ति। न चैष गोतमोक्तहोमः—एष वा शाकलहोम इत्यादृत्तिकल्पना प्रामाणिकी। न च साहित्यवाचिद्विवचनान्ताद्यनुक्तेर्नैवमितिवाच्यं साहित्यवाचिचकारस्योक्तत्वात्। न च, अन्नं व्याहृतिभिर्हुत्वा—इति, अनग्निकस्तु योविप्रः—इति चैवमादिभिः केवलशाकलहोमाभिधानान्न समुच्चय इति वाच्यम्, अन्यार्थानामन्यत्रानुपयोगात्। अन्यार्थाः खल्विमाः स्मृतयः—कल्पान्तरपरा नान्यत्रोपयुज्यन्ते इति कात्यायनकल्पे समुच्चयो न विरुध्यते। कल्पान्तरपराः खल्विमाः स्मृतयो भवन्ति। कस्मात्?। अतुल्यार्थत्वात्। कात्यायनेन शाकल एव होमः समाम्नातः, आसु च स्मृतिषु व्याहृतिहोमः शाकलहोमश्चेति नेमौ तुल्यौ कल्पाविति शक्यते वक्तुम्। तस्मादिमाः स्मृतयः कात्यायनकल्पात् कल्पान्तरविधायिन्यो न कात्यायनकल्पे समुच्चयं बाधितुमुत्सहन्ते। यच्च व्यासस्मृतौ।—

"व्यस्ताभिर्व्याहृतीभिश्च समस्ताभिस्ततः परम्।

षड्भिर्देवकृतस्येति मन्त्रवह्नि यथाक्रमम्।
प्राजापत्यं स्विष्टकृतं हुत्वैवं द्वादशाहुतीः"।

इति संख्यावचनम्। यच्च स्कन्दपुराणवचनम्—

"वैश्वानरं समभ्यर्च्य साज्यपुष्पाक्षतैरथ।
भूराद्या व्याहृतीस्तिस्रः स्वाहान्ताः प्रणवादिकाः।
ॐ भूर्भुवः स्वः स्वाहेति विप्रोदद्यात्तथाहुतिम्।
तथा देवकृतस्याद्या जुहुयात्तु षडाहुतीः।
यमाय तूष्णीमेकाञ्च तथा स्विष्टकृदग्नये।
विश्वेभ्यश्चापि देवेभ्यो भूमौ दद्यात्ततोबलिम्।
सर्व्वेभ्यश्चापि भूतेभ्यो नमो दद्यात्तदुत्तरे।
दक्षिणेपि पितृभ्यश्च प्राचीनावीतिकोददेत्।
निर्नेजकोदकान्तेन ऐशान्यां यक्ष्मणेऽर्पयेत्।
ततो ब्रह्मादिदेवेभ्योनमोदद्यात्तदुत्तरे।
निवीतो सनकादिभ्यः पितृभ्यस्त्वपसव्यवान्"।

इति। तदपि कल्पान्तरपरमेव। तस्मात् शाखिविशेष एवावतिष्ठते, इति नास्माकमेतत् प्रमाणं भवति। इतश्च शाखिविशेष एवावतिष्ठते,—संख्यान्तरवचनात्। संख्यान्तरं खल्विहोच्यते—षड्भिरिति, द्वादशाहुतीरिति, षडाहुतीरिति च। अस्माकं खल्वष्टा वाहुतयः शाकलहोमे भवन्ति। अष्टाहुत्यात्मकः खल्वेष होमः खाण्डब्राह्मणे समाम्नातः। तस्मादमूषां स्मृतीनां कात्यायनकल्पात् कल्पान्तरपरत्वं वाच्यम्। अतएव हलायुधेन वाजसनेयिनां देवकृतस्येति षडाहुतयोलिखिताः व्याहृतिहोमादयश्च।

अस्माकं खल्वेतस्मिन् शाकलहोमे स्वाहाकारप्रयोगो नास्ति। कथन्तर्हि होतव्यम्?। तदुच्यते। "देवकृतस्यैनसोऽवजनमसि"— इत्येवमादिभिरसिकारान्तैरेवाष्टाभिर्मन्त्रैरष्टावाहुतयो होतव्याः। कस्मादेवमुच्यते?। द्राह्यायणसमाम्नानात्। तथाच द्राह्यायण सूत्रम्। "अष्टावष्टौ शकलान्याहवनीये प्रहरेयुर्देवकृतस्येत्येतत्- प्रभृतिभिरिकारान्तैः"—इति। लाट्यायनोऽप्याचार्य्य एवमेव सूत्र- याञ्चकार। अत्र खल्विकारान्तैरिति सूत्रयन्नाचार्य्यः स्वाहाका- रस्याप्रयोगं दर्शयति। विपर्य्यये च स्वाहाकारो मन्त्रान्तः स्यात् न पुनरिकार इति। 'तस्मादिकारान्तैरित्येतत्' स्वाहाकारं परिसञ्चष्टे। अत एवाचार्य्येणसायनेन प्रौढब्राह्मणभाष्ये व्याख्या- तम्—"अवयजनमसीत्येव मन्त्रैः न तत्र स्वाहाकार इत्यर्थः"— इति। होममन्त्रस्य स्वाहाकारान्तत्वमन्तरेणापि दर्शनान्नैवात्र किमपि शङ्कितव्यं भवति। तथाच सूत्रम्। "अग्निहोत्रे द्वे आहुती जुहुयुरपां पुष्पमिति पूर्व्वां स्वाहाकारेणोत्तराम्"—इति। वाच- निकी खल्वेवमादिकाव्यवस्थावचनमनुसरतीति न किञ्चिदनुचि- तम्। यत् पुनराचार्य्येणाग्निस्वामिना विवृतम्—"इकारान्तैरिति मन्त्रान्तज्ञापनार्थम्"—इति। तस्याप्यस्मदुक्त एवार्थैतात् पर्य्यम्। कथन्नाम?—इकार एवान्तोनात्र स्वाहाकारोऽस्तीति। अव- गम्यत एव खल्वमीषां मन्त्राणामिकारान्तत्वमिति पुनरिकारा- न्तवचनमनर्थकमेव स्यात्—यदि न परिसञ्चक्षीत। न च— "उत्तरादिः पूर्व्वान्तलक्षणम्"—इति सूत्रणान्नात्र मन्त्राणामि- कारान्तत्वमवगम्यते इति वाच्यं, सोमभागमन्त्रादीनामिवामीषा-

अपि लिङ्गादेवावसानावगमस्य सम्भवात् । इकारान्तैरित्यनेनाप्य-सिकारावसानत्वानवगमाच्च । तस्मात्—'मन्त्रान्ते स्वाहाकारः—इति वचनादिकारान्तानां मन्त्राणामन्ते स्वाहाकारः कर्त्तव्यः'—इत्यसङ्गतं वचनम् ।

समुच्चयपक्षे च वलिभिरिति गृह्योक्त एव वलि र्गृह्यते । कस्मात्?। अन्तरङ्गत्वात् । विशेषानुक्तौ गृह्योक्तमेव सर्व्वेषामन्त-रङ्गं शीघ्रं हृदयमागच्छति, तन्न युज्यते विनाकारणमुत्स्रष्टुम् । इतश्च,—अप्रतिषिद्धत्वात् । प्रतिषिद्धः खल्वनग्नेर्गृह्योक्तोहोम इति समाक्रियतां, वलिस्त्वप्रतिषिद्धः कथं न क्रियते! । इतश्च;—होममात्रव्यवच्छेदात् । होमः शाकल एव च—इत्येवकारेण गृह्योक्तहोममात्रं व्यवच्छिन्नन्नृषि र्गृह्योक्तं वलिमनुजानातीत्यव-गम्यते । इतश्च,—स्वशाखाश्रयपरित्यागप्रसङ्गात् । स्वशाखाश्रयं खल्वेवं परित्यज्येत, न चैतदुचितम्, न चात्र विशेषवचनमस्ति । तस्मादनग्निनापि गृह्योक्ता वलयोदेयाः । काम्याश्च वलयो विष्णु-पुराणादौ पठिताः । त इहोच्यन्ते ।

"ततोऽन्यदन्नमादाय भूमिभागेषु वै वुधः ।
दद्यादशेषभूतेभ्यः स्वेच्छया तत्समाहितः ।
देवा मनुष्याः पशवो वयांसि
सिद्धाः सयक्षोरगदैत्यसंघाः ।
प्रेताः पिशाचास्तरवः समस्ता-
ये चान्नमिच्छन्ति मया प्रदत्तम् ॥
पिपीलिकाः कीटपतङ्गकाद्या-

बुभुक्षिताः कर्म्मनिबन्धबद्धाः।
प्रयान्तु ते तृप्तिमिदं मयान्नं
तेभ्योनिसृष्टं सुखिनो भवन्तु॥
येषां न माता न पिता न बन्धु—
र्नैवान्नसिद्धिर्न तथान्नमस्ति।
तत् तृप्तयेऽन्नं भुविदत्तमेत—
त्तेयान्तु तृप्तिं मुदिता भवन्तु॥
भूतानि सर्व्वाणि तथान्नमेत—
दहञ्च विष्णुर्न यतोऽन्यदस्ति।
तस्मादहं भूतनिकायभूत—
मन्नं प्रयच्छामि भवाय तेषाम्॥
चतुर्द्दशो भूतगणोय एष—
तत्र स्थिता येऽखिलभूतसंघाः।
तृप्त्यर्थमन्नं हि मया निसृष्ट—
स्तेषामिदन्ते मुदिता भवन्तु॥

"इत्युच्चार्य्य नरोदद्यादन्नं श्रद्धासमन्वितः।
भुवि भूतोपकाराय गृही सर्व्वाश्रयो यतः॥
श्वचाण्डालविहङ्गानां भुवि दद्यात्ततो नरः।
ये चान्ये पतिताः केचिदपात्रा भुवि मानवाः"॥

इति। तदत्र,—देवा मनुष्याः,—इत्येवमादिकां पञ्चश्लोकीमुच्चार्य्य एक एव बलिर्द्दातव्यः। इति नाप्रकृतवाचिना पञ्चश्लोक्याः परामर्शादन्नमिति चैकवचननिर्द्देशात्—इति वाचस्पतिमिश्रप्रभृतयः। एवमन्येऽपि कल्पान्तराण्यन्तरे द्रष्टव्याः।

स खल्वयं वैश्वदेवहोमो लौकिकाग्नौ जलादावपि कर्त्तव्यः।

"लौकिके वैदिके वापि हुतोच्छिष्टे जले चितौ।
वैश्वदेवञ्च कुर्व्वीत पञ्चसूनापनुत्तये"।

इति शातातपस्मरणात्।

"शालाग्नौ वा पचेदन्नं लौकिके वापि नित्यशः।
यस्मिन्नग्नौ पचेदन्नं तस्मिन् होमो विधीयते"।

इति च स्मृत्यन्तरम्। जलचित्योः पर्य्युक्षणादिकमपि नास्ति, अग्नावेव तदाम्नानादिति वाचस्पतिमिश्राः। गोतमोक्ताग्न्यादिहोमशाकलहोमयोर्विकल्पवादिनस्त्वाहुः—गोतमवचने होमादेवाग्निप्राप्तेरग्निग्रहणं जलचित्याधारतानिवृत्त्यर्थं, ततश्च शाकलकल्प एव साऽवतिष्ठते—इति। तदनेन समुच्चयपक्षेप्यनयोर्जलचित्याधारता न युक्ता तत्राप्यग्न्यादिहोमस्याविशेषादिति चेत्। उच्यते। यदि नामाग्निग्रहणं जलचित्याधारतां निवर्त्तयेदपि, तर्हि केवलगोतमोक्तहोम एव निवर्त्तयतु, न तु तत्समुच्चिते शाकलहोमेपि, तद्वचनस्य तत्राप्रवृत्तेः। सामान्येन च वचनान्तरेण तत्प्राप्तेः। अपिच। नैतदप्यस्ति,—गोतमवचनेऽग्निपदं जलचित्याधारतानिवृत्त्यर्थम्—इति। न खलु गोतमवचनेऽग्निग्रहणं जलचित्याधारतां निवर्त्तयति, किन्तर्हि, एकदेशोत्कीर्त्तनपरमग्निपदं जलादिकमुपलक्षयति। अतएव—

"कनकालङ्कृतां दत्वा तच गामवतारयेत्।
सामगाय च सा देया ब्राह्मणाय विजानते!"।

इति वचनमेकदेशोत्कीर्त्तनपरमिति,—"सचेलकण्ठां काञ्चन-

अष्टकीं वृषभजां कृष्णचुरीं कांस्योपदोहां विप्राय दद्यात्"—इति मन्यन्तरोक्तमन्यदुपलक्षयति,—इति वाचस्पतिमिश्रैर्निरूपितम्।

ननु होमादेवाग्निप्राप्तेरग्निग्रहणमग्नावेवेत्येवमर्थमेव किमिति न स्यात्? इति चेन्नैष दोषः। कस्मात्?। अशब्दत्वात्। अग्नाविति वचनं भवति, तदिदं वचनमग्नौ होमं शक्नोति वदितुं, न पुनरनग्निं निवर्त्तयितुं प्रभवति। तस्मादशब्दोऽयमर्थः—अग्नावेव इति। होमादेवाग्नेः प्राप्तत्वादन्याय्यं पुनर्व्वचनम्?। उच्यते। काममन्याय्यं भवतु, न तु शक्नोत्यन्यद्वदितुम्। सकृदुच्चरितेऽप्यस्य यावानर्थः, शतकृत्वोऽप्युच्चरिते तावानेव प्रतीयते। अपिच। साधुः खल्वयमाचार्य्यः कथमस्य वचनमन्याय्यं भवतु। साधोर्व्वचनं बहुशोऽप्युच्यमानं न्याय्यमेव। असाधोस्तु सकृदप्यन्याय्यम्। पुनर्व्वचनस्य प्रयोजनं किञ्चिद्वक्तव्यम्?। एवन्तर्हि आदरः पुनर्व्वचनस्य प्रयोजनं भविष्यति। आदरेणाग्नौ होमः कर्त्तव्यः—इति। आदरार्थमपि पुनर्व्वचनमाचार्य्याणां बहुलमुपलभ्यते इति नैषाऽस्मत्कल्पनेति शक्यते वक्तुम्। परिसंख्यार्थमेव कुतो न भवति पुनर्व्वचनमिति चेन्न, अन्यथैवोपपत्तेः। न खल्विष्यते परिसंख्या सम्भवन्त्यामपि गतौ। सा हि दोषत्रयदुष्टा भवति। तथा चोक्तम्।

"श्रुतार्थस्य परित्यागादश्रुतार्थस्य कल्पनात्।
प्राप्तस्य बाधादित्येवं परिसंख्या त्रिदोषिका"।

इति। परिसंख्यायाञ्च श्रुतिरत्यन्तमुत्सृष्टा भवति। यावच्च भवानग्निपदस्य स्वार्थकल्पनया जलादिकं व्यावर्त्तयितुमुत्सहते, तावद्वाक्यान्तरेण जलाद्याधारताऽन्वीयते—इत्युपरिष्टादुपजायमानेऽपि

परिसंख्यावाक्यार्थः कथमिवाग्नितमपि जलादिकं परिसङ्ख्यीत । वाक्यभेदश्चैवमापद्येत ! कस्मात्?। इति होमाः कर्त्तव्याः, ते चाग्नावेव न जलादाविल्यर्थभेदात्। एकं खल्विदं वाक्यम्—'अग्नावग्निर्धन्वन्तरिर्विश्वेदेवाः प्रजापतिः स्विष्टकृदितिहोमाः'—इति । तस्मादग्नाविति न नियमार्थं वचनम्। अन्यथा—

"वैश्वानरं समभ्यर्च्य साज्यपुष्पाहुतैरथ" ।

इति ।

. "अनाहिताग्निरथाग्निरादायान्नं घृतप्लुतम् ।

शाकलेन विधानेन जुहुयाल्लौकिकेऽनले" ।

इति चैवमादिस्मृतौ शाकलहोमेप्यग्नेरुपादानात्तत्रापि जलचित्याधारता न स्यात् । तस्मादेवेति चेन्नाभ्युपगमात्। अभ्युपगम्यते खल्वेतद्भवता—यदुत शाकलकल्पे जलचित्याधारतेति । अपिच । गोतमः खल्वाचार्य्यः—"भार्य्यादिरग्निर्दायादिर्वा, तस्मिन् गृह्याणि, देवपितृमनुष्ययज्ञाः"—इत्यभिधाय, 'अग्नावग्निः'—इत्यादिवचनं रचयाञ्चकार । स खल्वयं होमो गृह्य एवाग्नौ माभूदित्येवमर्थं पुनरग्नावित्याह । तत्कथमनर्थकमग्निवचनं?—येन परिसङ्ख्यीत ! अग्नावित्यवचने खल्वयं होमः प्रकृते गृह्य एवाग्नौ स्यात् । होमात् खल्वग्निर्गम्यते, प्रकृतश्च गृह्योऽग्निरिति स एव गम्येत । तस्मादग्नाविति जात्या द्रव्यमग्निमात्रं लक्षयित्वा तत्र होमो विधीयते,—लौकिकेप्यग्नौ होतव्यमित्येवमर्थं, नान्येषामाधाराणां निवृत्त्यर्थम् । न खल्वग्निपदं व्यक्तिवचनं, येनाग्नेयोन्यायात् प्रसिद्ध एवाग्निरर्थः स्यात् । यदि पुनरग्निपदस्यापि प्रकृत

एवाग्निरर्थ इत्युच्यते। अस्तु तर्हि गृह्याग्निसाध्योयं होमः, स एवा-
नाहिताग्नेः कात्यायनेन विहितः,—इत्यनाहिताग्नेराधारविशे-
षाभावान्न तेषामप्यग्नावेव कर्त्तव्य इति शक्यते वक्तुम्। होममात्रं
खल्वनाहिताग्नेर्विधीयते, न तु गृह्याग्निसाध्यत्वविशिष्टमपि। गौर-
वादसम्भवाच्च। न खल्वनाहितगृह्याग्नेस्तस्मिन्नग्नौ होमः सम्भ-
वति। तस्मादेवमपि होम एवानग्नेर्विधीयते, नत्वग्नौ होमोपि।
तस्माद्धोतमन्त्रवचनेऽग्निपदं निरग्नेरप्याधारान्तरं निवर्त्तयतीत्यस-
ङ्गतं वचनम् ॥ ४ ॥ * ॥

अथ वलीन् हरेत् वाह्यतोवाऽन्तर्व्वा सुभूमिं कृत्वा
॥ ५ ॥

अथेति पूर्व्वप्रकृतार्थम्। अथ पूर्व्वप्रकृतेनैवान्नेन होमावशिष्टेनेत्ये-
तत्। कात्यायनोपि स्मरति।

"स्वशाखाविधिना कृत्वा तच्छेषेण वलिं हरेत्"।

इति। अपचारे च शेषस्यान्यदप्युपादाय वलीन् हरेत्। क-
स्मात्?—

"यथोक्तवस्त्वसम्पत्तौ ग्राह्यं तदनुकारि यत्।
यवानामिव गोधूमा व्रीहिणामिव शालयः" ॥

इति कर्म्मप्रदीपस्मरणात्। 'गुणलोपे, न मुख्यस्य'—इति च
न्यायात्। मुख्यः खल्वयं वलिर्भवति प्रधानत्वात्। न खल्वयं वलि-
र्द्रव्यार्थः, किन्तर्हि?—पुरुषार्थ इत्युपरिष्टादुपपादयिष्यामः। पुरु-
षार्थञ्च कर्म्म प्रयोजयति द्रव्यम्। प्रधाने च कर्म्मणि द्रव्यविधि-

रयं भवति,—शेषेण वलीन् हरेत्—शेषेण बलिहरणमभिनिर्व्वर्त्तये-दिति। ननु साक्षाद्‌च शेषः प्रतिपाद्यते?। उच्यते। सत्यं शेषः प्रतिपाद्यते। तत् खल्विदं प्रतिपादनं प्रधाने कर्म्मणि क्रियते—इति शेषनाशेपि नैतत् परिलुप्यते। कर्म्मचोदनाहि द्रव्यमन्तरेणा-नुपपन्नाद्‌द्रव्यमाक्षिपति, विशेषशास्त्रन्तु नियामकम्, तत्रासम्भवात् यदा न प्रवर्त्तेत, तदा माभून्नियमः, तथापि सामान्याक्षेपस्य वारयितुमशक्यत्वात् अस्ति प्रतिनिधिः,—इति खल्वभियुक्ताः कथयन्ति। प्रतिपत्तिरूपकर्म्माङ्ग एव प्रतिपाद्याभावे तन्निवृ-त्तिमनुमन्यन्ते। विहितस्य द्रव्यस्य खल्वपचारे प्रतिनिधिरुपादेय इति च षष्ठाध्याये सिद्धान्तितम्।

"चरितार्था श्रुतिः कार्य्या यस्मादप्यनुकल्पशः"।

इति च स्मरणम्। अस्तिचात्र साक्षादपि द्रव्यान्तरविधायकं कि-ञ्चिद्वचनम्। तच्चोदाहरिष्यामः। तस्माच्छेषापचारेऽन्यदुपादाय वलयोहर्त्तव्या इति सिद्धम्। कुत्र वलयो हर्त्तव्याः?। तदुच्यते। 'वाह्यतो' बहिर्व्वा, प्रकृतत्वादग्न्यगारस्य। तथा चाग्न्यगारान्नि-ष्क्रम्य तस्मिंस्तस्मिन् प्रदेशे तन्तं वलिं हरेत्, योयोवलिर्यस्मिन् यस्मिन् प्रदेशे समाम्नातः। 'अन्तर' मध्ये वा अग्न्यगारस्य—एक-स्मिन्नेव प्रदेशे वलीन् हरेत् सर्व्वान्। 'सुभूमिं' शोभनां भूमिं कृत्वा, यथासम्भवं सम्मार्ज्जनोपलेपनादिभिरिति वाक्यशेषः॥

॥ ५ ॥ * ॥

सकृदपोनिनीय चतुर्धा वलिं निदध्यात् सकृदन्ततः परिषिञ्चेत् ॥ ६ ॥

सकृदेकवारम्। अप उदकं निनीय निषिच्य चतुर्द्धा चतुर्षु स्थानेषु वलिं वलिचतुष्टयं निदध्यात्। अत्रच—"समाचारात्, प्राच्यं वलिचतुष्टयमात्रं सकृद्गृहीत्वा चतुर्षु स्थानेषु निदध्यात्, वलिमित्येकवचनात्, चतुर्धेतिवचनाच्च"—इति वल्गुसोमभट्टनारायणौ। तच्चेदं, वलिचतुष्टयार्थं सकृदेव सेकः—इत्यस्मिन् पक्षे ज्ञेयम्। यत्र पुनरग्रिमसूत्रानुसारादेकैकवल्यर्थमकैकपरिषेकः पुरस्ताच्चोपरिष्टाच्च क्रियते, न तत्रैतद्भवति। न खलु शक्यते द्वितीयादिवल्यन्नं दक्षहस्ते कुर्व्वता तेनैव हस्ते न परिषेक्तुम्। दक्षिणः करः खलु कर्म्मपारगोऽङ्गानुक्तावित्यवोचाम। परिशिष्टप्रकाशोऽप्येवमेवाह। तदेवं वलिचतुष्टयं दत्वा, सकृदेकवारं अन्तत उपरिष्टात् परिषिञ्चेदग्नीन्। प्राक्संस्थाः खल्विमे वलयो भवन्ति। कस्मात्?। "प्राञ्चि उदञ्चि वा कर्म्माण्यनुतिष्ठेरन्"—इति श्रवणात्। एकत्र निधानपक्षे चास्माकं तथा दर्शनात्। तच्चोदाहरिष्यामः। वलिपरिमाणञ्चाह कर्म्मप्रदीपः।

"न चावराद्ध्यावलयो भवन्ति
महामार्ज्जार श्रवण प्रमाणात्।
एकत्र चेत् हन्त्ता भवन्ति
इतरेतर संसक्ताश्च" ॥

इति। तच्च परिमाणमङ्गुष्ठपर्व्वमात्रमिति भट्टभाष्यम् ॥ ६ ॥ *॥

एकैकं वानुनिधानमुभयतः परिषिञ्चेत् ॥ ७ ॥

'एकैकम्', एकमेकं वा बलिम्, 'अनुनिधानं',—निधानमनुलक्ष्यी-कृत्यानुनिधानं, प्रत्येकं निहितान् बलीन् प्रत्येकमेवोभयतः, पुरस्ता-च्चोपरिष्टाच्च परिषिञ्चेत् ॥ ७ ॥ * ॥

स यत् प्रथमं निदधाति स पार्थिवो बलिर्भवत्यथ यत् द्वितीयं स वायव्यो यत् तृतीयं स वैश्वदेवो यच्चतुर्थं स प्राजापत्यः ॥ ८ ॥

स यजमानः प्रथमं यन्निदधाति इति यदर्थो निधानक्रियाविशे-षणम्। व्यत्ययाद्वा नपुंसकत्वम्। स यत् यं बलिं प्रथमं निद-धाति, स पार्थिवः,—पृथिवी देवताऽस्येति देवतार्थे तद्धितवि-धानात् पृथिवीदेवताको भवतीत्यर्थः। अनेनैव सूत्रशेषो व्या-ख्यातः। "अनिरुक्तं हि प्राजापत्यम्"—इति वचनात् मानसः प्राजापत्यबलिः। तदुच मन्त्रानुपदेशात्—

"ॐकारादिसमायुक्तं नमस्कारान्तकीर्त्तितम्।

स्वनामसर्व्वसत्वानां मन्त्र इत्यभिधीयते"।

इति स्मृत्यन्तरदर्शनात्, ॐ पृथिव्यै नमः—इत्येवमादिको बलि-मन्त्रः सिध्यति। यत्तु आचार्य्य एव विक्रतो वास्तुबलौ वक्ष्य-ति,—"नमो ब्रह्मणे इति दिवि"—इति। तदपि पदद्वय-कीर्त्तनाभिप्रायं न क्रमपरम्। अत एव—

"पायसेनापि दातव्यः स्वनाम्ना सर्व्वतः क्रमात्।
नमस्कारान्तयुक्तेन प्रणवाद्येन सर्व्वतः"।

इति वास्तुबलावेव स्मृत्यन्तरम्। एवमेवाचार्य्यस्याशयं स्पष्टयाञ्चकार कात्यायनः कर्म्मप्रदीपे।

"अमुष्मै नम इत्येवं बलिदानं विधीयते।
बलिदानप्रदानार्थं नमस्कारः कृतो यतः"।

इति। अत्र, इतिः पदद्वयकीर्त्तनार्थः। एवमिति क्रमार्थम्। भट्टनारायणकुल्लुकभट्टशूलपाणिवाचस्पतिमिश्ररघुनन्दनप्रभृतिभिरपि नमस्कारान्त एव बलिमन्त्रोलिखितः। परिशिष्टप्रकाशेतु,—नमो ब्रह्मणे इति दर्शनात् नमः पृथिव्यै इति बलिहरणमन्त्रोलिखितः। अमुष्मै नम इति च तत् सूत्रविरोधादेव न क्रमपरं किन्तु पदद्वयकीर्त्तनाभिप्रायम्—इति चाभिहितम्। नैतदेवम्। शाब्दक्रमविरोधात्। इत्येवं बलिदानम्—इति शाब्दः क्रमः खल्विह कात्यायनेन समाम्नातः। पाठक्रमाच्च बलवत्तरः स इष्यते। तथा-चोक्तम्। "श्रुतिलक्षणमानुपूर्व्यं तत्प्रमाणत्वात्"—इति। "क्रमकोर्थेऽर्थशब्दाभ्यां श्रुतिविशेषादर्थ परत्वाच्च"—इति च। कात्यायनवचनं पदद्वयकीर्त्तनाभिप्रायं न क्रमपरमिति चेन्न विनिगमनाभावात्। कात्यायनवचनं पदद्वयकीर्त्तनाभिप्रायमाचार्य्यसूत्रं वेत्यत्र न काचिद्विनिगमनोपलभ्यते। परमार्थतस्तु—इत्येवमितिवचनात् कात्यायनवचनं क्रमपरं भवितुमर्हति। किमाचार्य्यः कात्यायनस्य नोपजीव्यः?। क एवमाह—नोपजीव्य इति, सत्यमुपजीव्य एवाचार्य्यः कात्यायनस्य, किमतो भविष्यति?।

यद्येवमेतदतो भविष्यति ;—कात्यायनवचनमुपजीव्यबाधभयादेव न क्रमपरम्—इति। मैवम्। भवेदेवं यद्याचार्य्यविरुद्धम् अपि कात्यायनवचनं प्रमाणमिति प्रतिपद्येमहि, न च वयमेवं प्रतिपद्यामहे, किन्तर्हि?—इत्येवं वलिदानम्—इति ब्रुवाणः कात्यायन आचार्य्यस्यैवमेवाभिप्राय इति दर्शयति—इति ब्रूमः। कात्यायनः खलु,—गोभिलोक्तानामस्पष्टानां विधिं प्रदीपवत् सम्यग्दर्शयिष्ये—इति प्रतिज्ञातवानित्यवोचाम। वृत्तिकारकल्पः खलु कात्यायन आचार्य्यस्य दृश्यते। मुन्यन्तरैश्चास्य सम्बादो दृश्यते, न खल्वाचार्य्यस्तेषामपि उपजीव्यः! इदमप्यनल्पप्रामाण्यकारणं यदुत संवादः—इति। स्मृत्यर्थसन्देहे च स्मृत्यन्तरसंवादादेवार्थनिर्णयं निबन्धारोमन्यन्ते। यदि पुनः,—नमो ब्रह्मणे—इत्याचार्य्यस्य सूत्रं क्रमपरमेवेष्यते, तर्हि कामं ब्रह्मबलावेव नमो ब्रह्मणे इत्यस्तु प्रयोगस्तत्रैव तथाम्नानात्, न त्वन्यत्र प्रमाणाभावात्। कल्प्यतामन्यत्रापीतिचेन्न, नमस्कारान्तत्वबोधकशास्त्रसद्भावात्। न खल्वाचार्य्येणैकत्र नमः पदं पूर्वमुक्तमिति सर्व्वत्र तदेव कल्पयितव्यम्,—अनादृत्य नमः पदान्तत्वबोधकानि मुनिवचनानि,—इति युक्तम्। अथ—

"बहूनामेकधर्म्माणामेकस्यापि यदुच्यते।

सर्व्वेषामेव तत् कुर्य्यादेकरूपा हि ते स्मृताः"।

इति वचनादस्तु सर्व्वत्रैव नमः पदादित्वमितिचेदुच्यते। एवमपि वास्तुबलावेव तद्भवितुमर्हति, न तु नित्यबलावपि। नित्यबलौ कॢप्तेन नमस्कारान्तवचनेन कल्पनानवकाशात्। वस्तुतस्तु वास्तुबला-

वपि न तद्वचनात् सर्व्वत्र नमः पदादित्वं कल्पयितुं शक्यते। कस्मात्?। तत्रापि मुन्यन्तरीयनमस्कारान्तवचनाविशेषात्। अपिच। यत्र खल्वेकधर्म्मीणां बहूनामेकं सिद्धवदनूद्य किञ्चिदुच्यते, तत्रैव तद्वचनं प्रवर्त्तते। नचात्र बहूनामेकं सिद्धवदनूद्य किञ्चिद्विधीयते। किन्तर्हि?—किञ्चिद्विशिष्टमेकमेव विधीयते। तच्च किञ्चिद्विशिष्टमेवैकं विहितं सद्बहूनाम् एकं भवति—इति नास्त्यत्र तद्वचनस्यावकाशः। यत्र खल्वेकधर्म्मीणां बहूनामेकं धर्म्मिणं—लब्धात्मभावमनूद्य कस्यचिद्धर्म्मस्य विधानं भवति, भवति तत्र तस्य वचनस्यावसर इति धीमद्भिरनुचिन्तनीयम्। यत्तु—बलिमन्त्राणामन्येषां नमः पदान्तत्वमभ्युपगम्य, ब्रह्मबलौ नमः पदादित्व नमः पदान्तत्वयोर्व्विकल्पम्—आहुः। तत्र प्रमाणं नास्ति। यदि नाम विकृतिगतमाचार्य्यसूत्रं क्रमपरमिष्यते, तर्हि कामं विकृतावेव ब्रह्मबलौ एवमस्तु, न तु वैकृतेषु बल्यन्तरेषु, प्राकृतेषु च बलिष्वेषा कल्पना सम्भवति। विकल्पस्य चान्याय्यत्वात्। क्रमपरत्व खल्वाचार्य्यसूत्रस्य कात्यायनवाक्येन समस्य विकल्पायोगाच्चानुचितैषा कल्पना, न खल्वष्टदोषदुष्टोविकल्पः सम्भवन्त्यामपि गतौ समाश्रयितुमुचितः। यद्यपि प्रामाण्यान्माभूद्वचनस्य प्रमत्तगीतता—इति खल्वसावगत्या समाश्रियते। तथाचाभियुक्तानां वचनम्।

एवमेवाष्टदोषोपि यद्व्रीहियवपाकयोः।

विकल्प आश्रितस्तत्र गतिरन्या न विद्यते"।

इति। प्रकृतिविकारभावाच्च। यदि नाम वैकृतं शास्त्रं क्रमपरमिष्यते, तथापि न तत्प्राकृतेन शास्त्रेण विकल्प्यते—इत्यसङ्गतैषा